Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दशकर्मपद्धतिः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ श्रीगणेशाय नमः ॥ अथ यजुःशाखीय गृह्यपद्धतिर्लिख्यते तत्र कर्त्ता शुभे
दिने शुक्लवासाः कृततिलकः शुभासने प्राङ्मुख उपविश्याचम्य स्वस्तिवाच
येत् ॐ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः स्वस्ति पूषा
असुरो दधातु नः १ स्वस्ति द्यावापृथिवी सुचेतुना स्वस्तये वायुमुपब्रवाम
हे सोमं स्वस्ति भुवनस्य यस्पतिः बृहस्पतिं सर्वगणं स्व० स्वस्तये स्वस्तय आ
दित्यासो भवन्तु नः २ विश्वेदेवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये
देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ३ स्वस्ति मित्रा
वरुणा स्वस्ति पथ्ये रेवति स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ४
स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव पुनर्ददताघ्नता जानता सङ्गमेम
हि ५ स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानाम् असुरघ्नमि
न्द्रसखं समत्सु बृहद्यशो नावमिवारुहेम ६ अंहोमुचमाङ्गिरसं गयं च स्व
स्त्यात्रेयं मनसा च तार्क्ष्यं प्रयतपाणिः शरणं प्रपद्ये स्वस्ति सम्बाधेष्वभयं
नो अस्तु शुभं माङ्गल्यं दधातु ७ ॐ आ नो भद्राः क्रतवो यन्तु विश्वतो
दब्धासो अपरीतास उद्भिदः देवा नो यथा सदमिद्वृधे असन्नप्रा
युवो रक्षितारो दिवे दिवे १ देवानां भद्रा सुमतिरृजूयतां देवानां ० रातिरभि रामः
नो निवर्त्तताम् देवानां ० सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे २ १

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नान्पूर्वयानिविदाहूमहेवयंभगं मित्रमदितिंदक्षमस्रिधम् अर्यमणंवरुणं सो
ममश्विना सरस्वतीनः सुभगामयस्करत् २ तन्नोवातोमयोभुवातुभेषजंतन्माता
पृथिवीतत्पितानोद्यौः तद्ग्रावाणः सोमसुतोमयोभुवस्तदश्विनाशृणुतंधिष्ण्यायुवम् ३
तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयम् पूषानोयथावेदसा
मसद्वृधेरक्षितापायुरदब्धः स्वस्तये ४ स्वस्तिनइन्द्रोवृद्धश्रवाः स्वस्तिनः
पूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ६ पृष
दश्वामरुतः पृश्निमातरः शुभंयावानोविदथेषुजग्मयः अग्निजिह्वामनवः सूरचक्ष
सोविश्वेनोदेवाअवसागमन्निह ७ ॐ भद्रंकर्णेभिः शृणुयामदेवाभद्रंपश्येमाक्ष
भिर्यजत्राः स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहिदेवहितंयदायुः [illegible]
स्तु २ इतिस्वस्तिवाचनम् अथगणेशपूजा दीपंप्रज्वाल्य कर्मकुर्य्यात् कर्त्ताकर्म
दिनेप्रातरुत्थाय स्नात्वा अहतेधौतेवाससीपरिधाय नित्यकर्मसमाप्य सर्वक
र्मणः प्रधानभूतं गणेशपूजनंकुर्य्यात् प्रथमंविघ्नहनमेत् शुक्लाम्बरधरंविष्णुं
शशिवर्णंचतुर्भुजं प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशान्तये लाभस्तेषांजयस्ते
षां कुतस्तेषांपराजयः येषामिन्दीवरश्यामो हृदयस्थोजनार्दनः अथगणेशध्या
नम् वक्रतुण्डमहाकाय सूर्यकोटिसमप्रभ अविघ्नंकुरुमेदेव सर्वकार्ये
षुसर्वदा इतिनमस्कृत्य अर्घस्थापनंकुर्य्यात् चन्दनेनभूमौ त्रिकोणंकृत्वा चतुरस्र
मण्डलंलिखित्वा गन्धाक्षतपुष्पैःसम्पूज्य अर्घंसंस्थाप्य जलेनापूर्य गंगेचयमु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुने चैव गोदावरि सरस्वति नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिं कुरु इत्यंकुशमुद्र
यातीर्थमावाह्य गंधाक्षतपुष्पादि निक्षिप्य प्रथमं सूर्यार्घं दद्यात् ताम्रपात्र्यां
सूर्यं लिखित्वा ध्यानम् अरुणोऽरुणपंकजे निषण्णः कमलेऽभीतिवरौ करैर्दधानः
स्वरुचाहितमण्डलस्त्रिनेत्रो रविराकल्पशताकुलोऽवतान्नः इति ध्यात्वा अर्घं द
द्यात् एहि सूर्य सहस्रांशो तेजोराशे जगत्पते अनुकंप्य मां भक्त्या गृहाणार्घं दिवा
कर इत्यर्घं दत्वा सर्षपाक्षतैर्भूतोत्सारणं कुर्यात् अपसर्पंतु ते भूता ये भूता भू
मिसंस्थिता ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया अपक्रामंतु भूतानि पिशाचाः
सर्वतोदिशं सर्वेषामविरोधेन ब्रह्मकर्म समारभे पाखंडकारिणो भूता भूमौ ये चा
न्तरिक्षगा दिविलोके स्थिता ये च ते नश्यंतु शिवाज्ञया निर्गच्छंतु भूतानि वर्त्य
दद्यात्स्वधामतः इति मंत्रैर्भूतोत्सारणं कुर्यात् वामपार्ष्णिघातत्रयेण छोटिकाभि
स्तालत्रयेण च सर्वान्विघ्नानुत्सार्य आधारशक्तये पृथिव्यै नमः कमलासनाय
नमः इत्यासनं सम्पूज्य पुनरर्घं संस्थाप्य जलेनापूर्य गंधाक्षतपुष्पादि निक्षि
प्य तेन जलेनात्मानं गणेशपूजासामग्रीं संप्रोक्ष्य प्राणायामं विधाय तिलकु
शयवजलान्यादाय पूजासंकल्पं कुर्यात् ॐ विष्णुः ३ नमः परमात्मने श्रीपुरा
णपुरुषोत्तमाय ॐ तत्सदद्य पृथिव्यां जम्बूद्वीपे भरतखंडे आर्यावर्ते पुण्य
क्षेत्रे हिमवत्पूर्वैकदेशे ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे कृतत्रेता-
द्वापरान्ते सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगस्य प्रथमचरणे अमुक

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दानामध्ये अमुकनामसम्वत्सरे अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अ
मुकपुण्यतिथौ अमुकगोत्रोऽमुकराशिरमुकशर्म्माहं श्रुतिस्मृति पुराणोक्त फलप्राप्त
ये करिष्यमाणामुककर्म्मनिमित्तकं निर्विघ्नतासिद्ध्यर्थं श्रीभगवतो गणेश्वरस्य षोडशो
पचारैः पूजनंकरिष्ये इतिसंकल्प्य पीठपूजनं कुर्यात् ॐ तीव्रायै नमः ॐ ज्वालिन्यै नमः
ॐ नन्दायै नमः ॐ भोगदायै नमः ॐ कामरूपिण्यै नमः ॐ सत्यायै नमः ॐ उग्रायै नमः
ॐ तेजोवत्यै नमः ॐ मध्ये विघ्नविनाशिन्यै नमः ॐ सर्वशक्तिकमलासनाय नमः ध्यानं
एकदन्तं शूर्प्पकर्णं गजवक्त्रं चतुर्भुजं पाशांकुशधरं देवं ध्यायेत्सिद्धिविनायकं आवा
हनं विनायक नमस्तेस्तु उमामलसमुद्भवः इमां मया कृतां पूजां गृहाण स्कन्द नमः आ
सनं नानारत्नसमायुक्तं मुक्ताहारविभूषितं स्वर्णसिंहासनं चारु प्रीत्यर्थं प्रतिगृह्य
ताम् पाद्यं गौरीप्रियनमस्तेस्तु शंकरप्रियसर्वदा भक्त्या पाद्यं मया दत्तं गृहाण प्रणत
प्रिये अर्घं व्रतमुद्दिश्य देवेश गन्धपुष्पाक्षतैर्युतम् गृहाणार्घं मया दत्तं सर्वसिद्धिप्रदो
भव स्नानम् स्नानं पञ्चामृतैर्देव गृहाण गणनायक अनाथनाथ सर्वज्ञ गीर्वाणपरि
पूजित ॐ गणानान्त्वा गणपति हवामहे प्रियाणान्त्वा प्रियपति हवामहे नि
धीनान्त्वा निधिपति हवामहे वसो मम आहमजानि गर्भधमा त्वमजासि गर्भधम्
इति मन्त्रेण स्नानम् स्नानान्ते आचमनीयं च दत्वा वस्त्रम् रक्तवस्त्रयुगं देव देवाङ्गस
दृशप्रभम् भक्त्या दत्तं गृहाणेदं लम्बोदर हरप्रिय अजोपवीतम् राजतं ब्रह्मसूत्रं च का
ञ्चनस्योत्तरीयकम् गृहाण चारु सर्वज्ञ भक्तानां सिद्धिदायक गन्धम् गंधं कर्पूर सं
युक्तं दिव्यं चन्दनमुत्तमम् विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम् अक्षताः अक्ष

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग॰ पू॰

नाधवलान्देव सगन्धर्वपूजित सर्वदेवनमस्कार्य्य गृहाणामदनुग्रहात् पुष्पाणिसु
गंधीनि सुपुष्पाणि मालत्यादीनि वैप्रभो मयानीतानि पूजार्थं पुष्पाणि प्रतिगृह्य
ताम् धूपः दशाङ्गं गुग्गुलं धूपं सुगन्धिं सुमनोहरम् उमासुतनमस्तुभ्यं धूपं मेप्र
तिगृह्यताम् दीपः गृहाणमङ्गलं दीपं घृतवर्त्तिसमन्वितम् दीपं ज्ञानप्रदं देव रुद्रप्रि
यनमोस्तुते नैवेद्यम् सगुडान्सघृतांश्चैव मोदकान् घृतपाचितान् नैवेद्यं सफलं दत्तं
गृह्यतां विघ्ननाशन इत्येकं मोदकं विनायकाय दद्यात् भूषणार्थे द्रव्यं समर्प्य मू
लमन्त्रेणाजपं विधाय समर्प्य ताम्बूलम् पूगीफलसमायुक्तं नागवल्लीदलान्वित
म् कर्पूरादिसमायुक्तं ताम्बूलं प्रतिगृह्यताम् दशमोदकदानसंकल्पः अद्येत्यमुको
हं अमुककर्मनिमित्तकं गणेशप्रीतये इमान्दशमोदकान् दक्षिणासहितान् ब्राह्म
णाय ददास्ये ॐ तत्सत् न मम ब्राह्मणं गन्धाक्षतपुष्पैः सम्पूज्य मोदकदानमन्त्रः
विघ्नेशविप्ररूपेण गृहाण दशमोदकान् दक्षिणाघृतताम्बूल गुडयुक्तान्समस्तु
द प्रतिग्रहमन्त्रः दाता विघ्नेश्वरो देवो गृहीता सर्वविघ्नराट् तस्मादिदं मयादत्तं
परिपूर्णं तदस्तु मे प्रार्थना विनायकनमस्तुभ्यं सततं मोदकप्रिय अविघ्नं कुरु
मे देव सर्वकार्येषु सर्वदा अथ दूर्वाङ्कुरपूजा ॐ गणाधिपनमस्तेस्तु ॐ उमापु
त्रनमस्तेस्तु ॐ अघनाशननमस्तेस्तु ॐ विनायकनमस्तेस्तु ॐ ईशपुत्रनमस्तेस्तु
ॐ सर्वसिद्धिप्रदायकनमस्तेस्तु ॐ एकदन्तनमस्तेस्तु ॐ इभवक्त्रनमस्तेस्तु ॐ मू
षकवाहननमस्तेस्तु ॐ कुमारगुरवे तुभ्यं नमस्तेस्तु ॐ चतुर्थीसिद्धमोस्तुते ॐ का

राम: २

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एडात्काण्डात्प्ररोहन्ती परुषः परुषस्परि एवानो दूर्वे प्रतनु सहस्रेण शतेन च इति दू
र्वां समर्प्य नीराजनं कुर्यात् अन्तस्तेजो बहिस्तेज एकीकृत्यामितप्रभम् आरार्त्तिक-
मिदं देव गृहाण मदनुग्रहात् ॐ अग्निर्ज्योति ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्यो
तिः सूर्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा-
सूर्यो ज्योति ज्योतिः स्वाहा इति नीराज्य पुष्पाञ्जलिः सुमुखश्चैकदन्तश्च क
पिलो गजकर्णकः लम्बोदरश्च विकटो विघ्ननाशो विनायकः धूम्रकेतुर्गणाध्यक्षो भा
लचन्द्रो गजाननः द्वादशैतानि नामानि यः पठेच्छृणुयादपि विद्यारम्भे विवाहे च प्रवे
शे निर्गमे तथा संग्रामे संकटे चैव विघ्नस्तस्य न जायते विघ्नवल्ली कुठाराय श्रीगण
धिपतये नमः अविरलमदजलनिवहं भ्रमरकुलानीकसेवितकपोलम् अभिमत
फलदातारं कामेशं गणपतिं वन्दे इति नमस्कृत्य दक्षिणासंकल्पं कुर्यात् अद्येह
त्यादि देशकाल संकीर्त्तनान्ते अमुकोहं अमुककर्म्मणि निर्विघ्नतासिद्ध्यै भगवतो
गणेशस्य पूजाकर्म्मणः साङ्गतार्थं इमां दक्षिणां ब्राह्मणाय ददे ॐ तत्सत् न
मम इति दक्षिणां दत्वा ॐ गणानान्त्वा गणपति ᳪ हवामहे प्रियाणान्त्वा प्रिय
पति ᳪ हवामहे निधीनान्त्वा निधिपति ᳪ हवामहे वसो मम आहमजानि गर्ब्भ
धमात्वमजासि गर्ब्भधम् इति मन्त्रार्घं दद्यात् इति गणेशपूजा अथ मातृपू
जा सर्वकर्म्मसु प्रधानसंकल्पानन्तरं मातृपूजनं कुर्यात् पीठे पिष्टातकेन षोडशमा
तॄर्लिखित्वा गोमयेन दूर्वाभिर्विभूष्य अर्घं संस्थाप्य पूजासंकल्पं अद्येहत्या-

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दि देशकालौ संकीर्त्य अमुकगोत्रो अमुकराशिरमुकशर्म्माहं अमुककर्म्मणः पूर्वा
ङ्गत्वेन सर्वाभ्युदयप्राप्तये पीठेल्लिखितानां गणपति सहितगौर्यादिषोडशमातृ
णां पूजनं करिष्ये एतन्तेति प्रतिष्ठा ॐ एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्म
णे तेन यज्ञ मवतेन यज्ञ पतिं तेन मामव मनोजूतिर्जुषता माज्यस्य बृहस्पतिर्यज्ञमि
मं तनोत्वरिष्टं यज्ञ ७ समिमं दधातु विश्वेदेवास इह मादयंतामों प्रतिष्ठ ॐ भूर्भुवः
स्वः गणपति सहित गौर्यादिषोडश मातरः इहागच्छन्तु इह तिष्ठन्तु एवं प्रतिष्ठि
ता वरदा भवन्तु अथ ध्यानं गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना
स्वधा स्वाहा मातरो लोकमातरः धृतिः पुष्टिस्तथा तुष्टि रात्मनः कुलदेवता इति ध्या
त्वा नाममंत्रेण पूजनं ॐ गणपतये नमः ॐ गौर्य्यै नमः ॐ पद्मायै नमः ॐ शच्यै नमः
ॐ मेधायै नमः ॐ सावित्र्यै नमः ॐ विजयायै नमः ॐ जयायै नमः ॐ देवसेनायै नमः
ॐ स्वधायै नमः ॐ स्वाहायै नमः ॐ मातृभ्यो नमः ॐ लोकमातृभ्यो नमः ॐ
धृत्यै नमः ॐ पुष्ट्यै नमः ॐ तुष्ट्यै नमः ॐ आत्मन कुलदेवतायै नमः इति नाममन्त्रैः
आवाहनं आसनं पाद्यं अर्घ्यं स्नानं वस्त्रं गंधं अक्षताः पुष्पाणि धूपं दीपं नैवेद्यं
भूषणाद्युपचारं समर्प्य नाममन्त्रेणाञ्जलिं कृत्वा समर्प्य वसोर्द्धारा संकल्पः अद्येह
अमुकोहं अमुककर्म्मणि सर्वाभ्युदयप्राप्तये गणपति सहित गौर्यादिषोडशमा
तॄणामुपरि गुडसर्पिर्भ्यां वसोर्द्धाराः पातयिष्ये मन्त्रः आज्यमेतास्मिन्देवानाम
नन्तमेक त्वात्मकं ततो मातॄः समुद्दिश्य घृतधारां ददाम्यहं ॐ वसोः पवित्रमसि श

राम:
४

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण-
सुप्वा कुड्यस्तम्भसंलग्ना मातृगणमुपरिस्थिताः कार्य्येत्पंचवतिस्त्रोवासप्तवादश
रवस्थिताः इतिमन्त्रैः तिस्रः पंचसप्त धारापातयित्वा तदंके घृतेन लोटधृत्वा नीराजनं
कुर्य्यात् पुष्पाञ्जलिः षोडशमातृणां स्तोत्रं पठेत् हलात्मजजनुर्वाहो वारणास्य
महोदरे प्रसन्ना भव महत्यंत्वं गौरिपुत्र नमोस्तुते १ चन्द्रास्ये चन्द्रकलया विभूषित
कपालिके प्रसन्ना भव महत्यंत्वं त्रिविगौरि नमोस्तुते २ दुग्धोदसम्भवे भव्ये सरोजोप
रिसंस्थिते प्रसन्ना भव महत्यंत्वं हरिपद्मे नमोस्तुते ३ सदा सौभाग्यसंयुक्ते मंदारकु
सुमार्चिते प्रसन्ना भव महत्यंत्वं सिन्दुकान्ते नमोस्तुते ४ शुक्लाम्बरधरे देवि वीणापु
स्तकधारिणि प्रसन्ना भव महत्यंत्वं सरस्वति नमोस्तुते ५ सौभाग्ययुक्ते सौभाग्य-
दायिके दुःखवर्जिते प्रसन्ना भव महत्यंत्वं विजये त्वं नमोस्तुते ६ चम्पकगुम्भपद्मेन-
राजमानेऽर्कसन्निभे प्रसन्ना भव महत्यंत्वं भाजये त्वं नमोस्तुते ७ अनेकपदसंयुक्ते
नानाशास्त्रसमन्विते प्रसन्ना भव महत्यंत्वं देवसेने नमोस्तुते ८ पितॄणां वल्लभे शा
न्ते शान्तियुक्ते शुभंकरे प्रसन्ना भव महत्यंत्वं स्वधे देवि नमोस्तुते ९ सप्तार्चिवल्लभे
सप्त स्वरसंतानसंयुते प्रसन्ना भव महत्यंत्वं स्वाहे देवि नमोस्तुते १० वराभयकरा भव्याः
प्रसन्नमुखपंकजाः सुप्रसन्ना प्रजावती महत्यं ताभ्यो नमो नमः ११ रक्षिकाः सर्वलोकानां
नित्यं लोकमातरः सुप्रसन्ना प्रजावती महत्यं ताभ्यो नमो नमः १२ धृतिसंजननिके धैर्य
युक्ते सर्वसमर्चिते प्रसन्ना भव महत्यंत्वं धृतिदेवि नमोस्तुते १३ सर्वसंपुष्टिजननिके

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्णकामसमन्विते प्रसन्नाभवमह्यंत्वं पुष्टिदेविनमोस्तुते १४ सर्वसंतोषजनिके मन्तो
षेणासमन्विते प्रसन्नाभवमह्यंत्वं तुष्टिदेविनमोस्तुते १५ कुलदेविमहाभागे कुलवृद्धि
करीनकुले प्रसन्नाभवमह्यंत्वं कुलदेविनमोस्तुते १६ गौरीपद्माशचीमेधा सावित्री
विजयाजया देवसेनास्वधास्वाहा मातरोलोकमातरः १७ धृतिःपुष्टिस्तथातुष्टिरात्म
नःकुलदेवता गणेशेनाधिकाह्येता वृद्धौपूज्याश्चषोडशः १८ ब्रह्माणीकमलेन्दु
सौम्यवदना माहेश्वरीलीलया कौमारीरिपुदर्पनाशनकरी चक्रायुधावैष्णवी वारा
हीघनघोरघर्घरमुखी चैन्द्रीचवज्रायुधा चामुण्डागणनाथरुद्रसहिता रक्षंतुनोमा
तरः १९ इतिपुष्पाञ्जलिंसमर्प्य दक्षिणासंकल्पः अद्येहेत्यादि अमुकगोत्रो अ
मुकराशिरमुकशर्म्माहं अमुककर्मनिमित्तकं सर्वाभ्युदयप्राप्तये गणपतिसहित
गौर्य्यादिषोडशमातृणां पूजाकर्मणःसाद्गुण्यार्थं इमांदक्षिणां ब्राह्मणायदास्ये
तत्सत् इतिसंकल्प्य दक्षिणांदत्वा मंत्रपाठः ॐसमर्ध्येदेव्याधियासं दक्षिणा-
योहव्यसर्स मामआयुःप्रमोषीर्म्मा अहंतववीरं विदेयहितवेदविसहशि ॐ अम्बे
अम्बिके अम्बालिके नमानयतिकश्चन ससस्त्यश्वकःसुभद्रिकां कांपीलवासि
नीम् इतिपठित्वा मंत्राशिषंदद्यात् इतिमातृपूजा अथाभ्युदयिकश्राद्धं य
म्ब्रह्मवेदान्तविदोवदंतिपरंप्रधानंपुरुषंतथान्ये विश्वोद्गतेःकारणमीश्वरंवात
स्मैनमोविघ्नविनाशनाय अभीप्सितार्थसिद्ध्यर्थं पूजितोयःसुरैरपि सर्वविघ्नच्छि
देतस्मैगणाधिपतयेनमः इतिगणेशंनमस्कृत्य स्वदक्षिणभागेकर्मपात्रस्थाप

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नं भूमौ चंदनेन शंखचक्रं लिखित्वा आसनं दूर्वायवं आसने पात्रं पात्रे पवित्रं पवित्रे
स्थो वैष्णव्यौ शन्नोदेवीरितिजलं ॐ शन्नोदेवीरभिष्टय आपो भवन्तु पीतये शंय्यो
रभिःस्रवन्तु नः ॐ यवोसि यवयास्मद्द्वेषो यवयारातीः इतियवान् ॐ तिलोसि सो
मदेवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितॄंल्लोकान्प्रीणाहि नः स्वा
हा इतितिलान् गंधाक्षतपुष्पादि तूष्णीं निक्षिप्य तेनजलेनात्मानं नान्दीमुख
श्राद्धसामग्रीं च संप्रोक्ष्य प्राणायामं विधाय अपवित्रः पवित्रो वा सर्वावस्थां गतो
पि वा यः स्मरेत् पुंडरीकाक्षं स बाह्याभ्यंतरं शुचिः ॐ देवताभ्यो देवताभ्यो महायो
गिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ३ इतित्रिवारं पठित्वा सप्त
व्याधा दशार्णेषु मृगाः कालंजरे गिरौ चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे ते
पि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः प्रस्थिता दीर्घमध्वानं यूयं किमवसीद
थ श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरं मनसा च पितॄन्ध्यात्वा नान्दीश्रा
द्धं समारभेत् ॐ सोमस्य निविरसि विष्णोः शर्मासि शर्म यजमानस्येन्द्रस्य यो
निरसि सुसस्याः कृषीस्कृधी इतिमन्त्रेण दक्षिणाकर्षं यानिवीभौराप्स दू
र्वाभिर्दिग्बंधनं अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशं तथा बर्हिषदः पान्तु
याम्यां ये पितरस्तथा प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः विदिशश्च गणाः
सर्वे रक्षन्तु मे पिता रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः सर्वतश्चाधिपस्ते
षां यमो रक्षां करोतु मे तिला रक्षन्तु दितिजान् दर्भा रक्षन्तु राक्षसान् पंक्तिं वै याम त्रि-

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

योऽस्मि इति थिः सर्वरक्षकः भूद्वाराद्दक्षिणे दोषनिपाता दामाद्यादीनां पवित्रतास्तु अ
थ प्रतिज्ञासंकल्पः अद्येह स्थादिदेशकालौ संकीर्त्य अमुकगोत्राणां अस्मत्मातृ-
पितामही प्रपितामहीनां वसुरुद्रादित्यस्वरूपाणां नान्दीमुखीनां तथा अमुक
गोत्राणां अस्मत्पितृपितामह प्रपितामहानां अमुकामुकदेवानां वसुरुद्रादित्य
स्वरूपाणां नान्दीमुखानां तथा अमुकगोत्राणां अस्मत्मातामह प्रमातामह वृद्ध
प्रमातामहानां अमुकामुकदेवानां वसुरुद्रादित्यस्वरूपाणां नान्दीमुखानां प्रीतये
अमुककर्मनिमित्तकं सत्यवसुसंज्ञक विश्वेदेवापूर्वकं संक्षिप्तसंकल्प विधिना
नान्दीमुख श्राद्धमहं करिष्ये ॐ कुरुष्व उत्तरतः द्वाप्या आसनानि दद्यात् दूर्वात्रयं
गृहीत्वा अद्येह अमुकगोत्र अस्मन्मात्रादित्रय तथा पित्रादित्रय तथा अमुक
गोत्र अस्मन्मातामहादित्रय श्राद्धसम्बन्धिनां सत्यवसुसंज्ञकानां विश्वेषां
देवानां इदमासनं वो नमो वृद्धिः स्थिये तथा अमुकगोत्राणां अस्मत्पितृपितामह
प्रपितामहानां अमुकामुकदेवानां वसुरुद्रादित्यस्वरूपाणां नान्दीमुखानां इद
मासनं वो नमो वृद्धिः स्थिये तथा अमुकगोत्राणां अस्मन्मातामह प्रमातामह
वृद्धप्रमातामहानां अमुकामुकदेवानां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां
नान्दीमुखानां इदमासनं वो नमो वृद्धिः स्थिये इत्यासनानि दत्वा सामगानां आ
सनदाने चतुर्थी कार्य्या ततः क्षेमेणापूजनमनेन मन्त्रेण ॐ सप्त ऋषयः प्रति
हिताः शरीरे सप्त रक्षन्ति सदमप्रमादं सप्तापः स्वपतो लोकमीयुः तत्र जागृतो अ रामः ६

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वपूज्जो सत्रसदो चदेवो इतिगंधाक्षतपुष्पैः पूजनम् ॐ सत्यवसुसंज्ञकेभ्यो वि
श्वेभ्यो देवेभ्यो नमः मातृपितामही प्रपितामहीभ्यो नमः पितृपितामह प्रपितामह
हेभ्यो नमः मातामह प्रमातामह वृद्धप्रमातामहेभ्यो नमः इतिसम्पूज्य धूपदीप
संकल्पः अद्येह अमुकगोत्रास्मन्मात्रादित्रय तथापित्रादित्रय तथा अमुक
गोत्रासमातामहादित्रय श्राद्धसम्बन्धिनः सत्यवसुसंज्ञक विश्वेदेवा आस-
नार्चनविधौ इमानिगंधाक्षत पुष्पधूपदीपनैवेद्य भूषणादीनि यथाविभागंवो
नमो वृद्धिः २ स्त्रियै तथा अमुकगोत्रा अस्मन्मातृपितामही प्रपितामह्यः अमु
काअमुकीदेव्यः नान्दीमुख्यः तथा अमुकगोत्रा अस्मत्पितृपितामह प्रपितामहा
अमुकामुकदेवा वसुरुद्रादित्यस्वरूपा नान्दीमुखाः तथा अमुकगोत्रा अस्म
न्मातामह प्रमातामहवृद्धप्रमातामहा अमुकामुकदेवाः सपत्नीका वसुरुद्रादि
त्यस्वरूपा नान्दीमुखा आसनार्चनविधौ इमानि गंधाक्षत पुष्पधूपदीप नैवेद्य
भूषणादीनि यथाविभागंवो नमो वृद्धिः २ स्त्रियै आसनार्चनविधिः परिपूर्णोस्तु
अस्तुपरिपूर्णः गंधादिदानाचमनं कृत्वा आमान्नंदधिघृतसहितं चतुर्द्धावि
भज्य आसेनाग्रेसंस्थाप्य संकल्पः अद्येह अमुकगोत्रास्मन्मात्रादित्रय
तथापित्रादित्रय तथा अमुकगोत्रास्मातामहादित्रय श्राद्धसम्बन्धिभ्यः सत्य
वसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य इदमामान्नं दधिघृतजलसहितं यथाविभा
गंवो नमो वृद्धिः २ स्त्रियै तथा अमुकगोत्राभ्यः अस्मन्मातृपितामही प्रपितामहीभ्यः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

वृ॰ श्रा॰ ७

अमुकामुकीदेवीभ्यो वसुरुद्रादित्यस्वरूपाभ्यो नान्दीमुखीभ्य इदमामान्नं द
धिघृतजल सहितं यथाविभागं वो नमो वृद्धिः स्विये तथा अमुकगोत्रेभ्यो अ
स्मन्मातामह प्रमातामह वृद्धप्रमातामहेभ्यो अमुकामुकदेवेभ्यो सपत्नीके
भ्यः वसुरुद्रादित्यस्वरूपेभ्यो नान्दीमुखेभ्य इदमामान्नं दधिघृतजलसहि
तं यथाविभागं वो नमो वृद्धिः स्विये इति संकल्प्य अन्नपूजनम् सप्तव्रतमय
व्रतिमन्त्रेण ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्यां
शूद्राय चार्याय च स्वाय चारणाय च प्रियो देवानां दक्षिणायै दातुरिह
भूयासमयं मे कामः समृध्यताम् इत्यन्नपूजनं कृत्वा दक्षिणासंकल्पः देश
द्रव्यं सम्प्रोक्ष्य सम्पूज्य अद्येहेत्यादि अमुकगोत्राणां अस्मन्मातृपितामही
प्रपितामहीनां अमुकामुकीदेवीनां वसुरुद्रादित्यस्वरूपाणां तथा अमुक
गोत्राणां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकदेवानां वसुरुद्रादि
त्यस्वरूपाणां तथा अमुकगोत्राणां अस्मन्मातामह प्रमातामह वृद्धप्रमाता
महानां अमुकामुकदेवानां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां नान्दी
मुखानां प्रीतये अमुककर्मनिमित्तक सत्यवसुसंज्ञक विश्वेदेवा पूर्वक
नान्दीमुखश्राद्धकर्मणः साङ्गफलप्राप्त्यर्थं साद्गुण्यार्थं च मातॄणां पितॄ
णां मातामहानां विश्वेदेवानां च प्रीतये इमां दधिद्राक्षामलक निष्क्रयिणीं द एषः
क्षिणां यथाविभागं वो नमो वृद्धिः स्विये इति संकल्प्य स्वस्तिलकम् मत्स्यान् ७

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ध्यानसम्पन्नाः सर्वदास्मत्कुलेषु पितृमातृपक्षाश्चैव सन्त्वस्मत्कुलेजानवाः विद्याम्
पूजनम् आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च प्रयच्छन्तु तथा राज्यं नृणां
प्रीताः पितामहाः आयुः पुत्रान्यशः स्वर्गं कीर्त्तिं पुष्टिं बलं श्रियं पशून्सुखं धनं धा
न्यं प्राप्नुयात्पितृपूजनात् ततः ॐ देवताभ्यो देवताभ्यो महायोगिभ्य एव च नमः
स्वाहायै स्वाहायै नित्यमेव नमोनमः २ सप्तव्याधा इति च पठित्वा ततः अमुक
कर्म्मणः पूर्वाङ्गत्वेन नान्दीमुखाभ्युदयिक श्राद्धं विसर्जयेत् इदं श्राद्धं देवाही
मं कालहीनं श्रद्धाहीनं भावनाहीनं दक्षिणाहीनं वाक्यहीनं यत्कृतं तत्सकलं
गमस्तु यन्नकृतं तत् श्रीविष्णोः प्रसादात् ब्राह्मणानां वचनात् सर्वं परि
पूर्णमस्तु अस्तु परिपूर्णम् आसनादुत्थाय नीवीं विसृज्य कर्मपात्रं भ्राम
यित्वा विसृज्य आचम्य यस्यस्मृत्येति पठित्वा अच्युताय नमः २ ब्राह्मणं
सम्पूज्य दक्षिणां दद्यात् इत्याभ्युदयिक श्राद्धम् अथ पुण्याहवाचनम्
चतुरो ब्राह्मणानुदङ्मुखोपस्थाप्य अर्घं संस्थाप्य संकल्प अद्येहेत्यादिदेश
कालौ संकीर्त्य अमुकगोत्रो अमुकशर्माहं अमुककर्मणि सर्वाभ्यु
दयप्राप्तये ब्राह्मणद्वारा पुण्याहं वाचयिष्ये तदङ्गतया चतुर्णां ब्राह्मणानां पू
जनपूर्वकं वरणं च करिष्ये इति संकल्प्य ब्राह्मणेभ्यो अर्घं दद्यात् मन्त्रः पू
मिदं वा अग्रजन्मासि त्वं विप्र पूज्योसि नमः प्रत्यक्षो यज्ञपुरुष अर्घोयं प्रतिगृह्य-
तास्म् इत्यर्घं दत्वा पूजयेत् गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ईश्व

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रीसर्वभूतानां तामिहोपह्वये श्रियम् नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपाद
क्षिशिरोरुबाहवे सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः न
मो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च जगद्धिताय कृष्णाय गोविन्दाय न
मो नमः इति गंधाक्षत पुष्पादिभिः सम्पूज्य वरणं कुर्यात् एभिर्गंधाक्षत पु
ष्पपूगीफलद्रव्यैः अमुककर्मणि मया ... प्राप्ते पुण्याहवाचनार्थं
ब्राह्मणं त्वामहं वृणे वृतोस्मि इति प्रत्युक्तिः एवं क्रमेण चतुर्णां ब्राह्मणानां
वरणं कृत्वा सर्वेभ्यो ञ्जलिं बध्वा मन्त्रं पठेत् ॐ ब्रह्म यज्ञानं प्रथमं पुर
स्ताद्विसीमतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च
योनिमसतश्च योनिम् ... विवः ॐ बृहस्पते अति यदर्यो अर्हाद्युम
द्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धे
हि चित्रम् ब्राह्मणं पुण्यं महर्द्धं च सृष्ट्युत्पादनकारकम् वेदवृक्षोद्भ
वं पवित्रं तं पुण्याहं ब्रुवन्तु नः भो ब्राह्मणाः मम गृहे पुण्याहं भवन्तो ब्रु
वन्तु ॐ पुण्याहं २ ॐ पुनन्तु मां देवजनाः पुनन्तु मनसा धियः पुनन्तु वि
श्वा भूतानि जातवेदः पुनीहि माम् स्वस्ति यथो अविनाशाख्या लोकक
ल्याणसिद्धिदा विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः २ भो ब्राह्मणाः
मम गृहे स्वस्ति भवन्तो ब्रुवन्तु २ ॐ स्वस्ति २ ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वस्तिनः पूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्यो ऽरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधा
तु सागरस्यतु याऋद्धिर्महालक्ष्म्यादिभिः कृताः सम्पूर्णास्कप्रभावाच तांच
ऋद्धिं ब्रुवन्तु नः भो ब्राह्मणा मम गृहे ऋद्धिर्भवन्तो ब्रुवन्तु २ ॐ ऋद्ध्यताम् २
ॐ सत्रस्य ऋद्धिरस्य गन्मज्योतिरमृता अभूम दिवं पृथिव्या अध्यारुहा
मा विदाम देवा ॐ स्वर्ज्योति वैधृतौ च व्यतीपाते संक्रान्तौ राहुपर्वणि या
दृवृद्धिर्मयाप्राप्ति तांच वृद्धिं ब्रुवन्तु नः भो ब्राह्मणा मम गृहे वृद्धिर्भवन्तो ब्रुवन्तु
ॐ वृद्ध्यताम् २ ॐ ज्यैष्ठ्यञ्च मे ऽ आधिपत्यञ्च मे मन्युश्च मे भामश्च मे मश्च
मे ऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघि
मा च मे वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् पृथिव्यामुद्धृतायान्तु यत्क
ल्याणं पुराकृतम् ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः भो ब्राह्मणा
मम गृहे कल्याणं भवन्तो ब्रुवन्तु २ ॐ कल्याणं २ ॐ यथेमां वाचं कल्या
णीमावदानि जनेभ्यः ब्रह्मराजन्याभ्याँ शूद्राय चार्याय च स्वाय चार
णाय च प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यताम्
सहित्येतश्चभक्त्मा आश्रीर्विष्णुगृहस्थिता सर्वसौख्यवती लक्ष्मीस्तांश्रि
यं च ब्रुवन्तु नः भो ब्राह्मणा मम गृहे श्रीरस्त्विति भवन्तो ब्रुवन्तु २ ॐ श्रीरस्तु २
ॐ मनसः काममाकूतिं वाच सत्यमशीमहि पशूनाँ रूपमन्नस्य मयि श्रीः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रयतां पक्षः श्रद्धा मा विपन्नोच यथा शान्तिर्धरातले तथा च देवदेवानां शान्तिं
न्तिं कुर्वन्तु नः भो ब्राह्मणा मम गृहे शान्तिं भवन्तो ब्रुवन्तु २ ॐ शान्तिः ॐ द्यौः शा
न्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः
शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा
शान्तिरेधि सा शान्तिर्भवतु ॐ विश्वानि देव सवितर्दुरितानि परासुव यद्भद्रं तन्न
आसुव ब्राह्मणानां मन्त्राशिषः सफलाः सन्तु पुण्याहवाचनप्रसादोऽस्तु इति
पठित्वा तिलकं कृत्वा यजमानहस्ते आशीर्वादं दद्युः इति पुण्याहवाच
नम् अथ आचार्यब्रह्मवरणविधिः अथ संस्थाप्य संकल्पः अद्येहे
हः अमुकोऽहं अमुककर्मनिमित्तकहोमकर्मणि श्रीपरमेश्वरप्रीत्यर्थं
अग्निस्थापनं करिष्ये इति संकल्प्य अथातो गृह्यस्थालीपाकानां कर्म
स्थण्डिले कुण्डे वा वेद्यां शुद्धायां भूमौ त्रिभिर्दर्भैः परिसमूहनं गोमयोदके
नोपलेपनम् स्रुवादिना खड्गाकृतिनास्फेन लेखनम् तस्मात् स्रुवेणप्रा
गग्रान्तिका रेखाः कृत्वा अनामिकाङ्गुष्ठाभ्यां यथोल्लिखिताभ्यो र
सान्नः पांसून् उद्धृत्य ईशानकोणे निक्षिपेत् आर्णिकोदकेन कमण्डलूदके
नाभ्युक्षणम् अग्निमुपसमाधाय ताम्रपात्रस्थमग्निं प्रणयेत् इति पंच
भूसंस्कारान् कृत्वा ताम्रपात्रस्थमग्निं वेद्यां स्वाभिमुखं स्थापयेत् ॐ रामः
९

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्निंदूतंपुरोदधे हव्यवाहमुपब्रुवे देवाँ३ आसादयादिह इत्यग्निं संस्थाप्य
आचार्यब्रह्मणोर्वरणंकुर्यात् अथहोमेकोहं अमुककेनिमित्तकेहोम
कर्मणि आचार्यब्रह्मणोः पूजनपूर्वकंवरणंकरिष्ये भूमिर्द्दिवाग्रत्वर्घं
दत्वा गंधद्वारेतिगंधविलेपनंकृत्वा नमोस्त्वनन्तायेति अक्षतपुष्पैः सम्पूज्य
वरणसामग्रींगृहीत्वा रुचिरंगंधाक्षत पुष्पपूगीफलद्रव्य यज्ञोपवीतपुष्प
मालावासोलङ्कारादिभिः करिष्यमाणामुकहोमकर्मणि आचार्यक
र्मकर्तुं आचार्यत्वेन त्वामहंवृणे वृतोस्मि आचार्यंप्रार्थयेत् आचार्य
स्तु यथास्वर्गे शक्रादीनांबृहस्पतिः तथात्वंममयज्ञेस्मि आचार्योभवसु
व्रतः अस्ययज्ञस्यनिष्पत्त्यै भवन्तोभ्यर्थितोमया सुप्रसन्नेनकर्त्तव्यं
शान्तिकंविधिपूर्वकम् अस्ययज्ञस्यहोमकर्मणि त्वमेव आचार्योभ
व अहंभवामीतिप्रत्युक्तिः तथा अमुकहोमकर्मणि कृताकृतावेक्षण
य ब्रह्मकर्मकर्तुं ब्रह्मत्वेनत्वामहंवृणे वृतोस्मीतिप्रत्युक्तिः यथाचतु
र्मुखोब्रह्मासर्ववेदधरोविभु तथात्वंममयज्ञेस्मि ब्रह्माभवद्विजोत्तमः
अस्ययज्ञस्यनिष्पत्त्यै अस्यअमुकस्यहोमकर्मणि त्वमेवब्रह्माभव अहं
भवामीतिप्रत्युक्तिः इतिवरणंविधाय अग्नेरीशानकोणेशास्त्रविधिनाकलशं
संस्थाप्य अव्रणंताम्रादिधातुविनिर्मितं मृण्मयंवा वह्निर्दक्षतःचन्द

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नभूमितं वस्त्राच्छन्नं कलशपात्रं सप्तधान्योपरि स्थापयेत् प्रथमं भूमिस्पर्शः
ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् पिपृतां नो भरीमभिः अथ यवप्र
क्षेपः ॐ ओषधयः समवदन्त सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणस्त
ꣳ राजन्पारयामसि अथ पात्रस्थापनम् ॐ आजिघ्र कलशं मह्या त्वा विश
न्त्विन्दवः पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा
विशताद्रयिः अथ जलेनापूरणम् ॐ वरुणस्योत्तम्भनमसि वरुणस्य
स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमा
सीद अथ कुशब्रह्मणो स्थापयेत् ॐ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी
जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धे
नुर्वोढाऽनड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यज
मानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो ऽभिवर्षतु फलव-
त्यो न ॐ ओषधयः पच्यन्ताम् योगक्षेमो नः कल्पताम् ॐ ब्रह्मयज्ञा
नमिति मन्त्रेण च अथ गन्धम् ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषि
णीम् ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् अथ दूर्वा ॐ काण्डात्का-
ण्डात्प्ररोहन्ती परुषः परुषस्परि एवा नो दूर्वे प्रतनु सहस्रेण शतेन च अथ स
र्वौषधिहरिद्राद्या ॐ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा मनै
नु बभ्रूणामहꣳ शतं धामानि सप्त च अथ पूगीफलम् ॐ याः फलिनीर्या

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अफला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वंहसः अथ
दुग्धम् ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः पय
स्वतीः प्रदिशः सन्तु मह्यम् अथ दधि ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य
वाजिनः सुरभि नो मुखा करत्प्रण आयूंषि तारिषत् अथ घृतम् ॐ घृतवती
भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा द्यावापृथिवी वरुणस्य धर्म
णा विष्कभिते अजरे भूरिरेतसा अथ पञ्चपल्लवाः ॐ अश्वत्थे वो निषदनं
पर्णे वो वसतिष्कृता गोभाज इत्किलासथ यत्सनवथ पूरुषम् अथ सप्तमृदः
ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी यच्छा नः शर्म सप्रथाः अथ पञ्च
रत्नानि ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् दधद्रत्नानि दाशुषे अथ
हिरण्यं द्रव्यम्वा ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसी
त् स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम अथ वस्त्रम् ॐ
यदश्वाय वास उपस्तृणन्त्यधिवासं या हिरण्यान्यस्मै सन्दानमर्वन्तं प
ड्वीशं प्रिया देवेष्वा यामयन्ती अथ रक्तसूत्रवेष्टनम् ॐ युवा सुवासाः प
रिवीत आगात् स उ श्रेयान् भवति जायमानः तं धीरासः कवय उन्नयन्ति साध्यो
मनसा देवयन्तः अथ सोपरिधान्यपूर्णपात्रम् ॐ पूर्णा दर्वि परापत सुपूर्णा पुन
रापत वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो ततो वरुणमावाहयेत् ॐ
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रणोद्भवो ध्रुवरूणाः ॐ समानआकुः प्रेमोमीः अथकलशाभिमंत्रणम् कलशस्य
मुखेविष्णुः कंठेरुद्रः समाश्रितः मूलेतत्रस्थितोब्रह्मा मध्येमातृगणाः स्थि
तः कुक्षौतुसागराः सप्त सप्तद्वीपावसुंधरा ऋग्वेदोथयजुर्वेदः सामवेदोह्यथ
र्वणाः अंगैश्चसहिताः सर्वे कलशंतुसमाश्रिताः अथप्रार्थना देवदानवसंवा
दे मथ्यमानेमहोदधौ उत्पन्नोसितदाकुंभ विधृतोविष्णुनास्वयम् ॥ त्वत्तोये
सर्वतीर्थानि देवाः सर्वेत्वयिस्थिताः त्वयितिष्ठन्तिभूतानि त्वयिप्राणाः प्रति
ष्ठिताः शिवः स्वयंत्वमेवासि विष्णुस्त्वंचप्रजापतिः आदित्यावसवोरुद्रा वि
श्वेदेवाःसपैतृकाः त्वयितिष्ठन्तिसर्वेपि यतः कामफलप्रदः त्वत्प्रसादादिमंय
ज्ञं कर्तुमीहेजलोद्भव सान्निध्यंकुरुमेदेव प्रसन्नोभवसर्वदा ॐ स्थिराभवमीढ्व
ङ् आशुर्भववाज्यर्वन् पृथुर्भवसुषदस्त्व मग्नेःपुरीषवाहनाः एतन्तेतिप्रतिष्ठा
ॐ भूर्भुवः स्वः कलशेवरुणमवरुणा इहागच्छन्तु इहतिष्ठन्तु सुप्रतिष्ठितावरदा
भवन्तु ध्यानं नागपाशधरः स्वर्ण भूषणाः पद्मिनीप्रिय वरुणांवुपति चक्षोमा
श्वेतोमकरवाहनः इतिकलशस्थापनम् अथरक्षाविधानम् यवान्कुशां
स्तथादूर्वा सर्षपान् गंधमक्षतान् गोमयंदधिसंयुक्तं कारयेत्ताम्रभाजने ॐ
गणाधिपंनमस्कृत्यनमस्कृत्यपितामहम् विष्णुरुद्रंश्रियंदेवीं वन्देभक्त्यास
रस्वतीम् स्थानक्षेत्रंनमस्कृत्य दिनानाथंनिशाकरम् धरणीगर्भसम्भूतंश
शिपुत्रंबृहस्पतिम् दैत्याचार्यंनमस्कृत्य सूर्यपुत्रंमहाग्रहम् राहुं केतुं

राम:
११

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमस्कृत्य यज्ञारम्भे विशेषतः शक्राद्याः देवताः सर्वा नमस्कृत्य मुनींस्तथा गर्गं मुनिं
नमस्कृत्य नारदं मुनिसत्तमम् वशिष्ठं मुनिशार्दूलं विश्वामित्रं महामुनिम् व्यासं कविं
नमस्कृत्य सर्वशास्त्रविशारदम् विद्याधिकारिणो मुनयः आचार्याश्च तपोधनाः सर्वे ते
मम यज्ञस्य रक्षां कुर्वन्तु विघ्नतः प्राचीं रक्षतु गोविन्द आग्नेयीं गरुडध्वजः याम्यां र
क्षतु वाराहो नारसिंहस्तु नैर्ऋतीम् केशवो वारुणीं रक्षेद् वायवीं मधुसूदनः उदीचीं
श्रीधरो रक्षेद् ऐशानीं तु गदाधरः ऊर्ध्वं गोवर्धनधरो ह्यधस्ताद्धरणीधरः एवं दशदि
शो रक्षेद् वासुदेवो जनार्दनः यज्ञाग्रे रक्षतां शंखः पृष्ठे पद्मं तथोत्तमम् वामपार्श्वे गदा
रक्षेद् दक्षिणे तु सुदर्शनः उपेन्द्रः पातु ब्रह्माणम् आचार्यं पातु वामनः अच्युतः पातु
ऋग्वेदं यजुर्वेदम् अधोक्षजः कृष्णो रक्षतु सामानि ह्यथर्वं माधवस्तथा उपविष्टाश्च
ये विप्रास्ते अनिरुद्धेन रक्षिताः यजमानं सपत्नीकं पुण्डरीकविलोचनः रक्षाहीनं तु य
त्स्थानं तत्सर्वं रक्षताद्धरिः वेदमन्त्रैश्च कर्तव्या रक्षा कुम्भस्य सर्षपैः कृत्वा पोटलि
कां पूर्वं बध्नीयाद् दक्षिणे करे तत्रादि गायत्री १ ॐ गणानान्त्वा २ ॐ जातवेदसे सु
नवाम सोमम् अरातीयतो निदहाति वेदः स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दु
रितात्यग्निः ३ ॐ त्रिवृदसि त्रिवृते त्वा विवृदसि विवृते त्वा सवृदसि सवृते त्वा आ
क्रमोस्याक्रमाय त्वा संक्रमोसि संक्रमाय त्वा उत्क्रमोस्युत्क्रमाय त्वोत्क्रा
न्तिरस्युत्क्रान्त्यै त्वाधिपतिनोर्जोर्जं जिन्व ४ ॐ न तद्रक्षांसि न पिशाचा
स्तरन्ति देवानामोजः प्रथमजं ह्येतत् यो बिभर्ति दाक्षायणं हिरण्यं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शतानीकाय स्कम्भनस्य मानाः सदेयं कृणुते दीर्घमायुः समनु ब्वेकुं कृणुते दीर्घ
मायुः ५ यदाबध्नन्दाक्षायणा हिरण्यं० शतानीकाय स्कम्भनस्य मानाः तन्मच्या
बध्नामि शतशारदाया कुष्मान्जरदृष्टिर्यथासत् ६ रक्षोहणं वलगहनं वैष्णवी
मिदमहन्तं वलगमुत्किरामि यमनिविष्ट्यो यमसमात्यो निचखानेदमहन्तं वल
गमुत्किरामि यम्मेसमानो यमसमानो निचखानेदमहन्तं वलगमुत्किरामि यम्मे
सजातीयमसजाता निचखानेदमहन्तं वलगमुत्किरामि यम्मेसबन्धुर्यमसबन्धु
र्निचखानोत्कृत्याकिरामि ७ स्वराडसिसपत्नहा सत्रराडस्यभिमातिहा जनराड
सिरक्षोहा सर्वराडस्यमित्रहा ८ रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान्
रक्षोहणो वो वलगहनो वनयामि वैष्णवान् रक्षोहणो वो वलगहनो वस्तृणामि
वैष्णवान् रक्षोहणो वो वलगहनोऽ उपदधामि वैष्णवी रक्षोहणौ वां वलगहनौ
पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवास्थः ९ मानः स० सो ऋ३ इमो धूर्तिः
प्रणाङ्मर्त्यस्य रक्षोहणं ब्रह्मणस्पते प्रत्युष्ट० रक्षः प्रत्युष्टा अरातयो नि
ष्टप्त० रक्षो निष्टप्ता ऽ अरातयः अथ नातिल मन्त्रेषि रक्षोहा विश्वचर्षणी र
भियोनिमयो हतेद्रोणे सधस्थमासदत् १० एभिर्मन्त्रैः पोटलिकामभ्य
कम्भोने दक्षिणाकरे बध्नीयात् मन्त्रः येन बद्धो बली राजा दानवेन्द्रो महाब
लः तेन त्वामभिबध्नामि रक्षे मा चल मा चल त्वं व्यक्तिकृदा कुमेन्तुः पाहि स्थ
गाधीगिरः रक्षातांकमुतन्मना रक्षाकरक्षाम्बूयात् इति रक्षाविधानम् अथ यत्र

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हस्थापनपूजनविधिः तत्रकर्त्ता पूर्वदिने हविष्याशनादि नियमान्कृत्वा प्रथमं
गृहात्पूर्वदिग्भागे उत्तरस्यां भूमिपरिग्रहं कृत्वा भूमिं संशोध्य पञ्चामृतेनाभिसिच्य
पञ्चगव्येनाभ्युक्षेत् ततोगृहस्यैशानभागे यजमानहस्तेन विंशतिहस्तदीर्घा
दशहस्तायतो पश्चिमपूर्वायतो दक्षिणोत्तरायतो वा शालांकिंवामण्डपं दा
दशद्याष्टहस्तात्मकं चतुरस्रं चतुर्द्वारं ग्रहवर्णपताकाद्यलंकृतं कलशशोभां
विधाय तत्र हस्तखातविस्तारं समचतुरस्रं योन्यादियुतं कुण्डं कुर्यात् तद
रत्न्युच्छ्रितस्थण्डिलं निर्माय तदीशानदिग्भागे नवग्रहस्थापनार्थं हस्तविस्तृतौ
वितस्त्युच्छ्रितां वप्रद्वयावृतां समचतुरस्रां उदक्प्रवणां ग्रहवेदीं कुर्यात् त
स्याः प्रथमो वप्रो द्व्यङ्गुलोच्छ्रायो द्वितीयस्त्र्यङ्गुलोच्छ्रायो द्वावपि षडंगुल
विस्तारौ कर्तव्यौ तत्रवेदीमध्ये चतुर्दलकमलं निर्माय तत्रवर्णचूर्णैन
पूरयित्वा कर्णिकायां पत्रेषु यथोक्तमण्डलेषु प्रतिमास्वक्षतपु
ञ्जेषु तदाकारेण ग्रहाणामावाहनं कुर्यात् तत्रकर्त्ता कर्मदिवसे प्रातरु
त्थाय स्नानसन्ध्यादि नित्यकर्म समाप्य सर्वान्नवग्रहपूजासामग्रीं स
म्पाद्य दीपं प्रज्वाल्य प्राङ्मुख उपविश्याचम्य स्वस्तिवाचनं पठित्वा
प्रथमं गणेशपूजनं कुर्यात् अर्घं संस्थाप्य सूर्यायार्घं दत्वा पुनरर्घं संस्था
प्य प्राणायामत्रयं विधाय पूजासंकल्पं कुर्यात् ॐ विष्णुः२ अमुक

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

उ.प्र. स्वा १३

गोत्रो अमुकराशिरमुकशर्म्माहं अमुकराशेरमुकबालकुमारस्य वीजगर्भसमुद्भवैनो
निर्वर्हणायुर्वर्च्चोऽभिवृद्धिद्वारा श्रीपरमेश्वरप्रीतये करिष्यमाणग्रहयागचूडो
पनयनवेदारम्भसमावर्त्तनकर्म्मणां पूर्वाङ्गत्वेन निर्विघ्नताकार्य्यसिद्ध्यै श्रीभग
वतो गणेशस्य यथामिलितोपचारैः पूजनं करिष्ये इति संकल्प्य उक्तविधि
ना गणेशं सम्पूज्य प्रधानसंकल्पं कुर्य्यात् अद्येहेत्यादि संकीर्त्तनान्ते अमुकगो
त्रो अमुकराशिरमुकशर्म्माहं अमुकराशेरमुकशर्म्मणोऽस्य बालकस्य वीज
गर्भसमुद्भवैनो निर्वर्हणद्वारा आयुर्वर्च्चोमेधाभिवृद्ध्यै श्रीपरमेश्वरप्रीतये
अद्य श्वः परश्वो वा उपनयनात्प्राक् चौलसंस्कारं करिष्ये तथास्य द्विजत्वसि
द्ध्या वेदाध्ययनाधिकारसिद्ध्यर्थं उपनयनं करिष्ये तथा श्रौतस्मार्त्तकर्मा
नुष्ठानाधिकारसिद्ध्यै वेदारम्भं करिष्ये तथास्य गृहस्थाश्रमाहर्त्तासिद्धि
द्वारा श्रीपरमेश्वरप्रीतये समावर्त्तनाख्यं कर्म्म करिष्ये तत्पूर्वाङ्गत्वेन करिष्य
माणग्रहयागकर्म्मणि सकलमङ्गलाभिवृद्धये गौर्य्यादिषोडशमातृणां
पूजनं आभ्युदयिकश्राद्धं पुण्याहवाचनं च करिष्ये इति संकल्प्य-
मातृपूजानान्दीश्राद्धपुण्याहवाचनानि विधाय ततो ग्रहयथानेन कृत्वा
णपश्चिमे वा होमवेदिं आचार्य्यहस्तेन हस्तमात्रां पञ्चरज्जुलाञ्छितां नि
र्म्माय शालामध्ये त्रिचतुर्हस्तेन हस्तपरिमाणं स्थण्डिलं चतुरस्रं विधाय
होमवेद्यां पञ्चभूसंस्कारपूर्वकमग्निं संस्थाप्य प्रधानदीपं पूर्वस्यां दिशि

रामः १

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्वाभिमुखं प्रज्वाल्य ततो वेद्युपरि यथोक्तलक्षणाः स्वर्णादिप्रतिमास्तु दध्यक्षतेषु
ऐणुषा आदित्यादिनवग्रहाणां साधिप्रत्यधिदेवानां स्थापनं कुर्यात् प्रतिमालक्ष
णम् ताम्रकात्स्फाटिकाद्रक्तो चन्दना स्वर्णाकाद्भौमो रजताद्बुधः सीसो त्कांस्यात्का-
ध्याग्रहक्रमात् इति स्थापनप्रकारस्य मध्ये स्थाप्यो रवीरक्तः सोमश्वेतोग्निकोणके
दक्षिणेङ्गारकोरक्तः पीतईशानके बुधः बृहस्पतिरुदक्पीतः शुक्रः श्वेतस्तु पूर्वके पश्चि
मेतुशनिः कृष्णो मतश्च ग्रहवर्णकम् सर्वे आदित्याभिमुखा आदित्यस्य प्राङ्मु
खः स्थाप्य तत्र प्रतिमानां अग्न्युत्तारणं कुर्यात् मन्त्रः ॐ हिमस्य त्वा जरायु
णाग्ने परिव्ययामसि पावको अस्मभ्यं शिवो भव इति प्रतिमानामग्न्युत्तारणं
विधाय पञ्चामृतेन क्षालयेत् ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्य
न्तरिक्षे पयोधाः पयस्वतीः प्रदिशः सन्तु मह्यम् इति पयसा स्नापयेत् ॐ दधि
क्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः सुरभि नो मुखा करत्प्रण आयूंषि
तारिषत् इति दध्ना ॐ घृतवती भुवनानामभिश्रियो र्वी पृथ्वी मधुदुघे सु
पेशसा द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा इति
घृतेन ॐ मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः इ
तिमधुना ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् भवा वाजस्य संग
थे इति शर्करया ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन महे रणाय
चक्षसे यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः तस्मा अरंग

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माभवो यस्य तस्या अजि न्वश आपो जनयथा चनः इति शीतलोदकेन प्रतिमाः सं
स्नाप्य अग्न्युदग्निहितासु स्थालीषु स्थापयेत् तत्र संकल्पः अद्येहामुको ह
ग्रहयागकर्मणि यथोक्तफलावाप्तये रूपवर्ण प्रतिमासु आदित्यादिनवग्रह
णां गन्धाक्षतपुष्पेषु अधिदेवता प्रत्यधिदेवतादीनां स्थापनं करिष्ये इति संक
ल्प्य ॐ कारस्य ब्रह्मा ऋषि गायत्री छन्दः परमात्मा देवता व्याहृतीनां विश्वा
मित्र जमदग्नि भृगव ऋषयः गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या
देवता सूर्यादिनवग्रहादि स्थापने विनियोगः मध्ये वर्तुलाकारे रक्तवर्णे हस्ता

ङ्गुले मण्डले रक्तं सूर्यं रक्तगन्धाक्षतपुष्पैः स्था
पयेत् ॐ आकृष्णेति हिरण्यस्तूप ऋषि त्रि
ष्टुप् छन्दः सविता देवता आवाहने विनियोगः ॐ
आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्य
न् स्थापयेत् ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव का
श्यप गोत्र रक्तवर्ण सूर्य इहागच्छ इह तिष्ठ
पूजार्थं त्वामावाहयामि ततः आग्नेये चतुरस्रे
चतुरङ्गुले श्वेतमण्डले श्वेतं सोमं श्वेतपुष्पाक्ष
तैः स्थापयेत् ॐ इमं देवा इति गौतम ऋषि त्रिष्टुप् छन्दः सोमो देवता सामस्था

१४

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महते ज्यैष्ठ्याय महते
पनेविनियोगः ॐ इमन्देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमो
ऽस्माकं ब्राह्मणानाꣳ राजा ॐ भूर्भुवः स्वः यमुनातीरोद्भवः आत्रेयसगोत्र शुक्लवर्ण
सोम इहागच्छ इहतिष्ठ पूजार्थं त्वां आवाहयामि ततो दक्षिणे त्रिकोणे अङ्गुले
रक्तमण्डले रक्तं भौमं रक्तपुष्पाक्षतैः स्थापयेत् अग्निर्मूर्द्धेति विरूपाक्ष ऋषिर्गाय
त्रीछन्दः भौमो देवता भौमस्थापनविनियोगः ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथि
व्या ऽ अयम् अपाꣳरेताꣳसि जिन्वति ॐ भूर्भुवः स्वः अवन्तीदेशोद्भव भारद्वाजगो
त्र रक्तवर्ण भौम इहागच्छ इहतिष्ठ पूजार्थं त्वां आवाहयामि तत ईशाने बाणाकार
चतुरस्रे चतुरङ्गुले पीतमण्डले पीतं बुधं पीतपुष्पाक्षतैः स्थापयेत् उद्बुध्यस्वेति प
रमेष्ठी ऋषिः त्रिष्टुप्छन्दः बुधो देवता बुधस्थापने विनियोगः ॐ उद्बुध्यस्वाग्ने प्रति
जागृहि त्वमिष्टापूर्ते सꣳसृजेथामयञ्च अस्मिन्सधस्थे अध्युत्तरस्मिन् विश्वेदे
वा यजमानश्च सीदत ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयसगोत्र पीतवर्ण बुध
इहागच्छ इहतिष्ठ पूजार्थं त्वामावाहयामि ततः उत्तरे दीर्घचतुरस्रे षडङ्गुले पी
तमण्डले पीतं गुरुं पीतपुष्पाक्षतैः स्थापयेत् बृहस्पत इति गृत्समद ऋषिस्त्रि
ष्टुप्छन्दः बृहस्पतिर्देवता बृहस्पतिस्थापने विनियोगः ॐ बृहस्पते अतियदर्यो
अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धे
हि चित्रम् ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव आङ्गिरससगोत्र पीतवर्ण गुरो इहागच्छ इह

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिष्ठ पूजार्थं त्वां आवाहयामि ततः पूर्वे पञ्चकोणे नवाङ्गुले श्वेतमण्डले श्वेतं शु
क्रं श्वेतपुष्पाक्षतैः स्थापयेत् ॐ अन्नात्परिस्रुत इति प्रजापत्यश्विसरस्वतीन्द्रा ऋ
षयः अतिजगती छन्दः शुक्रो देवता शुक्रस्थापने विनियोगः ॐ अन्नात्परिस्रुतो रसं ब्र
ह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवसगोत्र शुक्ल
वर्ण शुक्र इहागच्छ इह तिष्ठ पूजार्थं त्वां आवाहयामि ततः पश्चिमे द्व्यङ्गुले धनु
राकारे कृष्णमण्डले कृष्णं शनिं कृष्णपुष्पाक्षतैः स्थापयेत् ॐ शन्नो देवी रिति द
ध्यङ्ङाथर्वण ऋषिः गायत्री छन्दः शनैश्चरो देवता शनिस्थापने विनियोगः ॐ शन्नो दे
वीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः ॐ भूर्भुवः स्वः सौराष्ट्रदेशो
द्भव काश्यपसगोत्र कृष्णवर्ण शनैश्चर इहागच्छ इह तिष्ठ पूजार्थं त्वां आवाहया
मि ततो नैरृत्ये शूर्पाकारे द्वादशाङ्गुले कृष्णमण्डले कृष्णं राहुं कृष्णपुष्पाक्ष
तैः स्थापयेत् ॐ कयानश्चित्रेति वामदेव ऋषिः गायत्री छन्दः राहुर्देवता राहुस्था
पने विनियोगः ॐ कयानश्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृ
ता ॐ भूर्भुवः स्वः राठीनपुरदेशोद्भव पैठीनसगोत्र कृष्णवर्ण राहो इहागच्छ इह
तिष्ठ पूजार्थं त्वां आवाहयामि ततो वायव्ये ध्वजाकारे धूम्रषडङ्गुले मण्डले
धूम्रं केतुं धूम्रपुष्पाक्षतैः स्थापयेत् केतुं कृण्वन्निति मधुच्छन्द ऋषिः गायत्री

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

छंदः केतुर्देवता केतुस्थापने विनियोगः ॐ केतुं कृण्वन्नकेतवे पेशोमर्य्या अपेशसे सम्
मुषद्भिरजायथा ॐ भूर्भुवः स्वः अंतर्वेदीसमुद्भव जैमिनिसगोत्र धूम्रवर्ण केतो इ
हागच्छ इह तिष्ठ पूजार्थं त्वामावाहयामि सर्वे आदित्याभिमुखास्थाप्या आदि
त्यप्राङ्मुखः अथाधिदेवतानांस्थापनम् ॐ भूर्भुवःस्वः सर्वतोभद्रे सूर्यद
क्षिणपार्श्वे ईश्वर इहागच्छ इहतिष्ठ पूजार्थं त्वामावाहयामि सोमद· उमेइ· भौ
मद· स्कंद· बुधद· विष्णो· गुरोद· ब्रह्मन्· शुक्रद· इन्द्र· शनेद· यम· राहोद· काल·
केतोद· चित्रगुप्त· अथ प्रत्यधिदेवतानाम् स्थापनं सूर्यवामपार्श्वे ईश्व अग्ने इ
सोमवा· आप इहागच्छन्तु· भौमवा· भूमे· बुधवा· विष्णो· गुरोवा· इन्द्र· शुक्रवा· इ
न्द्राणी· शनेवा· प्रजापते· राहोवामपार्श्वे सर्पा इहागच्छन्तु· केतोवा· ब्रह्मन्· अ
थ विनायकादिपञ्चानांस्थापनं राहोरुत्तरे विनायक· शनेरुत्तरे दुर्गे· रवेरुत्तरे दुर्गे
वायो· राहोर्दक्षिणत आकाश· केतोद· अश्विनौ· सर्वेषां उत्तरे क्षेत्राधिपते वास्तो
ष्पते· अथ दिक्पालानांस्थापनम् पूर्वे इन्द्र· आग्नेये अग्नि· दक्षिणे यम· नैर्ऋ
त्ये निर्ऋति· पश्चिमे वरुण· वायव्ये वायो· उत्तरे कुबेर· ईशाने ईश्वर· ऊर्द्ध्वे ब्रह्मन्·
कुबेरेशयोर्मध्ये स्थापयेत् अधः अनन्त निर्ऋतिवरुणयोर्मध्ये स्थापयेत् एवं सं
स्थाप्य अक्षतान् गृहीत्वा ॐ एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे
तेन यज्ञपतिं तेन मामव मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्व
रिष्टं यज्ञं समिमं दधातु विश्वेदेवास इह मादयन्तामों॥ प्रतिष्ठ ॐ भूर्भुवः स्वः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्र.प्र.स्था. १६

स्वर्णप्रतिमासु आदित्यादिनवग्रहाः साङ्गाः सपरिवाराः सायुधाः सवाहनाः तथा
दध्यक्षतपुञ्जेषु अधिदेवता प्रत्यधिदेवता विनायकादिपञ्च लोकपालसहिताः
इन्द्रादिदशदिक्पालाः सुप्रतिष्ठितावरदाभवन्तु कलशोपकरणादेव सुप्रतिष्ठिताभव
रक्षेसुप्रतिष्ठिताभव इतिप्रतिष्ठाप्य पूजासंकल्पंकुर्यात् ॐ विष्णुः३ अद्येहत्या
दिसंकीर्त्तनान्ते अमुकोहंअमुकगोत्रस्यामुकराशेरमुककुमारस्य दीर्घायुः प्रा
प्त्यर्थं गोचरदशान्तर्दशासु अष्टकवर्गसर्वतोभद्रे यत्रकुत्रस्थितानांआ
दित्यादिनवग्रहाणां दुष्टानांदुष्टदोषापशान्त्यर्थं शुभानांशुभफलाधिक्यप्राप्त्यै
करिष्यमाणग्रहयाग चूडोपनयनवेदारम्भ समावर्त्तनकर्मणः पूर्वाङ्गत्वेन स्थ
ण्डिले परिस्थापितासु स्वर्णप्रतिमासु आदित्यादिनवग्रहाणां दध्यक्षतपुञ्जे
षु अधिदेवतानां प्रत्यधिदेवतानां विनायकादिपञ्च लोकपालानां इन्द्रादिदशा
दिक्पालानां वास्तोष्पतेःक्षेत्राधिपतेः कलशआवाहितस्य वरुणस्य षोडशो
पचारैः पूजनंकरिष्ये इतिसङ्कल्प्य ध्यायेत् ॐ पद्मासनः पद्मकरोद्विबाहुः
पद्मद्युतिःसप्ततुरंगवाहनः दिवाकरोलोकगुरुःकिरीटी मयिप्रसादंविदधातु
देवः १ श्वेताम्बरः श्वेतविभूषणाश्च श्वेतद्युतिर्दण्डधरोद्विबाहुः चन्द्रोऽमृतात्मा
वरदः किरीटी श्रेयांसिमह्यंविदधातुदेवः २ रक्ताम्बरोरक्तवपुः किरीटी चतुर्भुजो
मेषगमोगदाभृत् धरासुतःशक्तिधरश्चशूली सदाममस्याद्वरदःप्रशान्तः ३ पी
ताम्बरः पीतवपुःकिरीटी चतुर्भुजोदण्डधरश्चहारी चर्म्मासिभृत्सोमसुतःसदामे

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिंहाधिरूढो वरदोस्तु मह्यम् ४ पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशांतः
दधाति दण्डं च कमण्डलुं च तथाक्षसूत्रं वरदोस्तु मह्यम् ५ श्वेताम्बरः श्वेतवपुः किरी
टी चतुर्भुजो दैत्यगुरुः प्रशांतः दधाति दण्डं च कमण्डलुं च तथाक्षसूत्रं वरदोस्तु मह्य
म् ६ नीलद्युतिः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् चतुर्भुजः सूर्य
सुतः प्रशांतः सदास्तु मह्यं वरमन्दगामी ७ नीलाम्बरो नीलवपुः किरीटी करालवक्त्रः
करवालशूली चतुर्भुजश्चर्मधरश्च राहुः सिंहाधिरूढो वरदोस्तु मह्यम् ८ धूम्रो द्विबा
हुर्वरदो गदाभृत् गृध्रासनस्थो विकृताननश्च किरीटकेयूरविभूषिताङ्गः सदास्तु मे के
तुगणः प्रशांतः ९ इति ध्यानम् अथ आवाहनम् उदयन्तं महद्युते तेजस्वी चाभ
यप्रदं आदित्यममृतं तेज सूर्यमावाहयाम्यहम् १ ॐ आकृष्णेन० द्विजराजमह
त्पुरस तारापतिरलंकृतम् औषधीनां द्विजाराजा सोममावाहयाम्यहम् २ ॐ इ
मन्देवा० त्वयदितानि शास्त्राणि यज्ञकार्यकराणि च ऋषिभिः प्रियमनित्यं भो
ममावाहयाम्यहम् ३ ॐ अग्निर्मूर्द्धा० बुधं बुद्धिप्रदातारं सोमरश्मिसमुद्भवम् य
जमानहितार्थाय बुधमावाहयाम्यहम् ४ ॐ उद्बुध्यस्व० मेरुमूर्द्धि विराजन्तं देवा
नांच पुरोहितम् अस्मराणांवधार्थाय गुरुमावाहयाम्यहम् ५ ॐ बृहस्पते सोम
तुल्यप्रतीकाशं दानवानां पुरोहितम् अस्मराणांवधार्थाय जेतारं सर्वशत्रूणां शुक्र
मावाहयाम्यहम् ६ ॐ अन्नात्परि० कृष्णाञ्जनवर्णांच कलांवरविभूषितम्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

ह॰ ग्र॰ स्था॰
७

शनैश्चरं कृष्णकेतुं शनिमावाहयाम्यहम् ७ ॐ शन्नोदेवी· रक्ताक्षं रक्तवर्णं च रक्तं
चैव लिखेत्तथा राहुं पतति संततम् राहुमावाहयाम्यहम् ८ ॐ कयान ञ्चराचर
प्रभुं चैव नीलोत्पलपशोभिताम् यजमानपठेनित्यं केतुमावाहयाम्यहम् ९ ॐ
केतुं कृण्वन्न· इति आवाहनम् नाममन्त्रेण च आसनम् आयान्त्वत्र ग्रहाः स
र्वे साधिप्रत्यधिदेवताः विनायकादिवाग्मीशाः सहिताः कमलेऽमले यजमा
नहितार्थाय यावत्कर्मसमाप्यते पाद्यम् गङ्गाजलं समानीतं सुगन्धिद्रव्यसं
युतम् पाद्यं तत्प्रतिगृह्णन्तु सूर्याद्यास्तु ग्रहा मम अर्घ्यम् स्वर्णपात्रं रत्ना
रूपं नानापङ्कजशोभितम् सुगन्धिजलसंयुक्तं अर्घ्यं मे प्रतिगृह्यताम् स्नानम्
जातीफललवङ्गादि कङ्कोलेन समन्वितम् मधुः सुशीतलं तोयं स्नानार्थं प्रति
गृह्यताम् वस्त्रम् सूक्ष्मतारावतीव शुभ्राणि नानादेशोद्भवानि च वस्त्राणि वः
प्रयच्छामि नानावर्णानि पूजिताः यज्ञोपवीतम् ब्रह्मसूत्रं चोत्तरीयं चारुका
र्पासनिर्मितम् गृह्णन्त्विदं मया दत्तं सूर्याद्यास्तु नवग्रहाः गन्धम् परमानन्द
सौरभ्य परिपूर्णदिगन्तरम् गृह्णन्तु परमं गन्धं कृपया मम देवताः अक्षताः स्वर्ण
धान्यतिशुभ्राश्च तण्डुलाः सुमनोहराः अक्षतार्थं प्रयच्छामि सन्तुग्रहाः स्फुर
श्वराः पुष्पाणि अनन्यार्पितपूर्तेच रूपविद्धं च नवं कुसुमम् गुणावळनसम्भूतं
नानागन्धिमनोहरम् अनन्तसौरभं पुष्पं गृह्णन्तु परमेश्वराः आभरणाम् स्वभाव
सुन्दर गात्रे नानावर्णाकृतीनि च भूषणानि विचित्राणि कल्पयामि नवग्रहाः राम॰
१

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धूपम् वनस्पतिरसोत्पन्नो गन्धाढ्यो गन्ध उत्तमः आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृः
ह्यताम् दीपम् सवर्त्तिघृतसंयुक्तं वर्त्याकर्पूरगर्भया स्वप्रकाशो महान्दीपः सर्वत
स्तिमिरापह सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् नैवेद्यम् सत्पात्रसिद्धं सुह
विर्विविधानेकभक्षणम् निवेदयामि ग्रहेभ्यः सानुगेभ्यः [illegible] ताम्बूलम् ना
गवल्लीदलैर्युक्तं कर्पूरादिसमन्वितम् पूर्णपूगीफलाढ्यं च ताम्बूलं प्रतिगृह्यता
म् नीराजनम् सवर्त्तिघृतसंयुक्तं वर्त्याकर्पूरगर्भया नीराजनं करोम्येन त्वं प्रसीदन
ममग्रहाः ॐ अग्निर्ज्योतिः समर्पणम् अज्ञानादथवालस्या प्रमादाद्वा कृतं म
या पूजनं प्रतिगृह्णन्तु क्षमध्वं मम देवताः पुष्पाञ्जलिः व्यास उवाच जपाकुसुम
संकाशं काश्यपेयं महाद्युतिम् तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् १ हिम
कुन्दतुषाराभं क्षीरोदार्णवसम्भवम् नमामि सततं सोमं शम्भोर्मुकुटभूषणम् २
धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहं ३
प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधं सौम्यं सौम्यगुणोपेतं नमामि शशि
नंदनम् ४ देवानाञ्च ऋषीणाञ्च गुरुं काञ्चनसन्निभम् बन्धुभूतं त्रिलोका
नां प्रणमामि बृहस्पतिम् ५ दधिशङ्खमृणालाभं दैत्यानां परमं गुरुम् सर्वशास्त्र
प्रवक्तारं भार्गवं प्रणमाम्यहम् ६ नीलाञ्जनसमाभासं रविपुत्रं यमाग्रज
म् छायामार्त्तण्डसम्भूतं नमस्यामि शनैश्चरम् ७ अर्द्धकायं महावीर्यं चन्द्रा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

ग्र. शा. १८

दित्यविमर्दनम् सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम् ८ पलालधूमसङ्काशं तारका
ग्रहमर्दनम् रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ९ इति व्यासमुखोत्पन्नं ये पठंति
समाहिताः दिवा वा यदि वा रात्रौ शान्तिस्तेषां भविष्यति १० ऐश्वर्यमतुलं चैव आरोग्यं
पुष्टिवर्द्धनम् नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम् ११ बालशान्तिकरं प्रोक्तं मल्पमृ
त्युर्विनश्यति ग्रहनक्षत्रजाः पीडा तस्कराग्निसमुद्भवाः १२ ताः सर्वाः प्रशमं यान्ति व्या
सो ब्रूते न संशयः सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मंगलं मंगलः सद्बुद्धिं च बुधो गु
रुश्च गुरुतां शुक्रः शुभं शं शनिः राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं नित्यं
प्रीतिकरा भवंतु मम ते सर्वेनुकूला ग्रहाः १३ आयुष्यं वित्तं च तथारोग्यं च धर्मार्थला
भं बहुपुत्रतां च शत्रुक्षयं राज्यसमृद्धतां च तुष्टा ग्रहाः क्षेमकरा भवंतु १४ इति
स्तोत्रं पठित्वा ॐ ब्रह्मामुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च गुरु
श्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवंतु इति च पठित्वा पुष्पाञ्जलिं
समर्पयेत् ततो ग्रहवेद्युपरि नारिकेलफलपुष्पद्रव्यसहितं वितानं समर्प्य वेदी
समीपे सूर्यादीनां यथोक्तबलीन्दद्यात् सूर्याय गुडौदनबलिम् सोमाय घृतपा
यसबलिं भौमाय क्षीरगुडघृतादिसंस्कारिकायुक्तं संयावम् क्षीरौदनं बुधाय घृ
तोदनं बृहस्पतये दध्योदनं शुक्राय कृशरान्नं शनैश्चराय अजमांसं राहवे छुर्कबट
कोदनं वा चित्रौदनं केतवे अन्येभ्यः पायसबलिं दद्यात् यथोक्तबल्यभावे आदि रामः
त्यादिभ्यो पायसबलिं तदभावे दध्यक्षतबलिं केचिन्मते होमान्ते बलिदानम् कु १८

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्य्यान्तेचबलिदानम् तत्पश्चात्सम्भवंकुर्य्यात् इतिग्रहस्थापनपूजनविधिः अथसाचा
ध्वोयजमानः ऋत्विक्सदस्यद्वारपालादीनांवरणंकुर्य्यात् तत्रसंकल्पः अद्येहेत्यादि
अमुकोहं अमुककर्म्मणि अस्मिन्ग्रहयागे ऋत्विक्कर्म्मकर्त्तुं ऋत्विक्सदस्यद्वा
रपालादीनां पूजनपूर्वकंवरणंकरिष्ये इतिसंकल्प्य भूमिदेवाग्रेत्यर्घंदत्वा गन्ध
द्वारेतिगंधं नमोस्त्वनन्तायेति अक्षतपुष्पैः सम्पूज्य वरणंकुर्य्यात् सुरभिर्गंधाक्ष
तादिभिः अस्मिन्ग्रहयज्ञकर्म्मणि ऋत्विक्कर्म्मकर्त्तुं भ तथासदस्यकर्म्मकर्त्तुं त
थाद्वारपालत्वेन त्वामहंवृणे वृतोस्मीति प्रत्युक्तिः अथप्रयुक्तणां ऋत्विगादीनां
प्रार्थना ऋग्वेदःपद्मपत्राक्षो गायत्रीसोमदेवतः अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक्
म्ममखभव ममास्मिन्यज्ञे त्वं ऋग्वेदीभव अहंभवामीतिप्र- मन्त्रपाठः ॐ अग्निमी
ले· कातराक्षो यजुर्वेद स्त्रैष्टुभो रुद्रदेवतः भारद्वाजस्तु विप्रेन्द्र ऋत्विक्कर्म्ममखभ
त्वं वृ ममास्मिन्यज्ञे यजुर्वेदीभव अहंभवा· मन्त्रपाठः इषेत्वा· सामवेदस्य पिंगा
क्षो जगतः सूर्यदेवतः कश्यपश्चस्तु विप्रेन्द्र ऋत्विक्कर्म्म मखभव ममास्मि
न्यज्ञे त्वं सामवेदीभव अहंभवा· ॐ अग्नआयाहि· वृहन्नेत्रोऽथर्ववेदोऽनुष्टुभा
रुद्रदेवतः वैखानसस्तु विप्रेन्द्र ऋत्विक्कर्म्म मखभव ममास्मिन्यज्ञे त्वं अथर्ववेदी
भव अहंभ· मन्त्रपाठः ॐ शन्नोदेवी· ऋग्वेदंस्थापयेत्पूर्वं यजुर्वेदं दक्षिणा
पश्चिमे सामवेदं उत्तरे चाप्यथर्वणम् ततः गायत्रीजपार्थं गणेशमंत्रादि जपपा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ठार्थं अन्यात् ब्राह्मणात् वृणुयात् अथ कुशकण्डिका दक्षिणतो ब्रह्मासनम् त
त्र ब्रह्मोपवेशनम् आत्मासने यजमानासनं अग्नेरुत्तरतः आसनद्वये कल्पयि-
त्वा प्रणीतापात्रम् सव्यहस्तकरणो जलेनापूरणम् दर्भैराच्छादनम् ब्रह्ममुखा
वलोकनम् प्रथमासने निधाय आलभ्य द्वितीयासनेन निदध्यात् दिशोदिशो प्रा
ग्रैः कुशैः परिस्तरणम् पुरस्तात् दक्षिणतः उत्तरतः पश्चात् अर्थवन्ति वस्तून्या
सादयेत् पवित्रच्छेदनानि त्रीणि कुशतरुणानि द्वे पवित्रे साग्रे अनन्तर्गर्भे प्रोक्ष
णीपात्रम् आज्यस्थाली चरुश्चेत् चरुस्थाली सम्मार्जनकुशाः पञ्च उपयमन
कुशास्त्रिप्रभृतयः त्रयोदशपर्यन्ता याहुत्याः समिधस्तिस्रः पालाश्यः प्रादेशमा
त्राः स्रुवः खादिरः गव्यमाज्यम् व्रीहितण्डुलाः पूर्णपात्रं अष्टपञ्चाशदधिकश
तण्डुलमुष्टिमितं २५६ बहुभोक्तृपुरुषाहारपरिमितं कर्मोपयोगिनी दक्षिणा वरः त्रिभिर्दर्भैः द्वौ द्वौ प्रादेशमात्रे पवि
वा एतानि वस्तूनि उत्तरतः स्थापयेत् प्रणीतोदकेन पवित्रप्रोक्ष
त्रेकस्या पात्रान्तरेण हस्तेन वा प्रणीतोदकेन वा चरुस्थाली सम्मार्जनेन कु
णात् पवित्राभ्यां आज्यस्थाली सम्प्रोक्ष्य तथा चरुस्थाली पूर्णपात्रं दक्षिणाञ्च सम्प्रोक्ष
शान् उपयमनकुशान् समिधः स्रुवम् आज्यम् पूर्णपात्रं स्थापयेत् निरूप्याज्यमधिश्रयेत् तु
अग्निं प्रणीतयोर्मध्ये अनन्तर्गर्भे प्रोक्षणीं स्थापयेत् चरुमाचार्य्यः अद्धे
चरुं च दक्षिणतः ब्रह्मा पदाताप्य आज्यं ब्रह्माधिश्रयति

रामः
१८

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रिते चरावाज्ये वा ज्वलदुल्मुकं समन्तात् भ्रामयेत् स्रुवमथो स्रुचं प्रतप्य सम्मार्जन कु
शैः अग्रतो मूलपर्य्यन्तं मूलतोऽग्रपर्य्यन्तं सम्मार्ज्य पुनः प्रतप्य कराभ्यां सम्मार्ज्य
दक्षिणतः कुशोपरि निदध्यात् आज्यमुद्वास्य उत्तरतः स्थापयित्वा पश्चादानीय पू
र्ववपवित्राभ्यामुत्पूय अवेक्ष्य अपद्रव्यनिरसनं कृत्वा उपयमनकुशानादाय वाम
करे कृत्वा तिष्ठन् घृताक्ताः समिधः पर्युक्ष्य स्वाहेति जुहुयात् ॐ समिधाग्निं दुव
स्यत घृतैर्बोधयतातिथिम् आस्मिन् हव्या जुहोतन: सुसमिद्धाय शोचिषे घृतं तीव्रं जु
होतनः १ ॐ अग्नये जातवेदसे तन्त्वा समिद्भिरङ्गिरो घृतेन वर्द्धयामसि बृहच्छोचा
यविष्ठ्य २ ॐ उतत्याग्ने हविष्मतीर्घृताचीर्यन्तु हर्य्यथ जुषस्व समिधो ममस्वा
हा ३ ततः प्रोक्षण्युदकेन सपवित्रेणादक्षिणकुल्के गृहीतेन ईशानादुत्तरपर्य्य
न्तं सम्प्रोक्ष्य पवित्रे प्रणीतायां निदध्यात् संस्रवधारणार्थं पात्रं प्रणीताग्न्योर्म
ध्ये निदध्यात् अग्निं प्रतिष्ठाप्य एतन्तेऽइति अमुकनामाग्ने सुप्रतिष्ठितो वर
दो भव ध्यानम् ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः तदेव शुक्रं तद्ब्र
ह्म ता आपः स प्रजापतिः १ सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधिः नैनमूर्द्ध्वं न
तीर्य्यङ्नमध्ये परिजग्रभत् २ न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः हिर
ण्यगर्भ इत्येष मामाहिंसीदित्येषा यस्मान्न जात इत्येषः ३ एषो हि देवः
प्रदिशोनु सर्वा पूर्वो हि जातः स उ गर्भे अन्तः स एव जातः स जनिष्यमाणः प्र

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ह० श्री ॐ
१०

त्वमग्ने नाति स्तुतिं सर्वतोमुखः ४ ॐ चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त
हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आऽ विवेश ५ ॐ
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् सुवर्णवर्णममलं समिद्धं सर्वतोमुखम्
इति ध्यात्वा आवाहयेत् ॐ वैश्वानर न ऊतय आ प्र यातु परावतः अग्निरु
क्थेन वाहसा ॐ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रिया
णि सप्त होत्राः सप्तधा त्वा सप्त योनीरापृणस्व घृतेन स्वाहा २ इत्यावाह्य अमु
काग्नये नम इति नाममन्त्रेण पाद्यादि नीराजनान्तं सम्पूज्य रेखाः जिह्वाः पूजयेत्
यथा पूर्वरेखायां ॐ ब्रह्मणे नमः मध्यरेखायां ॐ विष्णवे नमः उत्तररेखायां
ॐ रुद्राय नमः ततो अग्निजिह्वापूजनम् ॐ रक्तायै नमः श्वेतायै नमः पीतायै नी
लायै धूम्रायै ज्वालिन्यै विस्फुलिङ्गिन्यै नमः इति सप्तजिह्वाः सम्पूज्य पु
ष्पाञ्जलिः ॐ अग्निज्वालान्वितं भव्यं अजारूढं महोज्ज्वलं शक्तिहस्तं वेद
मन्त्रैरावाह्य पूजयेत् सुधीः पूजयित्वा पठेत् स्तोत्रं स्तुतिकार्यप्रसन्नतः
स्वाहानाम महाभाग शक्तिहस्त जगन्मय ज्वालाकुलतनो हीन दैत्यतापक
शंकर सर्वज्ञ सर्वजगत्संस्थ सर्वस्य पावक सर्वसंपत्करा व्यग्र तापपापारि
हारक छागवाहन सर्वादि सर्वव्याधिविनाशन देवकार्यविनाशन सुवर्णवर्ण
शिवप्रिय रुद्रलोचनसंभव सर्वराजनकाम्य धूमध्वज धरेष्ये वार नमः
२०

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कादिकृतालय वेदगीतविशालाक्ष विद्याधरगणार्च्चितः यागसाधनयोगज्ञ योगि
नांगतिदायक पापनाशन पापार कार्य्यसाधनजोत्सक मुनिमान्यतमोनाशकारणति
भयवर्ज्जितः वैश्वानर महाभाग सर्वलक्षणलक्षितः नमस्तेस्तु नमस्तेस्तु नमस्ते
भ्यंनमोनमः अनुकूलसदामह्यं भवसर्वप्रवर्त्तकः कर्म्मणामनसावाचा पतामित
वपादयो इति पुष्पांजलिं समर्प्य द्रव्यत्यागसंकल्पः अद्येहामुकोहं अमुकहो
मकर्म्मणायक्ष्ये तत्रप्रजापतिमिन्द्रमग्निं सोममग्निंवायुं सूर्य्यमग्नीवरुणावग्नी
वरुणावग्निं वरुणंसवितारं विष्णुं विश्वान्मरुतः स्वर्कान्वरुणामदितिं प्रजापति
मग्निंस्विष्टकृतं चाज्येनाहंयक्ष्ये एतद्धोमद्रव्यं तत्तद्देवताभ्यो मयापरित्यक्तं ॐ
तत्सयथादेवतमस्तु इतिसंकल्प्य दक्षिणजान्वाच्य ब्रह्मणान्वारब्धो मनसा
प्रजापतिंध्यात्वा आघाराज्यभागौ जुहुयात् ॐ प्रजापतये स्वाहा इदं प्रजापतये
इतित्यागंविधाय हुतशेषंपात्रान्तरे निक्षिपेत् ॐ इन्द्राय स्वाहा इदमिन्द्राय
ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय इतिहुत्वा त
तः पृक्तहोमंविधाय भूरादिहोमंकुर्यात् ॐ भूः स्वाहा इदमग्नये ॐ भुवः
स्वाहा इदंवायवे ॐ स्वः स्वाहा इदं सूर्याय त्वन्नोअग्नइति वामदेव ऋषि
स्त्रिष्टुप्छन्दः अग्निवरुणौदेवते सर्वप्रायश्चित्तहोमे विनियोगः ॐ त्वन्नो अग्ने
वरुणस्यविद्वान्देवस्यहेडो अवयासिसीष्ठाः यजिष्ठोवह्नितमः शोशुचानो वि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्ववाहृद्धमाछ सिप्रमुग्ध्यः स्मतस्वाहा इदमग्नीवरुणाभ्याम् सत्वन्नोअग्नेइति वामदे
वक्रषिस्त्रिष्टुष्छन्दः अग्निवरुणोदेवते सर्वप्रायश्चित्ते होमेविनियोगः ॐ सत्वन्नो
अग्नेवमोभवा तीनेदिष्ठोऽअस्याउषसोव्युष्टौऽअवयक्ष्वन्नो वरुणछ रराणो वीहि
मृडीकछ सुहवोनएधी स्वाहा इदमग्नीवरुणाभ्याम् अयाश्चाग्नेइति प्रजापति
र्ऋषिर्विराट् छन्दः अग्निर्देवता सर्वप्रायश्चित्ते होमेविनियोगः ॐ अयाश्चाग्नेस्य
नभिशस्तिपाश्चः सत्यमित्वमयाअसि अयानोयज्ञंवहास्ययानोधेहिभेषज
छ स्वाहा येतेशतमिति शुनःशेपऋषिस्त्रिष्टुप्छन्दः वरुणसवितृविष्णुविश्वेदेवा
मरुतः स्वर्कादेवता सर्वप्रायश्चित्ते होमेविनियोगः ॐ येतेशतंवरुणयेसहस्रंयज्ञी
याः पाशावितता महान्तः तेभिर्नोऽअद्यसवितोत विष्णुर्विश्वेमुञ्चन्तु मरुतः स्वर्काः
स्वाहा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्यः मरुद्भ्यः स्वर्केभ्यः उदुत्तममिति
शुनःशेपऋषिस्त्रिष्टुप्छन्दः वरुणोदेवता सर्वप्रायश्चित्ते होमेवि॰ ॐ उदुत्तमं
वरुणपाशमस्मदवाधमंविमध्यमछ श्रथाय अथावयमादित्यव्रते तवानागसो
अदितयेस्याम स्वाहा इदंवरुणायादित्ये ॐ अग्नयेप्रजापतये स्वाहा इदमग्न
येप्रजापतये ॐ अग्नयेस्विष्टकृते स्वाहा इदमग्नयेस्विष्टकृते ततः संस्रवप्राशनम्
पवित्रप्रतिपत्तिः प्रणीताविमोकः बर्हिर्होमः ब्रह्मणेपूर्णपात्रदानम् अद्येह
मुकोहं अमुककर्म्माङ्ग होमकर्म्मणः साङ्गफलप्राप्त्यर्थं अपूर्णपूर्णार्थञ्च
प्राप्तये

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

इदंपूर्णपात्रंसद्रव्यंब्रह्मणेनुग्रंसम्प्रददे ॐ तत्त्वन्नमम इतिदत्वा मन्त्रपाठः ॐ
अक्रन्कर्म्मकर्म्मकृतः सहवाचामयोभुवा देवेभ्यः कर्म्मकृत्वा तंप्रेतसचाभुवः
पूर्णाहुतिंजुहुयात् यजमानेन्वारब्धकार्य्यः ब्रह्मणा स्रुवौ घृतंदद्यात् आचार्यो
होमंकुर्य्यात् स्रुवंसंपूजितं नारिकेलपूगीफलादि फलवस्त्रसहितंकृत्वा ॐ स्रुव
श्चमे चमसाश्चमे वायव्यानि चमे द्रोणकलशश्चमे ग्रावाणश्चमे धीषवणेचमे पू
तभृच्चमऽआधवनीयश्चमे वेदिश्चमे बर्हिश्चमे अवभृथश्चमे स्वगाकारश्चमे यज्ञेन
कल्पन्ताम् इतिमन्त्रेण स्रुवंसम्पूज्य संकल्पः अद्येहामुकोहं अमुककर्म्माङ्ग होम
कर्म्मणः साङ्गफलप्राप्त्यर्थ न्यूनातिरिक्तपरिपूर्त्यर्थं मृडनामाग्नौ पूर्णाहुतिहोमं क
रिष्ये मूर्द्धानंदिवइति भारद्वाजऋषिस्त्रिष्टुप्छन्दो महावैश्वानरोदेवता मृडनामा
ग्नौ पूर्णाहुतिहोमेविनियोगः ॐ मूर्द्धानंदिवोऽअरतिम्पृथिव्या वैश्वानरमृतऽआ
जातमग्निम् कविꣳसम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः स्वाहा
१ ॐ सदसस्पतिमद्भुतंप्रियमिन्द्रस्यकाम्यम् सनिम्मेधामयासिषꣳ स्वाहा २ ॐ
यांमेधान्देवगणाः पितरश्चोपासते तयामामद्यमेधयाऽग्नेमेधाविनंकुरु स्वाहा ३
ॐ मेधाम्मेवरुणोददातु मेधामग्निः प्रजापतिःमेधामिन्द्रश्चवायुश्च मेधान्धाता
ददातुमेस्वाहा ४ ॐ पूर्णादर्विपरापत सुपूर्णापुनरापत वस्नेवविक्रीणावहा इष
मूर्ज्जं शतक्रतोः स्वाहा ५ एभिर्मन्त्रैः पूर्णाहुतिहोमंविधाय अग्निपूजनंकुर्य्यात्

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रद्धां मेधां यशः प्रज्ञां विद्यां पुष्टिं बलं श्रियम् आयुष्यं द्रव्यमारोग्यं देहि मे हव्यवा
हन: ॐ तनूपा ऽअग्नेसि तन्वं मे पाहि ॐ आयुर्दा ऽअग्ने स्यायुर्मे देहि वर्च्चोदा ऽअ
ग्नेसि वर्च्चो मे देहि अग्ने यन्मे तन्वा ऊनं तन्म ऽआपृण ॐ मेधां मे देवः सविता ऽआदधा
तु ॐ मेधां मे देवी सरस्वती आदधातु ॐ मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ
ॐ अङ्गानि च म ऽआप्यायन्ताम् इति सर्वाङ्गान्युपस्पृशेत् वाक् च म ऽआप्यायताम्
इति मुखे प्राणश्च म ऽआप्यायताम् इति नासिकायाम् चक्षुश्च म ऽआप्यायताम्
इति नेत्रयोः श्रोत्रञ्च म ऽआप्यायताम् इति श्रोत्रयोः यशो बलञ्च म ऽआप्याय
ताम् इति बाह्वोः ततस्त्र्यायुषकरणं भस्मना ॐ त्र्यायुषं जमदग्नेः इति ललाटे
ॐ कश्यपस्य त्र्यायुषम् इति ग्रीवायाम् ॐ यद्देवेषु त्र्यायुषम् इति दक्षिणस्क
न्धे ॐ तन्नो ऽअस्तु त्र्यायुषम् इति हृदि त्र्यायुषमिति सर्वेणाभिमन्त्रेण सर्वाङ्ग-
मालभेत् ततो होमसाङ्गदक्षिणासंकल्पः अद्येहेत्यादि अमुकोऽहं अमुके
कर्म्मनिमित्तकहोमकर्म्मणः साङ्गफलप्राप्तये साद्गुण्यार्थञ्च इमां स्कवर्ण
दक्षिणां अग्निदैवत्यां स्कवर्णनिष्क्रयीभूतद्रव्यम्वा आचार्य्याय तुभ्यं सम्प्र
ददे तथा भूयसीं दक्षिणां अन्येभ्यो ब्राह्मणेभ्यो विभज्य दास्ये ॐ तत्सत् न
थाशक्त्योपपन्नेनान्नेन ब्राह्मणांश्च भोजयिष्ये ततोग्निं विसर्ज्जयेत् गच्छ ग
च्छ सुरश्रेष्ठ स्वस्थाने परमेश्वरः यत्र ब्रह्मादयो देवा स्तत्र गच्छ हुताशन भो रामः
भो वह्ने महाशक्ते सर्वकर्म्मप्रसाधक कर्म्मान्तरेपि सम्प्राप्ते सानिध्यं कुरु सादरम् २२

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यान्तुदेवगणाः सर्वेपूजामादाय मामकीम् इष्टकामसमृद्ध्यर्थं पुनरागमनाय
च ॐ यज्ञयज्ञंगच्छ यज्ञपतिंगच्छ स्वांयोनिंगच्छ स्वाहा एषतेयज्ञोयज्ञपतेस
हसूक्तवाकः सर्ववीरस्तंजुषस्व स्वाहा ॐ धामच्छदग्निरिन्द्रो ब्रह्मादेवोबृहस्प
तिः सचेतसोविश्वेदेवा यज्ञंप्रावन्तुनः शुभे इत्यग्निंविसर्जयित्वा दक्षिणांदत्वा
अभिषेकतिलकरक्षाबंधन घृतच्छायामंत्रपाठादिकंकारयेत् इतिकुशकण्डि
का अथकुशकण्डिकाप्रयोगसंग्रह तत्रप्रथमंअग्निनामानि अथातःसम्प्रव
क्षामि यथोक्तंपद्मयोनिना ब्राह्मणानांहितार्थाय संस्कारेषुभाविनम् १
लौकिकः पावकोह्यग्निः प्रथमः परिकल्पितः अग्निस्तुमारुतोनाम गर्भाधाने
विधीयते २ पुंसवनेचान्द्रमसः शुङ्गाकर्मणिशोभनः सीमन्तेमङ्गलोनाम प्र
गल्भोजातकर्मणि ३ नाम्निवैपार्थिवोह्यग्निः प्राशनेतुशुचिः स्मृतः सभ्यना
माथचूडेतु व्रतारम्भसमुद्भवः ४ व्रतमध्येहरिर्नाम व्रतान्तेराजपुत्रकः गोदाने
सूर्यनामाच केशान्तेह्यग्निरुच्यते ५ वैश्वानरोविसर्गेतु विवाहेयोजकः
स्मृतः चतुर्थ्यान्तु शिखीनाम धृतिरग्निस्तसामनि ६ आवसथ्येभवोज्ञे
यो वैश्वदेवेतुपावकः ब्रह्मावैगार्हपत्यातिदीश्वरोदक्षिणास्तथा ७ विहुत
हवनीयश्च अग्निहोत्रेत्रयोऽग्नयः लक्षहोमेवह्निर्नामा कोटिहोमेहुताशनः ८
प्रायश्चित्तेविधिश्चैव पाकयज्ञेतु साहसः देवानांहव्यवाहश्च पितॄणांकव्य

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

ह॰ क॰ सं॰ १३

वाहनः ९ पूर्णाहुत्यां मृडो नाम शान्तिके वरदस्तथा पौष्टिके बलदश्चैव क्रोधाग्नि
श्चाभिचारिके १० वश्यार्थे कामदो नाम वनदाहे तु वर्द्धनः कोष्ठे तु जाठराग्निः स्या
त्क्रव्यादो मृतभक्षणे ११ समुद्रे वाडवो ज्ञेयः क्षये संवर्तको भवेत् एतेऽग्नयः समा
ख्याता स्त्रिंशल्लक्षणसंज्ञकाः १२ अथाग्निजिह्वा काली कराली च मनोजवा च
सुलोहिता चैव सुधूम्रवर्णा स्फुलिङ्गिनी चैव स्वाचिस्मिता च लोलायमाना इति
सप्तजिह्वाः १ अविदित्वा तु यो ह्यग्नेर्होमयेदविचक्षणः न हुतं न च संस्कारो
न च कर्म्मफलं भवेत् २ सप्तजिह्वाः स्फुरन्त्येता हुताशनमुखे स्थिताः याभिर्ह
व्यं समश्नाति हुतं सम्यग्द्विजोत्तमैः ३ सप्तजिह्वाप्रमाणं तु प्रादेशमिह कीर्त्तितम्
प्रमाणं चतुरस्रं च वर्त्तुलं मुखमण्डलम् ४ काली धूम्रिणी श्वेता लोहिता च सिता
तथा स्वर्णा पद्मरागी च सप्तैताः परिकीर्त्तिताः ५ कराली रक्षांस्यश्नाति धूम्रि
णीम्मत्सरास्तथा श्वेतां नागाः समश्नन्ति पिशाचा लोहितां तथा ६ सितामश्नन्ति
गंधर्वाः स्वर्णां तु यमस्तथा पद्मरागी तु विख्याता दिव्या जिह्वा हुताशने ७ त
स्यां तु होममन्विच्छेत् सर्वसिद्धौ हुताशने विधूमे लेलिहाने च होतव्यं तत्र सिद्धये ८
न धूमे न तथा ज्वाला विशुद्धा प्रतिरोचितः प्रभया भाति यत्रैव भगवांस्तत्र तिष्ठ
ति ९ इत्यग्निनामानि जिह्वानामानि च अथ रक्षाकारिकायां ध्रुवधारणावि
धिः चतुरङ्गुलं परित्यज्य मडङ्गुलमथवा कौशमूलमात्राङ्ग धारयेत् रम्रः

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रुद्रश्चैवप्रजापतिः मन्त्रश्चेयर्यमोदेव क्रुपेतिश्च
समुद्भवा १ अग्निः सोमस्तथा सूर्यो रुद्रश्चैवप्रजापतिः अग्निस्यावेग्निसंतापः सोमस्ते
न्तिसर्वदा २ भुवोग्रवसेतमहिर्विभागश्चतुरङ्गुलः अग्निस्यावेग्निसंतापः
ग्राउदाहृतः ३ सूर्येपशुविनाशः स्याद्रौद्रं रौद्रभयंभवेत् प्रजापतौप्रजावृद्धि र्येमम्
त्युभयंभवेत् ४ यमभागंत्यजेन्मूलंषोडशाङ्गुलमग्रतः प्रजाभागस्त्रुवोधार्य्य सर्व
कर्मप्रसिद्धये ५ इति स्त्रुवधारणाविधिः अथद्रव्यप्रमाणम् कर्षमात्रंघृतंहोमे
शुक्तिमात्रंपयः स्मृतम् उक्तानिपञ्चगव्यानि तत्समानिमनीषिभिः १ तत्समं
मधुदुग्धान्नं भक्ष्यमात्रं उदाहृतम् यवाः पृष्टतिमात्राः स्युस्तथाऽस्युर्मुष्टिमात्र-
काः २ पृथुकाः स्तत्प्रमाणाः स्युः शाकवा नैयोदिताः गुडंपलार्द्धमानंस्या च्छर्करा
पितथामता ३ ग्रासार्द्धंचकमानंस्याद्दिक्षुः पर्वावधिः स्मृतः एकैकंपत्रपुष्पादि
तथाप्रमाणिकल्पयेत् ४ कदलीफलनारिङ्ग फलान्येकैकशोविदुः मातुलुङ्गं च
तुः खण्डं पनसंदशधोक्तम् ५ अमृधानारिकेलानि खण्डितानिविदुर्बुधाः
त्रिधाकृतंविल्वफलं कपित्थंखण्डितंत्रिधा ६ उर्वारुकफलंहोम कल्पितंख
ण्डितंत्रिधा फलान्यन्यानिखण्डानि समिधः स्युर्दशाङ्गुलाः दूर्वाङ्कुरत्रयंस्यु
गुडूचीचतुरङ्गुला व्रीहयोमुष्टिमात्राः स्युर्मुद्गमाषायवाअपि ७ स्तण्डुलास्स्यु
र्मातर्द्धाशाः कोद्रवामुष्टिसम्मिताः गोधूमारक्तकलमा विहितामुष्टिमानतः ८
स्तिलाम्सुकमात्राः स्युः शर्मपास्तत्समास्मृताः शुक्तिप्रमाणंलवणं मरीचान्य

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पिविंशतिः १० पुरंवदस्मानंस्या द्वांमठंतत्समंस्मृतम् चन्दनागुरुकस्तूरी कर्पूरं कुङ्
मंतथा तिन्तिडीवीजमानानि समुद्दिष्टानिदैशिकैः ११ इतिद्रव्यप्रमाणम् अथ
द्रव्यग्रहणेमुद्रालक्षणम् होममुद्रास्त्रयः प्रोक्ता मृगीहंसीचसूकरी विनामुद्रा
कृतोहोमः सर्वोभवतिनिष्फलः १ सूकरीकरसङ्कोची मृगीमुक्तकनिष्ठिका हं
सीस्या तर्जनीमुक्ता त्रिधामुद्राः प्रकीर्त्तिताः २ शान्तिकेच मृगीज्ञेया हंसी पौष्टि
ककर्मणि अभिचारे सूकरीस्या हिंदमोच्चाटनादिषु ३ मुद्राहीनंतुयोमोहा
द्धोतुमिच्छतिमूढधीः यजमानं तथात्मानं पातयेन्न विनिश्चितम् ४ इतिमुद्रा
लक्षणम् अथाज्यलक्षणम् मन्त्रेणालोडितंयच्च पवित्राभ्यांच संस्कृतं
म् अपद्रव्यविहीनंतु तदाज्यमिहुत्तमिति अथयज्ञीयकाष्ठानिब्रह्मपुरा
णे पालाशाश्वत्थन्यग्रोध प्लक्षवैकङ्कतोद्भवाः समीचोदुम्बरोविल्व श्चन्दनं
सरलस्तथा शालश्चदेवदारुश्च खदिरश्चत्रयोदशः इतिकुशकाण्डिकापर्यो
गीसग्रह अथग्रहयागहोमविधिः आचार्योहोमवेदीसमीपमागत्य ब्रह्मो
पवेशनादि पर्युक्षणान्तकर्मकृत्वा स्रतनेति अग्निंप्रतिष्ठाप्य अमुकनामा
ग्नेत्रप्रतिष्ठितो वरदोभवतिप्रतिष्ठाप्य ध्यानावाहनादिनीराजनान्तं सम्पूज्य
तथाश्चादित्यादिनवग्रहाणांक्रमेणाग्नेय्यायथा कपिलः पिङ्गलोधूम्रकेतु राम: २४

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जाठरस्त्वर्कः शिखीच हाटकश्चैव महातेजा हुताशनः रोहितश्चैव विज्ञेयो जारव्या
दीनां हुताशनेति ॐ भूर्भुवः स्वः कपिलनामाग्ने इहागच्छ · ॐ भूः पिङ्गलनामाग्ने
ॐ भूः धूम्रकेतुनामाग्ने · ॐ भूः जाठरनामाग्ने · ॐ भूः शिखिनामाग्ने · ॐ भूः हाटक
नामाग्ने · ॐ भूः महातेजोनामाग्ने · ॐ भूः हुताशननामाग्ने · ॐ भूः रोहितनामा
ग्ने · आदित्यादिनवग्रहाणां समिधो जुहुयात् समिधस्तु अर्कः पलाशः खदि
रस्त्वपामार्गोथ पिप्पलः उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् समि
ल्लक्षणाम् प्रादेशमात्राः अव्यङ्गाः घुणाकीटाद्यविद्धाः सक्षीराः सपत्राः क
निष्ठाग्रस्थूलाः दधिमधुघृताक्ता ग्राह्याः अर्काद्यभावे पालाशमेव सर्वेषाम्
शम्यभावे खदिरो ग्राह्य इति केचित् अधिदेवतादीनां तु पालाशमेव दूर्वास
मिधस्तु दूर्वा अत्र परिमिता ग्राह्या एवं कुशसमिधोपि कुशाश्च परिमिताः
होमे मुद्रालक्षणां कुर्यात् इत्यागमे कल्पः अथ ग्रहनवग्रहयागेनाहं यस्मि
नव प्रजापतीन्द्राग्नि सोमेभ्यः आज्येन सवितृ सोम भौम बुध बृहस्पति भृ
गुशनैश्चर राहुकेतवो मेरामास्कंद वृषभविष्णु ब्रह्मेन्द्रयमकाल चित्रगुप्ता
ग्न्यापोधरा विष्णुरिन्द्राणी प्रजापतिसर्प ब्रह्मविनायकदुर्गा वायु आका
शाश्विभ्यः इन्द्रादिदशदिक्पालेभ्यश्च समिच्चर्वाज्य तिलादिद्रव्यैः प्रत्येक

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

ग्र. शा. २५

मेक्षोत्तरशताद्यष्टाविंशतिसंख्यया वा शेषेणाज्यहुतं वाज्येनाहं स्य
स्ते इदमाज्यं समिद्वाज्यं तिलादिद्रव्यं च ममोपरि ... त्यक्तं तत्तद्देवताभ्यो
यथादैवतमस्तु इति द्रव्यत्यागं विधाय होमविधिः ऋत्विक्छन्दो देवतानि नाम
द्रव्यं चेद्देवताः न स्मरेत्कर्मकाले यः साधयेत मंत्रमिति नमुक्तं कश्चि जुहुयात्
निपातितकजानुकः उत्तानेनैव हस्तेन ह्यंगुष्ठाग्रेणपीडितं संहतांगुलिपातनं
यतो जुहुयाद्धविः अथ क्रमेण होममन्त्राः आकृष्णेनेति हिरण्यस्तूप ऋषि
स्त्रिष्टुप्छन्दः सविता देवता सवितृप्रीतये कपिलाग्नौ अमुकसंख्यया अर्क
समिद्धोमे विनियोगः ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं
च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा इदं सवित्रे इ
मं देवा इति गौतमऋषिस्त्रिष्टुप्छन्दः सोमो देवता सोमप्रीतये पिप्पलाग्नौ
अमुकसंख्यया पला० ॐ इमं देवा असपत्नं सुवध्वं महते क्षत्राय
महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय इमममुष्य पुत्रममुष्यै
पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानां राजा स्वाहा
इदं सोमाय अग्निर्मूर्धेति विरूपाक्ष ऋषिर्गायत्री छन्दः भौमो देवता भौम

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रीतये धूम्रकेत्वग्नौ खदिरसमिद्धोमे विनियोगः ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः
पृथिव्या अयम् अपांरेतांसि जिन्वति स्वाहा इदं भौमाय उद्बुध्यस्वेति पर
मेष्ठी ऋषिस्त्रिष्टुप्छन्दो बुधो देवता बुधप्रीतये जाठराग्नौ अमुकसंख्यया अपा
मार्गसमिद्धोमे विनियोगः ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते संसृ
जेथामयञ्च अस्मिन्सधस्थे ऽअध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत स्वा
हा इदं बुधाय बृहस्पतइति गृत्समद ऋषिस्त्रिष्टुप्छन्दो बृहस्पतिर्देवता बृह
स्पतिप्रीतये शिख्यग्नौ अमुकसंख्यया पिप्पलसमिद्धोमे विनियोगः ॐ बृह
स्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस ऋतप्रजा
तत्तदस्मासु द्रविणं धेहि चित्रम् स्वाहा इदं बृहस्पतये अन्नात्परिस्रुत इति
प्रजापत्याश्विसरस्वतीन्द्रा ऋषयः अतिजगतीछन्दः शुक्रोदेवता शुक्रप्रीतये
हुतभुगग्नौ अमुकसंख्यया उदुम्बरसमिद्धोमे विनियोगः ॐ अन्नात्परिस्रुतो र
सं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ऋतेन सत्यमिन्द्रियं विपानं शु
क्रमंधस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु स्वाहा इदं शुक्राय शन्नोदेवीरिति द
ध्यङ्ङाथर्वण ऋषिर्गायत्रीछन्दः शनिर्देवता शनिप्रीतये महातेजोग्नौ अमु
कसंख्यया शमीसमिद्धोमे विनियोगः ॐ शन्नोदेवीरभिष्टय आपो भवन्तु पीत

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्र.शां. २८

येशश्चोरभिः सचन्तु नः स्वाहा इदं शनये कया नश्चित्र इति वामदेव ऋषिर्गाय
त्री छन्दो राहुर्देवता राहुप्रीतये हुताशनाग्नौ दूर्वासमिद्धोमे विनियोगः ॐ कया नश्चि
त्र आ भुवदूती सदावृधः सखा कया शचिष्ठया वृता स्वाहा इदं राहवे केतुं कृण्व
न्निति मधुच्छन्द ऋषिः गायत्री छन्दः केतुर्देवता केतुप्रीतये रोहिताग्नौ अमुकसं
स्यकाकुशसमिद्धोमे विनियोगः ॐ केतुं कृण्वन्नकेतवे पेशो मर्य्या अपेशसे
समुषद्भिरजायथाः स्वाहा इदं केतवे एभिर्मन्त्रैः स्वाहान्तैः समिद्धोमं आज्येन
चरुणा तिलेनाज्येन च यथासंख्यं नवग्रहहोमं विधाय देवताविपर्य्ययेप्रा
यश्चित्तं होमद्रव्यविपर्य्ययेप्रायश्चित्तं न कुर्य्यात् अथाधिदेवतानां पालाश
समिद्भिर्होमः कार्य्यः त्र्यम्बकमिति वशिष्ठ ऋषिरनुष्टुप् छन्दो रुद्रो देवता रु
द्रप्रीतये पाला० ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् उर्वारुकमिव ब
न्धनान्मृत्योर्मुक्षीय मामृतात् स्वाहा इदं रुद्राय श्रीश्चत इति उत्तरनाराय
ण ऋषिः त्रिष्टुप् छंदः उमा देवता उमाप्रीतये पला० ॐ श्रीश्चते लक्ष्मीश्च
पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् इष्णन्निषाणामुम्म
इषाण सर्वलोकम्म इषाण स्वाहा इदं उमायै यदक्रन्द इति भार्गव जम
दग्निर्दीर्घतमस ऋषयः त्रिष्टुप् छन्दः स्कन्दो देवता स्कन्दप्रीतये पला० ॐ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ यदक्रन्दः प्रथमं जायमान उद्यत्समुद्रादुत वा पुरीषात् श्येनस्य पक्षा हरिण
स्य बाहू उपस्तुत्यं महि जातन्ते अर्वन् स्वाहा इदं स्कन्दाय सहस्रशीर्षेत्यस्य
नारायणो ऋषिरनुष्टुप्छन्दः पुरुषोदेवता पुरुषप्रीतये पत्नी० ॐ सहस्रशी
र्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिꣳ सर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गु
लम् स्वाहा इदं पुरुषाय ब्रह्मयज्ञानमिति प्रजापति ऋषिस्त्रिष्टुप् छन्दः
ब्रह्मदेवता ब्रह्मणः प्रीतये पत्नी० ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसी
मतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमस
तश्च विवः स्वाहा इदं ब्रह्मणे सजोषा इन्द्र इति परमेष्ठी ऋषि जगती छ
न्दः इन्द्रो देवता इन्द्रप्रीतये पत्नी० ॐ सजोषा इन्द्रः सगणो मरुद्भिः सोमं पिब
वृत्रहा शूर विद्वान् जहि शत्रूँ रप मृधो नुदस्वाथाभयं कृणुहि विश्वतो
नः उपयामगृहीतोसि इन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते स्वा०
हा इदमिन्द्राय आसीदयमिति भार्गवजमदग्निर्दीर्घतमस ऋषयः त्रिष्टु
प् छन्दः यमो देवता यमप्रीतये पत्नी० ॐ असि यमो अस्यादित्यो अर्व
न्नसि त्रितो गुह्येन व्रतेन असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि
बंधनानि स्वाहा इदं यमाय आपिप्यस्वादुदकस्पर्शः कामिरसीति दध्यङ्ङाथ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

कृ. ग्र. को.

वैराग्य ऋषिरनुष्टुप्छन्दः कालो देवता कालप्रीतये पत्ना० ॐ कार्षिरसि समुद्र-
स्यत्वाक्षित्या उन्नयामि समापो अद्भिरग्मतः समोषधीभिरोषधिः स्वाहा इदं
कालाय चित्रावसो इति परमेष्ठी ऋषिर्जगती छंदः चित्रगुप्तो देवता चित्रगुप्त
प्रीतये पत्ना० ॐ इन्धानास्त्वा शतꣳ हिमा द्युमन्तꣳ समिधीमहि वयस्वन्तो
वयस्कृतꣳ सहस्वन्तꣳ सहस्कृतम् अग्ने सपत्नदम्भनः मदब्धासो अदाभ्यं
चित्रावसो स्वस्तिते पारमशीय स्वाहा इदं चित्रगुप्ताय अथ देवतानां पत्ना
ग्रासामेट्टि होमः कार्यः अग्निं दूतमिति कण्वो मेधातिथिर्ऋषि गायत्री छं-
दोऽग्निर्देवता अग्निप्रीतये पत्ना० ॐ अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे देवाँ
आसादयादिह स्वाहा इदमग्नये अप्स्वन्तरिति बृहस्पति ऋषिः उष्णिक्छंदः
आपो देवताः पत्ना० ॐ अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा
भवत वाजिनः देवीरापो यो व ऊर्मिः प्रतूर्तिः ककुन्मान्वाजसास्तेनायं वा
जꣳ सेत् स्वाहा इदमद्भ्यः स्योना पृथिवीति मेधातिथिर्ऋषिर्गायत्री छंदः
पृथिवी देवता पृथिवीप्रीतये पत्ना० ॐ स्योना पृथिवी नो भवानृक्षरा निवेशि
नीयच्छानः शर्म सप्रथाः स्वाहा इदं पृथिव्यै इदं विष्णुरिति कण्वो मेधाति
थिर्ऋषि गायत्री छन्दः विष्णुर्देवता विष्णुप्रीतये पत्ना० ॐ इदं विष्णुर्विचक्र रामः

२१

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मे त्रेधा निदधे पदम् समूढमस्य पांꣳसुरे स्वाहा इदं विष्णवे त्रातारमिन्द्रमिति गार्ग्य
ऋषिस्त्रिष्टुप्छन्दः इन्द्रो देवता इन्द्रप्रीतये पला० ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ
हवेहवे सुहवꣳ शूरमिन्द्रम् ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धा
त्विन्द्रः स्वाहा इदमिन्द्राय अदित्या इति दध्यङ्ङाथर्वण ऋषिर्यजुश्छन्दः इ
न्द्राणी देवता इन्द्राणीप्रीतये पला० ॐ अदित्यै रास्नासीन्द्राण्या उष्णीषः पूषा
सि घर्माय दीष्व स्वाहा इदमिन्द्राण्यै प्रजापत इति हिरण्यगर्भ ऋषिस्त्रिष्टु
प्छन्दः प्रजापतिर्देवता प्रजापतिप्रीतये पला० ॐ प्रजापते न त्वदेतान्यन्यो विश्वा
रूपाणि परिता बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयी
णाम् स्वाहा इदं प्रजापतये नमोस्तु सर्पेभ्य इति देवा ऋषयोऽनुष्टुप्छन्दः
सर्पा देवताः सर्पाणां प्रीतये पला० ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा इदं सर्पेभ्यः ब्रह्मयज्ञा
नमिति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः ब्रह्मा देवता ब्रह्मणः प्रीतये पला० ॐ
ब्रह्मयज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः स बुध्न्या उपमा अ
स्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा इदं ब्रह्मणे अथ विनायका
दीनाम् गणानान्त्वेति प्रजापतिर्ऋषिर्यजुश्छन्दः विनायको देवता विनाय

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

कप्रीतये पत्ना० ॐ गणानान्त्वा गणपति ᳡ हवामहे प्रियाणान्त्वा प्रियपति
᳡ हवामहे निधीनान्त्वा निधिपति ᳡ हवामहे वसो मम आहमजानि गर्भध
मा त्वमजासि गर्भधम् स्वाहा इदं विनायकाय जातवेदसे इति कश्यप ऋ
षिस्त्रिष्टुप्छन्दो दुर्गादेवता दुर्गाप्रीतये पत्ना० ॐ जातवेदसे सुनवाम सोमम
रातीयतो निदहाति वेदः स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्य
ग्निः स्वाहा इदं दुर्गायै वातो वा मनो वेति गंधर्व ऋषय ऽ अनिरुक्त छन्दो वा
तो देवता वायुप्रीतये पत्ना० ॐ वातो वा मनो वा गंधर्वाः सप्तविंशतिः ते अ
ग्रे ऽश्वमयुञ्जंस्ते ऽ अस्मिन् जवमादधुः स्वाहा इदं वायवे ऊर्ध्वा अ
स्येति प्रजापति ऋषि अनुष्टुप्छन्दः आकाशो देवता आकाश प्रीतये पत्ना०
ॐ ऊर्ध्वा ऽ अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः द्युमत्तमा सुप्रती
कस्य सूनोः स्वाहा इदमाकाशाय आवाङ्क्षेति मेधातिथि ऋषिर्गाय
त्री छन्दः अश्विनौ देवते अश्विनोः प्रीतये पत्ना० ॐ आवाङ्कशा मधुमत्य
श्विना सूनृतावती तया यज्ञं मिमिक्षताम् उपयामगृहीतोऽस्यश्विभ्यां
त्वैष ते योनिर्माध्वीभ्यान्त्वा स्वाहा इदमश्विभ्याम् क्षेत्राधिपतये वास्तो
ष्पतये च बलिदानमेव कुर्यात् न तु होमम् तत इन्द्रादिदिक्पालानां पत्ना

राम
२८

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रासमिद्भिस्तिलाज्येन वा होमः त्रातारमिन्द्रमिति गार्ग्यऋषिस्त्रिष्टुप्छन्दः इन्द्रो
देवता होमे वि० ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् हु
यामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्तिनो मघवा धात्विन्द्रः स्वाहा इदमिन्द्राय अ
ग्निंदूतमिति विरूपाक्षऋषिस्त्रिष्टुप्छन्दो ग्निर्देवता अग्निप्रीतये होमे वि० ॐ
अग्निंदूतं पुरोदधे हव्यवाहमुपब्रुवे देवाꣳ२ आसादयादिह स्वाहा इद
मग्नये असियम इति भार्गवयमदग्निदीर्घतमस ऋषयः त्रिष्टुप्छन्दः
यमो देवता यमप्रीतये होमे वि० ॐ असियमो अस्यादित्यो अर्वन् त्रितो
गुह्येन व्रतेन असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि स्वा
हा· इदं यमाय एषते निर्ऋते इति वरुणऋषिर्जगती छन्दो निर्ऋतिर्देवता
निर्ऋतिप्रीतये होमे वि० ॐ एषते निर्ऋते भागस्तं जुषस्व स्वाहा अग्निनेत्रेभ्यो
देवेभ्यः पुरः सद्भ्यः स्वाहा यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः स्वाहा वि
श्वेदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा मित्रावरुणनेत्रेभ्यो वा मरुन्ने
त्रेभ्यो वा देवेभ्य उत्तरासद्भ्यः स्वाहा सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो
दुवस्वद्भ्यः स्वाहा· इदं निर्ऋतये इमम्मे वरुण इति शुनःशेपऋषिर्गायत्र्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ह० ग्र० गौ०
२९

पङ्क्तीछन्दो वरुणोदेवता वरुणप्रीतये पत्नी० ॐ इमम्मे वरुण श्रुधी हवमद्याच मृ
डय त्वामवस्युराचके स्वाहा इदं वरुणाय वातोवामनोवेति गंधर्वा ऋषय उ
ष्णिक्छन्दो वायुर्देवता वायुप्रीतये पत्नी० ॐ वातोवामनोवा गन्धर्वाः सप्तविंश
तिः ते अग्रेश्वमयुञ्जंस्ते अस्मिञ्जवमादधुः इदं वायवे वयꣳसोमेति
बन्धु ऋषिस्त्रिष्टुप्छन्दः कुबेरोदेवता कुबेरप्रीतये हो० ॐ वयꣳसोमव्रते तव मन
स्तनूषु बिभ्रतः प्रजावन्तं सचेमहि स्वाहा इदं कुबेराय तमीशानमिति गोतम
ऋषिर्जगतीछन्दः ईशानोदेवता ईशप्रीतये पत्नी० ॐ तमीशानञ्जगतस्तस्थु
षस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् पूषानो यथा वेदसामसद्वृधे रक्षि
ता पायुरदब्धः स्वस्तये स्वाहा इदमीशानाय ब्रह्मयज्ञानमिति प्रजापति
ऋषिस्त्रिष्टुप्छन्दो ब्रह्मादेवता ब्रह्मणः प्रीतये पत्नी० ॐ ब्रह्मयज्ञान
नम्प्रथमम्पुरस्ताद्विसीमतः सुरुचो वेन आवः स बुध्न्या ऽउपमा ऽअस्य वि
ष्ठाः सतश्च योनिमसतश्च विवः स्वाहा इदं ब्रह्मणे नमोस्तु सर्पेभ्य इति दे
वा ऋषयो ऽनुष्टुप्छन्दः सर्पादेवताः अनन्तप्रीतये हो० ॐ नमोस्तु सर्पेभ्यो
येकेच पृथिवीमनु ये ऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा इदम एमः

२९

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्नाय इति हुत्वा आज्येन भूरादिनवाहुतिहोमं विधाय ॐ अग्नये स्विष्टकृते स्वा
हा इदमग्नये स्विष्टकृते इति स्विष्टकृतमाज्येन जुहुयात् ततः संस्रवप्राशनम्
पवित्रप्रतिपत्तिः प्रणीताविमोकः यदि होमः ब्रह्मणे पूर्णपात्रदानम् तत्र संक
ल्पः अद्येहेत्यादि अमुकोहं अमुककर्मनिमित्तक ग्रहयागकर्मणः साङ्गफल
प्राप्तये साङ्गतार्थं अपूर्णपूर्णार्थं च इदं पूर्णपात्रं ससुवर्णं ब्रह्मन् तुभ्यमहं
सम्प्रददे इति दत्वा मन्त्रास्त्रिकं प्रति गृह्णीयात् अथ ग्रहाणां वलिदानविधिः
तत्र प्रतिग्रहं पूर्वोक्तद्रव्यैः पायसेन दध्यक्षतैर्वा उत्तरतो ग्रहवेदीसमीपे होमा
ग्निसमीपे वा वलिदानं कुर्यात् तत्र संकल्पः अद्येहेत्यादि अमुकोहं आदित्या
दिस्थापितदेवानां प्रीतये वलिदानं करिष्ये सदीपं वलिं संस्थाप्य भोभो सूर्य
एनं सदीपं गुडौदनवलिं पायसवलिं दध्यक्षतवलिं वा गृहाण मम अभवा
सपुत्रसपरिवारकस्य यजमानस्य आयुःकर्त्ता क्षेमकर्त्ता शान्तिकर्त्ता तुष्टि
कर्त्ता पुष्टिकर्त्ता भव एवमग्रेपि यथायथम् पूर्णं कर्त्ता भो२ सोम एनं घृतपायस
वलिं गृ० भो२ भौम एनं क्षीरगुडघृतादि निर्मितोत्कारिका परिनाम कसंयावलिं
गृ० भो२ बुध एनं क्षीरौदनवलिं० भो२ बृहस्पते एनं घृतौदनवलिं० भो२ शुक्र एनं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्ष॰ प्र॰ पा
६

नंदध्योदनबलिं गृ॰ भो२ शनैश्चर एनं कृशरान्नबलिं गृ॰ भो२ राहो एनं अजमांसब
लिं गृ॰ भो२ केतो एनं चित्रौदनबलिं गृ॰ अथाधिदेवतानाम् भो२ रुद्र सदीपमिनं गृ॰
भो२ उमे॰ आयुः कर्त्री॰ पुष्टिकर्त्री भव भो२ स्कंद॰ भो२ पुरुष॰ भो२ ब्रह्मन् भो२
इन्द्र॰ भो२ यम॰ भो२ काल॰ भो२ चित्रगुप्त॰ अथ प्रत्याधिदेवतानाम् भो२ अग्ने स
दीप॰ भो२ आपः सदीपमिनं गृह्णत आयुः कर्त्र्यो पुष्टिकर्त्र्यो भवत भो२ भूमे॰
आयुः कर्त्री॰ भो२ विष्णो॰ भो२ इन्द्र॰ भो२ इन्द्राणि॰ आयुः कर्त्री॰ भो२ प्रजापते॰
भो२ सर्पाः आयुः कर्त्तारः पुष्टिकर्त्तारो भवत भो२ ब्रह्मन्॰ अथ विनायकादी
नाम् भो२ विनायक॰ भो२ दुर्गे आयुः कर्त्री॰ भो२ वायो आयुः कर्त्ता॰ भो२ आकाश
भो२ अश्विनौ गृह्णतम्॰ आयुः कर्त्तारौ॰ पुष्टिकर्त्तारौ भवतम् अथेन्द्रादिदिक्पा
लानाम् भो२ इन्द्र॰ भो२ अग्ने॰ भो२ यम॰ भो२ निर्ऋते॰ भो२ वरुण भो२ वायो॰
भो२ कुबेर॰ भो२ ईशान॰ भो२ ब्रह्मन्॰ भो२ अनन्त॰ भो२ वास्तोष्पते॰ अथ क्षे
त्रपालबलिः पत्रपुटकोपरि कृशरान्नं निधाय तत्र गोधूमचूर्णनिर्म्मितं चतुर्व
र्त्तिकोपेतं दीपं सदक्षिणं संस्थाप्य क्षेत्रपालाय बलिदानं करिष्ये इति संक
ल्प्य दुर्वाक्षतताम्बूलद्रव्यचन्दनादिना सम्पूज्य क्षेत्रपालं ध्यायेत् यथा॰ यथा॰ रामक्ष

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जंघं जटाधरं त्रिनयनं नीलाञ्जनाद्रिप्रभं दंष्ट्राकरालाननं गदाकपालमसता
स्त्रग्गंधवस्त्रावृतम् घण्टाघुर्घुरमेखलध्वनिमिलद्धुंकारभीमं विभुं वन्दे सं
हितसर्पकुण्डलधरं श्रीक्षेत्रपालं सदा इति ध्यात्वा कृशरान्नबलिमादाय
ॐ नमो भगवते क्षेत्रपालाय क्षां क्षीं क्षूं क्षैं क्षौं क्षः भूतप्रेतपिशाच डाकिनी
शाकिनी वेतालादिपरिवारयुताय इमं सदीपं सदक्षिणं सताम्बूलं कृश
रान्नबलिं नमः भो भो क्षेत्रपाल मरु २ तुरु २ लल २ मम २ हुं फेंकारपूरितदिङ्मु
ख रक्ष २ ग्रहमखकर्म्मणि इमं सदीपं कृशरान्नबलिं भक्ष २ यजमानं पा
हि २ मम वा सपुत्रसपरिवारस्य यजमानस्य वा आयुःकर्त्ता क्षेमकर्त्ता शा
न्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता भव इति मन्त्रेण दत्वा ततश्चतुष्पथे क्षिपेत्
तत आचम्य द्यौः शान्तिरिति मन्त्रेण तत्स्थलं सम्प्रोक्षयेत् इति बलिदानवि
धिः ततः पूर्णाहुतिहोमं विदध्यात् तत्र मन्त्राः कुशकण्डिकान्ते अग्निपूजनं
अग्न्यालम्भनं कुर्य्यात् स्वानुक्तविधिना स्वानुक्तविधाने आचार्य्यादिभ्यो
दक्षिणां दद्यात् तत्र दक्षिणानियमः आचार्य्यस्य तु यद्द्रव्यं तदर्धं ब्रह्म
णो भवेत् तदर्धमृत्विगादीनां मन्त्रेभ्यश्च तदर्धकम् शतहोमे माषमेकं
सहस्रे दशमाषकम् अयुत शतमाषं स्याल्लक्षे माषसहस्रकम् अयुग्म

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हाणांप्रीतये प्रत्येकं दानानि आदित्यप्रीतये कपिलागौः सोमाय शङ्खम् भौमा
य रक्तवृषभः बुधाय स्वर्णम् बृहस्पतये स्वर्णं पीतवस्त्रम् शुक्राय श्वेता
श्वः शनये कृष्णागौः राहवे खड्गः केतवे छागः यथोक्तद्रव्यालाभे सर्वेषां प्रीतये
स्वर्णमेव तत्र संकल्पः अद्येत्यादि अमुकोहं अमुककर्मनिमित्तकय
ज्ञयागकर्मणः साङ्गफलप्राप्तये सांगुण्यार्थं च आदित्यादिनवग्रहाणां
प्रीतये इदं स्वर्णं यथोक्तदक्षिणां च आचार्यब्रह्मर्त्विक्सदस्येभ्यो ऽन्येभ्यो
ब्राह्मणेभ्यश्च ब्राह्मणेभ्यश्च यथांशेन विभज्य दास्ये ॐ तत्सन्मम तथा
श्चोपपन्नेनान्नेन यथासंख्याकान्ब्राह्मणान्भोजयिष्ये इति संकल्प्य
दक्षिणां दत्वा अग्निं प्रदक्षिणीकृत्य विसर्जयेत् ततः उत्तरेण गत्वा ग्रहान्स
म्पूज्य ततः आचार्यादयः सर्वे ब्राह्मणाः कलशोदकेन वक्ष्यमाणैर्वैदिक
पौराणिकमन्त्रैः भद्रासनोपविष्टस्य सकुटुम्बस्य यजमानस्य शिरसि अ
भिषेकं कुर्युः तत्र वैदिकमन्त्राः ॐ सर्वे समुद्राः सरितः तीर्थानि जलदा न
दाः आयान्तु यजमानस्य दुरितक्षयकारकाः १ ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो ऽरिष्टनेमिः स्वस्ति नो बृहस्पति
र्दधातु २ ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पयस्वतीः प्रदिशः सन्तु मह्यम् ३ ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः
स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ४ ॐ अग्निर्देवता वातो देवता
सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवता दित्या देवता मरुतो देवता वि
श्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ५ मूर्द्धासि राड् ध्रुवासि
धरुणा धर्त्र्यसि धरणी आयुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा ६ द्यौः
शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्
पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा
मा शान्तिरेधि स्म शान्तिर्भवतु ७ ॐ विश्वानि देव सवितर्दुरितानि परासुव यद्भ
द्रन्तन्न आसुव ८ ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्
सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ९ ॐ देवस्य त्वा
सवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् सरस्वत्यै वाचो यन्तुर्य
न्त्रियै दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चामि १० ॐ देवस्य त्वा
सवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् अश्विनोर्भैषज्येन वीर्याया
न्नाद्यायाभिषिञ्चामि इन्द्रस्येन्द्रियेण बलाय श्रियै यशसाभिषिञ्चा
मि ११ कोसि कतमोसि कस्मै त्वा काय त्वा सुश्लोक सुमङ्गल सत्यराज

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२ १२ ॐ शिरोमेश्रीर्य्यशो मुखन्त्विषिः केशाः स्मश्रूणि राजामे प्राणो अमृ
तं सम्राट् चक्षुर्विराट् श्रोत्रम् १३ जिह्वामेभद्रं वाङ्महोमनोमन्युः स्वराड्भामः
मोदाः प्रमोदा अङ्गुलीरङ्गानि मित्रम्मे सहः १४ बाहूमेवलमिन्द्रिय
ञ्च हस्तौमेकर्म्मवीर्य्यम् आत्माक्षत्रमुरोमम १५ पृष्ठीर्मेराष्ट्रमुदरमंसौ
ग्रीवाश्च श्रोणी ऊरू अरत्नी जानुनी विशोमेङ्गानिसर्वतः १६ नाभिर्मेचित्तं
विज्ञानम्पायुर्मेपचितिर्भसत् आनंदनंदावाण्डौमेभगः सौभाग्यम्पसः ज
ङ्घाभ्याम्पद्भ्यान्धर्म्मोस्मि विशिराजाप्रतिष्ठितः १७ प्रतिक्षत्रेप्रतितिष्ठामि
राष्ट्रे प्रत्यश्वेषुप्रतितिष्ठामिगोषु प्रत्यङ्गेषु प्रतितिष्ठामि आत्मन्प्रति
प्राणेषु प्रतितिष्ठामिपुष्टे प्रतिद्यावापृथिव्योः प्रतितिष्ठामियज्ञे १८ त्रया
देवा एकादशत्रयस्त्रिंशाः सुराधसः बृहस्पतिपुरोहिताः देवस्यसवितुः स
वेदेवादेवैरवन्तु माम् १९ प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्ये
नसत्यं यज्ञेनयज्ञोयजुर्भिर्य्यजूंषि सामभिः सामान्यृग्भिर्ऋचः पुरोनु
वाक्याभिः पुरोनुवाक्यायाज्याभिर्याज्यावषट्कारैर्वषट्कारा आहुतीभि
राहुतयो मेकामान्समर्द्धयन्तु २० तन्नूंवायुरपृणीमहि मन्युमग्ने मगान्
मत्रापीतर्य्येदेवी स्वस्तिरस्तुनः स्वस्तिर्म्मामुञ्चस्वः १ उर्द्धमित्रातु भेषजम्

सम: २२

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्न्धोऽस्माद्विपरशां चतुम्भेद २१ ॐ यतइन्द्रभयामहेततोनोऽभयङ्कृधि मघवच्छ
दितवन्तऽऊतिभिर्विद्विषो विमृधोजहि २२ समुद्रज्येष्ठासलिलस्यमध्यात्पुनानाय
न्त्यभिविशमानाः इन्द्रोयावज्री वृषभोरराद स्ताऽआपोदेवीरिहमामवन्तु २३ यासां
राजावरुणोयातिमध्येऽअपश्यञ्जनानां मधुश्चुतः शुचयिसन्धास्ताऽआपोदे
वीरिहमामवन्तु २४ याऽआपोदिव्याऽउतवास्रवन्ति खनित्रिमा उतवास्वयंजाः
समुद्रार्थायाः शुचयः पावकास्ताऽआपोदेवीरिहमामवन्तु २५ यासुराजावरु
णो यासुसोमोविश्वेदेवायासूर्ज्जंमदन्ति वैश्वानरोयास्वग्निःप्रविष्टास्ताऽ
आपोदेवीरिहमामवन्तु २६ आयन्तामिहदेव्याआयन्तांमरुतांगणाः आयु
नोविश्वाभूतानि यथायमरपआसत २७ आपऽऊर्द्धाउभसजं आपोऽअमी
वचातनी आपः सर्वस्यभेषजीस्तास्तेकृण्वन्तुभेषजम् २८ हस्ताभ्यांदशशाखा
भ्यां जिह्वावाच पुरोगवी अनामयित्नुभ्यां ताभ्यांत्वोपस्पृशामि २९ इमा
ऽआपः शिवतमाऽइमाराष्ट्रस्यभेषजीः इमाराष्ट्रस्यवर्द्धिनी रिमाराष्ट्रभृतो
मता ३० याभिरिन्द्रमभिषिञ्चन् प्रजापतिं सोमंराजानं वरुणंयमंमनुं स्ताभि
रिन्द्रमभिषिञ्चामि त्वामहंराज्ञां त्वमधिराजोभवेहम् ३१ महान्तंत्वामहीनां
सम्राजंचर्षणीनाम् देवीजनित्र्यजीजनत् ३२ ॐ देवस्यत्वासवितुःप्रसव

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्विनोर्बाहुभ्यां अग्नेस्तेजसा सूर्यस्य वर्चसे न्द्रियेणाभिषिञ्चामि बलाय श्रि
यै यशसेन्नाद्याय ३३ ॐ शान्तिरस्तु पुष्टिरस्तु तुष्टिरस्तु सर्वकुशलमस्तु यत्पापं रो
गः शोकः कष्टं दुःस्वप्नं दारिद्र्यं तत्प्रतिहतमस्तु ॐ भूर्भुवः स्वः अमृताभिषेको स्तु
अथ पौराणिक मन्त्राः सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः वासुदेवो ज
गन्नाथ स्तथा संकर्षणो विभुः १ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते आख
ण्डलोग्निर्भगवान् यमो वै निर्ऋतिस्तथा २ वरुणः पवनश्चैव धनाध्यक्षस्तथा
शिवः ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु वः सदा ३ कीर्तिर्लक्ष्मीर्धृति
मेधा पुष्टिः श्रद्धा क्रिया मतिः बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ४
एतास्त्वामभिषिञ्चन्तु धर्मपत्न्यः समागताः आदित्यश्चन्द्रमा भौमो बुधजीव
सितार्कजाः ५ ग्रहास्त्वामभिषिञ्चन्तु राहुकेतुसमन्विताः देवदानवगंधर्वा
यक्षराक्षसपन्नगाः ६ ऋषयो मनवो गावो देवमातर एव च देवपत्न्यो द्रुमा नागा
दैत्याश्चाप्सरसां गणाः ७ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च औषधा
नि रत्नानि कालस्यावयवाश्च ये ८ सरितः सागराः शैला स्तीर्थानि जलदा नदाः
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ९ विघ्नेशः क्षेत्रपो दुर्गा लोकपा
लानवग्रहाः सर्वदोषप्रशमनं सर्वे कुर्वन्तु शान्तिदाः १० ॐ भूत्वमपाहिनो दे

राम: ३३

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वीति अभिषेकं कृत्वा ॐ महामायाप्रसादास्तु इत्यभिषेकः अथ तिलककरणम्
तत्र तिलकमहिमा आयुर्वृद्धिः शुभारोग्यं यशस्तेजोबलं प्रजा तिलकेन कृतेनेह
भूयादस्य सदोपितम् १ धनं सौभाग्यमारोग्यं ब्रह्मतेजोऽमलामतिः ब्रह्मपुत्र
भवेत्तेजो भवेत्तिलके कृते २ अथ तिलककरणमन्त्रः ॐ भद्रमस्तु शिवं चास्तु
महालक्ष्मीप्रसीदतु रक्षन्तु त्वां सदा देवाः सम्पदः सन्तु सर्वदा १ सपत्ना दुर्ग्रहा
पापा दुष्टसत्वाद्युपद्रवाः तमालपत्रमालोक्य निष्प्रभावा भवन्तु ते इति पृथक्तिलक
चन्दनादिना तिलकं कुर्युः ॐ अक्षताः पान्तु इति तिलकाक्षतारोपणम् पुर
मारणाम् स्त्रीणां तु विशेषः सुअनिवृध्यमतम् अवन्तु परितस्सुमः रोचनाच
नादेवि इति तिलकम् अक्षतापान्तु इत्यक्षतारोपणम् अथ मन्त्रपाठः ॐ
गणानां त्वा० १ ॐ ब्रह्मयज्ञानं० २ ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः
दिवीव चक्षुराततम् त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः अतो धर्माणि
धारयन् तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत्परमं पदम् ३
ॐ त्र्यम्बकं यजा० ४ ॐ समस्त्वे० ॐ आकृष्णेन० ॐ इमं देवा० ॐ अग्निर्मूर्द्धा०
ॐ उद्बुध्य० ॐ बृहस्पते० ॐ अन्नात्परि० ॐ शन्नो देवी० ॐ कयान० ॐ केतुं कृ
ण्वन्न० १४ ॐ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रे यत्तेनत्वं न मर्द्धुमस्त्व सत्याः सन्तु यजमानस्य कामाः १५ ॐ कामं कामदु
घे धक्ष्व मित्राय वरुणाय च इन्द्रायाश्विभ्यां पूष्णे प्रजाभ्य ओषधीभ्यः
१६ दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम् अथो त्वं दीर्घायुर्भू
त्वा शतवल्शा विरोहतात् १७ ॐ सहस्रस्य प्रतिमासि सहस्रस्य प्रमासि
सहस्रस्योन्मासि साहस्रोऽसि सहस्राय त्वा १८ यज्ञं यज्ञं गच्छ यज्ञपतिं गच्छ
स्वां योनिं गच्छ स्वाहा एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व
स्वाहा १९ ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविशात् पवमानं महीयते धान्यं धनं
पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः २० मन्त्रार्थाः सफलाः सन्तु पूर्णाः स
न्तु मनोरथाः शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव २१ पूर्तिपुन आशाम्
अथ स्वस्तीर्णाय च पाठः श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रू
पमश्विनौ व्यात्तम् इष्णन्निषाण मुम्म इषाण सर्वलोकं म इषाण १ तस्य
त्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरथवा हिरण्यैः नाकं गृभ्णानाः सुकृतस्य
लोके तृतीये पृष्ठे अधि रोचने दिवः २ पुत्रमिव पितरावश्विना वेन्द्रावथुः का
व्यैर्दंसनाभिः यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ३

एक
३४

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आयुष्मती पुत्रवतीसौभाग्यवतीजीववत्साभव इति ततो
मन्त्राशिषः सफलाः सन्तु आयुष्मती पुत्रवतीसौभाग्यवतीजीववत्साभव इति ततो
रक्षाबंधनम् तत्र मंत्रो ॐ रक्षसाम्भागोसि निष्टप्तं रक्षोभितिष्ठामिदमहं ८
भावयाधः इदमहं रक्षोधमंतमोनयामि १ येनबद्धोबलीराजा दानवेन्द्रो महा
हाबलः तेनत्वामभिबध्नामि रक्षे माचल माचल २ त्वंरक्षाविष्णुदामुखो नृः
पाहिभृगुधीगिरः रक्षातोकमुतत्मनारक्षा करक्षाभूयात् ३ ततोभूयसीं
कल्पयः अद्येहेत्यादि अमुकोहं अमुककर्मनिमित्तक ग्रहयागकर्मणः
साङ्गुण्यार्थं इमांभूयसींदक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यः तथान्येभ्यो
दीनानाथेभ्यश्च विभज्यदातुम् त्सृजे तत्सतममम यस्यस्मृत्येतिपठेत्
इतिग्रहयागपद्धतिः अथघृतच्छाया आज्यपात्रे घृतपूरितंमद्रव्यं
कृत्वा चन्दनाक्षतपुष्पधूपदीपनैवेद्यैः सम्पूज्य कुशोदूर्वाभिर्वा मन्त्रैरभिमंत्रये
त् मन्त्राः ॐ आज्यंपरमसश्रीकमाज्यंतेजोमहोनिधिः आज्यंहिदेव
देवानां प्रियमाज्येस्थितंजगत् तदाज्यवीक्षणाभक्त्या कृतंमंगलमाप्नुयात्
दुःस्वप्नं दुर्निमित्तंच विघ्नौघो नश्यतिध्रुवम् तेजः प्रशान्यशौर्यंच बलंचा
पिप्रवर्द्धतेः पुरामंत्रप्राङ्राज्यंच भवेदन्यदपीप्सितम् ज्ञात्वावाऽज्ञानतो
वापि मनोवाक्कायकर्मभिः कृतंतत्पातकंनश्येत् घृतस्पर्शाद्विनश्यत् आज्ये

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चैवमुखंदृष्ट्वा सर्वपापैः प्रमुच्यते इत्यभिमन्त्र्य सङ्कल्पः अद्येहामुकगोत्रोऽमु
कराशिरमुकशर्म्माहं सर्वारिष्टविनाशार्थं आज्यावेक्षणं करिष्ये ॐ तेजो
सीति परमेष्ठी ऋषिः त्रिष्टुप्छन्दः आज्यं देवता आज्यावेक्षणे विनियोगः ॐ
तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानां मनाधृष्टं देवयजन
मसि आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम् आज्येन देवास्तृप्यन्ति आ
ज्ये लोकाः प्रतिष्ठिताः भौमान्तरिक्षं दिव्यं वा यन्मे कल्मषमागतम् तत्स
र्वमाज्यसंस्पर्शात् प्रणाशमुपगच्छतु आज्ये चैवमुखंदृष्ट्वा सर्वपापैः
प्रमुच्यते ॐ ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजयापशुभिर्भू
यात् घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छा
या छायादर्शने पापनाशनम् इत्यवलोक्याज्यस्पर्शं कृत्वा सङ्कल्पः
अद्येहामुकराशिरमुकशर्म्माहं इदमवलोकितमाज्यं ताम्रपात्रस्थितं
सद्रव्यं मृत्युञ्जयदैवतं मृत्युञ्जयप्रीतये सर्वारिष्टपरिहारार्थं अमुक
गोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ॐ तत्सत् न मम ब्राह्म
णोऽसम्पूज्य दद्यात् दानवाक्यं पठेत् कामधेनोः समुद्भूतं देवानाममृतं महत् हविः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

उदंपत्यंवि स्पृयेनानिरियितं

तस्माघदस्त्रामंभवेत् तत्रापत्यंप्रजायेत तस्माहस्तं चवं त्यजेत् पित्र्यंपौष्णंचज्ये
ष्ठंच यत्नतो वर्ज्जयेद्बुधः षोडशर्तुनिशाः स्त्रीणां तासु युग्मासु संविशेत् अमू
दिनस्य युग्मत्वेऽपि अमूपास्यान्मध्यमः कृत इति वचनात् अमू दिने त्याज्यम्
तस्माद्रजोदर्शनादारभ्य चतस्रो रात्रीस्त्यक्त्वा पञ्चमीसप्तम्यो अयुग्मत्वात्
षष्ठीं निषिद्धत्वात् सन्त्यज्य अष्टमीमारभ्य षोडशीपर्यन्तं युग्मासु एकस्मि
चन्द्रतारानुकूलासु मघारेवतीज्येष्ठानक्षत्रवर्ज्जितासु अनुयोगिनीं स्वलंकृ
तां स्त्रियं स्वयंच स्वलङ्कृतो द्विगुणागुणाः शुभलग्ने रात्रौ गर्भाधानं कुर्यात्
तत्र मंत्राः ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिञ्चतु प्र
जापतिर्धाता गर्भं दधातु ते १ ॐ गर्भं धेहि सिनीवाली गर्भं धेहि सरस्वती
गर्भं तेऽश्विनौ देवा वाधत्तां पुष्करस्रजौ २ ॐ हिरण्यये अरणीयं
निर्म्मथतो अश्विना सह ॰ तंते गर्भं हवामहे दशमे मासि सूतवे २ ॐ रू
पं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय इन्द्रो मायाभिः पुरुरू
पईयते युक्ता हरयः शतादश इति पठित्वा अभिगमनं कुर्यात् ततः शौ
चं विधायाचम्य वध्वा दक्षिणांसस्योपरि हस्तं नीत्वा हृदयमालभेत ॐ
यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम् वेदाहं तन्मां तद्विद्यात् पश्येम शरदः

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदंपत्रंविस्मयेनलिखितं

गानम् इति पठित्वा ताम्बूलचर्वणं कुर्वीत यद्यादिगर्भं न दधाति तत्रोपायमाह
सैंहम्याः श्वेतपुष्पिकायाः मूलं मूलनक्षत्रे उत्पाट्य उदकेन पिष्ट्वा चतुर्थेऽहनि स्ना
तायां निशायां वध्वा दक्षिणस्यां नासिकायां आसिञ्चति तत्र मंत्रः ॐ इय
मोषधी त्रायमाणा सहमाना सरस्वती अस्या अहं बृहत्याः पुत्रः पितुरि
वनामग्रभम् तथा द्वितीयोपायमाह पिण्डपितृयज्ञे नवघ्रातं मध्यमं पिण्डं
पत्नीं प्राशयेत् मन्त्रः ॐ आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् यथेह पु
रुषोऽसत् तथा तृतीयोपायमाह नित्यहोमात्पूर्वं अनेन मन्त्रेण स्त्री
एकामाहुतिं जुहुयात् ॐ पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ
पुमानिन्द्रश्च सूर्यश्च पुमांसं वर्द्धतां मयि स्वाहेति ततो योनिस्फुरणादि
ना गर्भाधानं ज्ञातमिति निश्चित्य व्यायामातिभोजन दिवास्वापारोह
ण कुक्कुटासनादीनि वर्जयेत् ततः प्रातर्दक्षिणां दद्यात् इति गर्भाधानसं
स्कारः अथ पुंसवनम् तत्र पारस्करसूत्रम् मासे तृतीये पुंसवनं कुर्यात्
तत्र गर्भाधानप्रभृति तृतीये मासि पुंनक्षत्रे यस्मिन् दिने पुष्यश्रवणा ह
स्तमृगशीर्षादि नक्षत्रयोगेन चन्द्रमा भवति तस्मिन् चन्द्रताराऽनुकूले ३६

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आयुर्वृद्धिकरं दातु रक्षां पातु सदैव माम् ब्राह्मणाश्च मंत्रसिक्तं स्यात् ॐ त्र्य
म्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृ
तात् श्रीमृत्युञ्जयप्रसादात् इति मृत्युरक्षा अथ अच्छिद्रमंत्राः व्रतानां
व्रतराजेन्द्र व्रतानां व्रतमुत्तमम् व्रतच्छिद्रं तपच्छिद्रं यच्छिद्रं यज्ञकर्मणि सर्वं
भवतु मेऽच्छिद्रं ब्राह्मणा भयतागिरा ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि दे
वता सर्वदेवमयो विप्रो न तद्वचनमन्यथा उपवासो व्रतं चैव स्नानं तीर्थं फलं
तपः विप्रैः संभावितं यस्य सम्पूर्णं भवतु व्रतं अन्नं वस्त्र अन्नपानं च सप्पावां
नाम्रभाजने यदि भुक्तमभुक्तं वा स्व प्रान्तर मध्यापि वा दिनान्तराविलग्ने वा
सम्पतो मम रदनैः व्यासवाल्मीक वचनात्पाराशर वशिष्ठ कृष्णाः वचनं ना
रदादीनां सम्पूर्णं भवतु व्रतं कृतमेतदमुकव्रतं विधिहीनं दशाहीनं काल
हीनं श्रद्धाहीनं क्रियाहीनं पापहीनं यत्कृतं तत्सुकृतमस्तु यन्नकृतं त
र श्रीविष्णोः प्रसादात् ब्राह्मणवचनात् सर्वं परिपूर्णमस्तु अस्तु परि
पूर्णम् इति अच्छिद्रमंत्राः अथ कर्मप्रयोगे गर्भाधान संस्कारः तत्र प्रसंगा
द्रजस्वलाधर्मानाह व्यासः रजोदर्शनाद् ध्याः सर्वमेव परित्यजेत् सावेग

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वस्नानात्रीणि रक्षिता स्वगृहे वसेत् एकाम्बरधरा साध्वी नानालङ्कारवर्जिता मौनीन्य
धोमुखी चक्षुः पाणिपद्भिरचञ्चला अश्नीयात्केवलं नक्तं भक्तं मृण्मयभाजने स्व
पेद्भूमावप्रमत्ता जपेदेवमहस्त्रयम् स्नानादर्शनत्रयवती सचैला नुदिते रवौ विलोक्य
भर्तृवक्त्रं शुद्धा भवति धर्मतः शुद्धा भर्तुश्चतुर्थे ऽह्नि स्नानेन स्त्री रजस्वला दैवे क
र्मणि पित्र्ये च पञ्चमे ऽहनि शुध्यति ६ अथ स्नानानन्तरं पुनरपि रजोदर्शने गा
ते शुद्धा स्यात्स्याहापस्तम्बः रजस्वला यदा स्नाता पुनरेव रजस्वला अष्टादशादि
नादर्वाग्गमुचित्वं न विद्यते अथ गर्भाधानप्रयोगः तत्र प्रथमरजोदर्शने जातेप्रा
नः भर्त्ता अभ्यङ्गपूर्वकं स्नात्वा सर्वौषधिसप्तमृत्तिका पञ्चत्वक् पञ्चपल्लवस
हितकलशोदकेन वधूं स्नापयित्वा अहते धौते वाससी परिधाप्य स्वासने सम
पविश्य आचम्य अर्घं संस्थाप्य प्राणानायम्य कृत्वा गणेशपूजासंकल्पः अद्येह
त्यादि अमुकगोत्रो ऽमुकशर्मा ऽमुकोहं अमुकराशेरस्या वध्वाः संस्कारातिश
यद्वारा अस्यां जनिष्यमाण सर्वगर्भाणां बीजगर्भसमुद्भवैनो निबर्हणद्वारा श्री
परमेश्वरप्रीत्यर्थं गर्भाधानसंस्कारं करिष्ये तत्पूर्वाङ्गत्वेन गणेशपूजनं मातृपूजनं
नान्दीश्राद्धं पुण्याहवाचनानि करिष्ये इति संकल्प्य गणेशपूजां मातृपूजां ना
न्दीश्राद्धं पुण्याहवाचनानि विधाय गर्भाधानं कुर्य्यात् यस्मिन्नृक्षे भवेद्गर्भ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्माद्य दशमंभवेत् तत्रापत्यंप्रजायेत तस्मात्दसत्रयंत्यजेत् पित्रंपौत्रंचज्येष्ठांत्य यत्नतो
वर्ज्जयेद्बुधः षोडशर्तुनिशाः स्त्रीणां तास्वयुग्मासुसंविशेत् अमृदिनस्ययुग्मत्वेऽपि
मस्तुर्मास्यान्मध्यमःसुत इतिवचनात् अमृदिनंत्वाज्यम् तस्माद्रजोदर्शनादारभ्य चतस्रो
रात्रीस्त्यक्त्वा पञ्चमीसप्तम्यौ अयुग्मत्यात् अष्टमींनिन्दितत्वात् सन्तज्य अष्टमीमारभ्य
षोडशीपर्य्यन्तं युग्मासुरात्रिषु चन्द्रताराऽनुकूलासु मघारेवतीज्येष्ठानक्षत्रवर्ज्जितासु
अनुरागिणीं स्वलंकृतां स्त्रियं स्वयंचस्वलङ्कृतो ताम्बूलाणाङ्गरागः सल्लग्ने रात्रौ गर्भाधानंकु
र्य्यात् तत्रमन्त्राः ॐ विष्णुर्योनिं कल्पयतु त्वष्टारूपाणि पिंशतु आसिञ्चतु प्रजापतिर्धाता
गर्भंदधातु ते १ ॐ गर्भंधेहिसिनीवाली गर्भंधेहिसरस्वती गर्भन्तेऽश्विनौदेवावाध
त्ताम्पुष्करस्रजौ ॐ हिरण्ययीऽअरणीयं निर्मन्थतो अश्विनासह तंतेगर्भंहवामहे दश
मेमासिसूतवे ३ ॐ रूपंरूपंप्रतिरूपोबभूव तदस्यरूपंप्रतिचक्षणाय इन्द्रोमायाभिः
पुरुरूपईयते युक्ताह्यस्य हरयः शतादश इतिपठित्वा अभिगमनंकुर्य्यात् ततोऽन्यंविधाय वध्वा
दक्षिणांसस्योपरि हस्तंनीत्वा हृदयमालभेत ॐ यत्तेसुसीमे हृदयंदिविचन्द्रमसिश्रि
तम् वेदाहंतन्मांविद्यात् पश्येम शरदः शतम् इतिपठित्वा ताम्बूलचर्वणंकुर्वीत एवंयदिग
र्भंनदधाति तत्रोपायमाह सौहल्याः स्यात् पुत्रिण्यकामूलं मूलनक्षत्रे उत्पाट्य उदपेषंपिष्ट्वा
चतुर्थेहनिस्नातायानिशायां वध्वादक्षिणस्यांनासिकायां मासिञ्चति तत्रमंत्रः ॐ
इयमोषधीत्रायमाणा सहमाना सरस्वती अस्याःअहं बृहत्याः पुत्रः पितुरिवजा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गृभम् तथाद्वितीयोपायमाह पिण्डपितृयज्ञेऽवघ्रातं मध्यमंपिण्डं पत्नीं प्राशयेत् मन्त्रः
ॐ आधत्तपितरोगर्भं कुमारं पुष्करस्रजं यथेह पुरुषोसदिति तथातृतीयोपायमाह नित्य
होमात्पूर्वं अनेनमन्त्रेण स्त्रीसकामाहुतिं जुहुयात् ॐ पुमांसौ मित्रावरुणौ पुमांसावश्विना
वुभौ पुमानिन्द्रश्च सूर्यश्च पुमांसंवर्द्धतामयि स्वाहेति ततोयोनिस्फुरणादिना गर्भा
धानंजातमितिनिश्चित्य व्यायामातिभोजन दिवास्वापारोहण कष्टुकासनादीनि वर्जये
त् ततः प्रातर्दक्षिणांदद्यात् इतिगर्भाधानसंस्कारः अथजातकर्मविधिः अथपुत्रे
जाते पिताशीघ्रंसचैलंस्नायात् स्नानसंकल्पः अद्येहामुकोहं पुत्रजनननिमित्तकं सचै
लस्नानंकरिष्ये इतिसंकल्प्य स्नात्वा शुभेनवेधौतेवाससीपरिधाय प्राङ्मुख उपवि
श्य नालच्छेदात्पूर्वं गणेशाद्यपूजनंकुर्य्यात् पूजासामग्रींसम्पाद्य अद्येहामुकोहं जात
स्यपुत्रस्य दीर्घायुरारोग्यावाप्तये करिष्यमाणजातकर्मकर्मणि निर्विघ्नताका
म्यसिद्ध्यै पूर्वांगत्वेन गणेशाद्यपूजनंकरिष्ये इतिसंकल्प्य उक्तप्रकारेणगणेशादीन्सम्पू
ज्य दक्षिणांदत्वा प्रधानसंकल्पं कुर्य्यात् अद्येहेत्यादि संकीर्त्य अमुकोहं अ
स्यकुमारस्य गर्भाम्बुपानजनितसकलदोषनिबर्हणायुर्मेधाभिवृद्ध्यै बीज
गर्भसमुद्भवैनोनिबर्हणाद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्माख्यंसंस्कारं करिष्ये
ततोमातृपूजासंकल्पः अद्येहामुकोहं पुत्रजनननिमित्तकं गौर्यादिषोडशमा
तृणांपूजनंकरिष्ये इतिसंकल्प्य तासांपूजनंपूर्वोक्तप्रकारेणविधाय वसोर्धारा रामः
३७

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पोतयित्वा आभ्युदयिकश्राद्धं विदध्यात् तत्रप्रतिज्ञायां अद्येहेत्यादि अमुकगोत्राणां अस्म
न्मातृपितामही प्रपितामहीनां अमुकामुकीदेवीनां नान्दीमुखीनां तथा अमुकगोत्राणां अ
स्मत्पितृपितामह प्रपितामहानां अमुकामुकदेवानां नान्दीमुखानां तथा अमुकगोत्रा
णां अस्मन्मातामह प्रमातामहानां वृद्धप्रमातामहानां अमुकामुकदेवानां सपत्नीका
नां नान्दीमुखानां सत्यवसुसंज्ञक विश्वेदेवापूर्वकं संक्षिप्तसंकल्पविधानेन नांदी
मुखश्राद्धं करिष्ये नमो वृद्धि २ स्त्रियै इति संकल्प्य पूर्वोक्तविधानेन नान्दीश्राद्धं विधा
य. पुण्याहं वाचयेत् यथा अमुकोहं जातस्य पुत्रस्य करिष्यमाणजातकर्म्म क
र्मणि सकलमङ्गलाभिवृद्ध्यर्थं ब्राह्मणद्वारा पुण्याहं वाचये तदङ्गत्वेन चतुर्णां
ब्राह्मणानां पूजनं वरणं च करिष्ये इति संकल्प्य कृत्वा स्वस्तिवाचयित्वा कलशेन
वग्रहानावाह्य सम्पूज्य पुत्रस्य मेधाजननाख्यं कर्म कुर्यात् तत्र स्वर्णादि तेजसे
पात्रे मधुघृते मेलयित्वा केवलं घृतं वा स्वर्णान्तर्हितया नामिकया ऽऽदाय जातं
कुमारं सकृत्प्राशयति जातस्य जिह्वामनुमार्ष्टि त्र्यंशैः तत्र मंत्रः ॐ भूस्त्वयि दधामि
ॐ भुवस्त्वयि दधामि ॐ स्वस्त्वयि दधामि ॐ भूर्भुवः स्वः सर्वं त्वयि दधामि इति म
न्त्रैःप्राशयेत् इति मेधाजननम् अथायुष्यकरणम् अथ जातस्य नाभिस
मीपे दक्षिणकर्णसमीपे वा जपति ॐ अग्निरायुष्मान् स वनस्पतिभिरायुष्मान्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आ

तेनत्वायुषायुष्मन्तं करोमि १ ॐ सोम आयुष्मान्स ओषधीभिरायुष्मान् तेनत्वायुषा
युष्मन्तं करोमि २ ॐ ब्रह्म आयुष्मत् तद्ब्राह्मणैरायुष्मत् तेनत्वायुषायुष्मन्तं क
रोमि ३ ॐ देवा आयुष्मन्तस्ते ऽमृतेनायुष्मन्तः तेनत्वायुषायुष्मन्तं करोमि ४ ॐ ऋ
षय आयुष्मन्तस्ते व्रतैरायुष्मन्तः तेनत्वायुषायुष्मन्तं करोमि ५ ॐ पितर आयुष्म
न्तस्ते स्वधाभिरायुष्मन्तः तेनत्वायुषायुष्मन्तं करोमि ६ ॐ यज्ञ आयुष्मान् स दक्षि
णाभिरायुष्मान् तेनत्वायुषायुष्मन्तं करोमि ७ ॐ समुद्र आयुष्मान् स स्रवन्ती
भिरायुष्मान् तेनत्वा० ८ इति त्रिर्वा सकृद्वा जपेत् अथ यदि पितुः कुमारस्य सर्वाङ्गः
प्राप्तिकामनस्या तदा दिवस्परीत्येकादशभिर्मन्त्रैः कुमारं सर्वाङ्गं अभिमृशति मं
त्राश्च दिवस्परीत्ये तस्यानुवाकस्य वात्सप्रभालन्दनऋषिः त्रिष्टुप् छन्दः अग्नि
र्देवता जाताभिमन्त्रणे विनियोगः ॐ दिवस्परि प्रथमं जज्ञे अग्निरस्माद्द्वितीयं परि
जातवेदाः तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाध्वी १ विद्म ते अग्ने
त्रेधा त्रयाणि विद्म ते धाम विभृता पुरुत्राः विद्म ते नाम परमं गुहा यद् विद्मा तमु
त्सं यत आजगन्थ २ समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊ
धन् तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्धन् ३ अक्रन्द

रामः

२९

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दग्निः स्तनयन्निवद्यौः क्षामारेरिहद्वीरुधः समञ्जन् सद्योजज्ञानो वीहिमिद्धो ऽ अख्यदारो
दसी भानुनाभात्यन्तः ४ श्रीणामुदारोधरुणोरयीणां मनीषाणांप्रार्पणः सोमगोपाः वसुःसू
नुःसहसो ऽ अप्सुराजा विभात्यग्र ऽ उषसामिधानः ५ विश्वस्यकेतुर्भुवनस्यगर्भ आरोद
सी अपृणाज्जायमानः वीडुंचिदद्रिमभिनत्परायं जनायदग्निमयजन्तपञ्च ६ उशिक्पा
वको अरतिःसुमेधामर्त्येष्वग्नि रमृतोनिधायि इयर्तिधूममरुषंभरिभ्र दुच्छुक्रेणशोचिषा
द्यामिनक्षन् ७ दृशानोरुक्म ऽ उर्व्याव्यद्यौद्दुर्मर्षमायुः श्रियेरुचानः अग्निरमृतो अभव
द्वयोभिर्यदेनंद्यौ र्जनयत्सुरेताः ८ यस्तेअद्यकृणवद्भद्रशोचे ऽपूपंदेवघृतवंतमग्ने
प्रतंनयप्रतरंवस्यो ऽ अच्छाभिसुम्नंदेवभक्तंयविष्ठ ९ आतंभजसौश्रवसेष्वग्न ऽ उक्थ
ऽ आभजशस्यमाने प्रियःसूर्ये प्रियो अग्ना भवात्युज्जातेन भिनदुज्जनित्वैः १० त्वा
मग्नेयजमाना ऽ अनुद्यून्विश्वावसुदधिरेवार्य्याणि त्वयासहद्रविणमिच्छमाना व्रजंगो
मन्त मुशिजोविवव्रुः ११ इतिदेवार्चः पठित्वा अस्तान्स्योग्निरित्येकादशीमृचंनपठेत् दिव
स्परित्यतस्यानुवाकस्योत्तमीमृचं परिशिनष्टीतिपारस्करः अथकुमारस्य पूर्वादिचतु
र्दिक्षुमध्ये च पंचब्राह्मणान्संस्थापयेत् चत्वारश्चतुर्दिक्षु पञ्चमोमध्येनेत्र्यंत्वा
वास्थाप्य इममनुप्राणिणेन इतितान्पिताब्रूयात् ततः पूर्वदिक्स्थितोविप्रः कुमारस्यमुखं
तिष्ठन् तंलक्षीकृत्य प्राणइतितारस्वरंब्रूयात् दक्षिणादिक्स्थितोपि तथातिष्ठन् व्यान
इतितथाब्रूयात् पश्चिमदिक्स्थितोपितथैव अपानइतिब्रूयात् उदक्संस्थितः उदानइ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिब्रूयात् मध्यमस्तत्परीक्षादेवमाणा समानइति ब्रूयात् पञ्चब्राह्मणाभावे स्वयमेवप
चतत्रेगत्वा कुमाराभिमुखो प्राणोत्यादि ब्रूयात् अस्मिन्पक्षेप्रियो भवति अथयस्मिन्देशे
कुमारो जातोभवति तं देशं अनामिकया स्पृशन् एतंमन्त्रंपठन् परामृशति मन्त्रः ॐ वेद
तेभूमिर्हृदयं इत्यस्य पंक्तिश्छन्दः पृथिवीदेवता जन्मभूम्यभिमन्त्रणेविनियोगः ॐ वेदते
भूमिर्हृदयं दिविचन्द्रमसिश्रितम् वेदाहं तन्मांविद्या त्पश्येमशरदः शतंजीवेमशरदः
शतꣳ शृणुयामशरदः शतम् इतिभूमिमभिमन्त्र्य कुमारंहृत्वाजपति ॐ अश्माभव
परशुर्भव हिरण्यमस्रुतंभव आत्मावैपुत्रनामासि सञ्जीवशरदः शतम् अथास्य
मातरंहृत्वाजपति ॐ इडासिमैत्रावरुणी वीरेवीरमजीजनथाः सात्वंवीरवतीभव या
स्मान्वीरवतोऽकरत् इति अथमातुर्दक्षिणंस्तनंप्रक्षाल्य कुमारायप्रयच्छति ॐ इ
मꣳ स्तनमूर्जस्वंतमिति परमेष्ठीऋषिः त्रिष्टुप्छन्दः स्तनप्रदानेविनियोगः ॐ इम
ꣳ स्तनमूर्जस्वंतंधयापांप्रपीनमग्ने शरीरस्यमध्ये उत्सञ्जुषस्व मधुमन्तमर्व
न्त्समुद्रियꣳ सदनमाविशस्व इति ततोवामंस्तनंप्रक्षाल्य प्रयच्छति यस्तेस्तन
इति दीर्घतमाऋषिः त्रिष्टुप्छन्दः गौर्देवता स्तनप्रदानेविनियोगः ॐ यस्तेस्तनश
शयोमयोभूर्योरत्नधावसुविद्यः सुदत्रः येनविश्वा पुष्यसि वार्य्याणि सरस्वती
तमिहधातवेकः उर्वन्तरिक्षमन्वेमि इति अथकुमारस्यशिरः प्रदेशे जलपूर्णकुम्भं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दशादिनपर्य्यन्तं निदधाति आपोदेवेष्वित्यस्य प्रजापतिर्ऋषिः अनुष्टुप्छन्दः आपोदेवता सू
तिकागारे शिरःप्रदेशे रक्षार्थे उदकुम्भस्थापने विनियोगः ॐ आपोदेवेषु जाग्रथ यथादे
वेषु जाग्रथ एवमस्यां सूतिकायां सपुत्रिकायां जाग्रत इति ततः सूतिकागृहद्वारे वेदीं कृ
त्वा सूतिकाग्निमुपसमाधाय पंचभूसंस्कारपूर्वकमग्निं संस्थाप्य अत्र प्रणीताप्रणय
नादयो न भवन्ति पञ्चभूसंस्कारास्तु भवन्त्येव स्थापितमग्निं एतत्ते इति प्रतिष्ठाप्य ॐ
भूर्भुवः स्वरित प्रगल्भनामाग्निमावाह्य ॐ अग्नये नमः इति पाद्यादिभिः सम्पूज्य होमं
कुर्य्यात् तण्डुलफलिकाकणमिश्रान्सर्षपान् गृहीत्वा शण्डामर्केति प्रजापतिर्ऋ
षि अनुष्टुप्छन्दोऽग्निर्देवता सूतिकाग्नौ तण्डुलफलिकामिश्र सर्षपहोमे विनि०
ॐ शण्डामर्क उपवीरः शौण्डिकेय उलूखल मलिम्लुचो द्रोणाश्च्यवनो नश्य
तादितः स्वाहा इदमग्नये आलिखन्निति प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता
सूतिकाग्नौ तण्डुलफलिकामिश्रसर्षपहोमे विनियोगः आलिखन्ननिमिषः किंव
दन्त उपश्रुतिः हर्य्यक्षः कुम्भीशत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यव
नो नश्यतादितो स्वाहा इदमग्नये शण्डामर्कोपवीर शौण्डिकेयो उलूखल मलि
म्लुच द्रोणाश्च्यवनेभ्यः इति प्रथमाहुतौ त्यागः इदमालिखन्ननिमिष किंवद
न्त उपश्रुति हर्य्यक्षकुम्भीशत्रु पात्रपाणिर्नृमणिर्हन्त्रीमुख सर्षपारुणश्च्यवने
भ्य इति द्वितीयाहुतौ त्यागः इत्यपि केचित् अस्मिन्होमे कुशकण्डिका न भवति

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सचाग्निसंस्थापनपर्य्यन्तं दशदिनावधि यथानिर्वापितो न भवति तथा कार्य्यम् उत्था
पनं च दशमदिन एव एतावन्न्याकृतयो दशदिनपर्य्यन्तं प्रत्यहं सायंप्रातः शालुतिद्वयेन चला
पिंगात्स्वरव्याकाभवन्ति अथ यदि कुमार नामा बालग्रहोत्पादनादिना कुमारमुपद्रवं कु
र्य्यात् तदा तदुपद्रवनिवृत्तये तं बालं मत्स्यजालेनोत्तरीयेण वा प्रच्छाद्याङ्के निधाय
मंजपेत् ॐ कूर्कुरः सकूर्कुरः कूर्कुरो बालबंधनं चेच्चे च्छुनक सृजन नमस्ते ऽस्तु सी
सरो लपेता पहुरस्तत्सत्यम् १ यत्ते देवा वरमदद् सत्वं कुमारमेव वावृणीथाः चेच्चेच्छु
नक सृजन नमस्ते ऽस्तु सीसरो लपेता पहुरस्तत्सत्यम् २ यत्ते सरमा माता सीसरः पि
ता श्यामशबलौ भ्रातरौ भ्रातरौ चेच्चेच्छुनक सृजन नमस्ते ऽस्तु सीसरो लपेता
पहुरस्तत्सत्यम् ३ न नामयति न रुदति न हृष्यति न ग्लायति यत्र वयं वदामो
यत्र चाभिमृशामः इति मन्त्रेणाभिमृश्य दक्षिणासंकल्पं कुर्य्यात् अद्येह अमु
कोऽहं जातस्य पुत्रस्य कृतैतज्जातकर्म्मकर्म्मणः साङ्गतासिद्ध्यर्थं साद्गुण्यार्थं च
इमां दक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दास्ये ॐ तत्सन्न मम ततो भू
यसीं संकल्प्य ब्राह्मणेभ्यो दद्यात् प्रथमे ह्नि तथा षष्ठे दाता नाप्नोति सूतक
मिति वचनात्तत्र दानप्रतिग्रहो न दोषमावहति ततोऽङ्गुष्ठं परित्यज्य नालच्छे
दनं कुर्य्यात् अभिषेकतिलकमंत्रपाठादि च कारयेत् इति जातकर्मविधिः

एमः
४१

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथषष्ठीमहोत्सवः जन्मदिनतः षष्ठदिने पिता प्रातरुत्थाय शुचिंस्नात्वा धौतस्मार्त्तक्रिया
परं सपत्नीकंब्राह्मणं विनयेनोपसृत्य अद्यषष्ठीमहोत्सवार्थं भवामहं निमंत्रये इतिना
युक्त्वा तथास्त्विति ताभ्यामुक्तस्वगृहानागच्छेत् तौचोपोषितौ तिष्ठेताम् तयोर्हस्तेन षष्
ष्ठीमहोत्सवंकारयेत् दक्षिणाग्न्येकोणस्वजंकार्य्यैः ततोऽपराह्णसमये ब्राह्मणोगोमयमृत्ति
काभिः कांस्यपीठे स्कन्दप्रद्युम्नयोः मध्येषष्ठीदेव्याः प्रतिमाः विधाय शुक्लतण्डुलैर्यवै
र्वापूरयित्वा मण्मयाः कर्णाभरणाः दूर्वापल्लवैः कुण्डलेसर्वाङ्गेषु षोडशाकपर्द्दिकादद्या
त् ततः प्रदोषसमये पुत्रपितास्नात्वा सन्ध्यादिविधाय पूजासामग्रींसम्पाद्य द्वारस
मीपमागत्य द्वारमातृपूजनंकुर्य्यात् आचम्य अर्घंसंस्थाप्य पूजासंकल्पः अद्येहामु
कगोत्रोऽमुकोऽहं अमुकराशेर्बालकस्य करिष्यमाणषष्ठीमहोत्सवकर्म्मणि पूर्वाङ्ग
त्वेन द्वारमातृणांपूजनंकरिष्ये एतन्तइतिप्रतिज्ञाय ॐ भूर्भुवःस्वः द्वारमातरः सुप्रतिष्ठि
तावरदाभवन्तु ध्यानम् कुमारीधनदानंदा विपुलामङ्गलाचला पद्माचैवतु नामा(न्)ता
सप्तैताद्वारमातरः इतिध्यात्वा ॐ कुमार्य्यैनमः ॐ धनदायैनमः ॐ विपुलायैनमः ॐ
मङ्गलायैनमः ॐ अचलायैनमः ॐ पद्मायैनमः इतिनाममन्त्रैः आवाहनासनपाद्या
दिनीराजनान्तंसम्पूज्य दक्षिणांदत्वा स्वस्तिवाचनंपठन् अभ्यन्तरंगच्छेत् तत्रप्रथमंग
वघृत सर्षपसैन्धव निम्बपत्राहि त्वग्भिः सूतिकासमीपे धूपोदेयः ततोगणेशंपूजयेत्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आचम्य अर्घं संस्थाप्य पूजासंकल्पः अद्येहेत्यादि देशकालौ स्मृत्वा अमुकगोत्रोऽमुकशर्म्मा
हं जातस्य पुत्रस्य षष्ठीमहोत्सव षष्ठीमहोत्सव कर्म्मणि पूर्वांगत्वेन निर्विघ्नतासिद्ध्यै भ
गवतो गणेशस्य पूजनं करिष्ये इति संकल्प्य पूर्वोक्तप्रकारेण गणेशं सम्पूज्य दक्षिणां दत्वा
प्रार्थयेत् लम्बोदर महाभाग सर्वोपद्रवनाशन त्वत्प्रसादादविघ्नेन चिरंजीवतु मत्सुतः
अथ प्रधानसंकल्पः अद्येहेत्यादि देशकालौ स्मृत्वा अमुकगोत्रो अमुकराशिरमुकशर्म्माहं
अमुकराशेः बालकस्य दीर्घायुरारोग्यावाप्तये सर्वोपद्रवशान्तये श्रीपरमेश्वरप्रीत्यर्थं
षष्ठीमहोत्सव कर्मकरिष्ये तत्पूर्वांगत्वेन सर्वाभ्युदयप्राप्तये गौर्य्यादिषोडशमातॄ
णां पूजनं करिष्ये इति संकल्प्य पूर्वोक्तप्रकारेण मातॄः पूजयित्वा वसोर्धाराः पातयि
त्वा दक्षिणां दद्यात् केचिन्मते आभ्युदयिकं च विधाय ततः पुण्याहवाचनसंकल्पः
अद्येहामुकोहं जातस्य पुत्रस्य षष्ठीमहोत्सवकर्म्मणि सर्वाभ्युदयप्राप्तये ब्राह्मण
द्वारा पुण्याहं वाचयिष्ये तत्पूर्वाङ्गत्वेन चतुर्णां ब्राह्मणानां पूजनं वरणं च करिष्ये इति
संकल्प्य वरणं कृत्वा उक्तप्रकारेण पुण्याहं वाचयित्वा कलशं संस्थाप्य तत्र नवग्र
हानावाह्य सम्पूज्य दक्षिणां दत्वा स्कन्दप्रद्युम्नपूजनं कुर्य्यात् अर्घं संस्थाप्य पूजासंक
ल्पः अद्येहामुकोहं जातस्य पुत्रस्यारोग्यावाप्तये सर्वोपद्रवशान्त्यर्थं गोमयप्रति ष.म.
६२

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मातृ स्कन्दप्रद्युम्नषष्ठीनां जले जन्मदानां च षोडशोपचारैः पूजनं करिष्ये इति संकल्प्य
एतन्न इति प्रतिष्ठाप्य ॐ भूर्भुवः स्वः गोमय प्रतिमासु स्कन्ददेव प्रद्युम्नदेव षष्ठीदेवि जले ते
जन्मदादेव्यः इहागच्छत इह तिष्ठत मम प्रतिष्ठितावरदा भवत अथ स्कन्दध्यानम् म
यूरवरमारूढो द्विभुजो बालरूपधृक् कुक्कुटं वामहस्तेन शक्तिं दक्षिणतो न्यसेत् वरा
भयकरः साक्षा द्विभुजः शिखिलाञ्छनः किरीटी कुण्डली देवो दिव्याभरणभूषितः
अथ प्रद्युम्नध्यानम् प्रद्युम्नस्तु महाबाहुः शङ्खचक्रगदाधरः चक्रं दक्षिणहस्ते स्या
द्वामहस्ते धनुस्तथा शङ्खं च दक्षिणे दद्या गदां वामे प्रदापयेत् प्रद्युम्नं कारयेदेवं सर्व
भूषणसंयुतम् स्त्रियौ चैवास्य कर्तव्ये सर्वलक्षणसंयुते इति ध्यात्वा ॐ स्कन्दाय
नमः इति नाममन्त्रेण ॐ द्रप्सश्चस्कन्द पृथिवी मनुद्यामिमं च योनिमनु यश्च पूर्वः
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः इति मन्त्रेण च स्कन्दमावाह्य
ॐ प्रद्युम्नाय नमः इति प्रद्युम्नं चावाह्य वक्ष्यमाणमन्त्रैर्नाममन्त्रैश्च पूजयेत् आसनं
सर्वाभरणाय नमस्कार्यं सेनाधिपतये नमः पुष्पासनं च देवेश प्रसीद परमेश्वरः पा
द्यम् गङ्गाजलं समानीतं सुवर्णकलशस्थितम् पाद्यार्थं ते मया दत्तं गृह्यतां परमे
श्वरः अर्घ्यम् पञ्चरत्नसमोपेतं गन्धपुष्पैः परिष्कृतम् पञ्चपल्लवसंयुक्तम् अर्घ्यं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मेप्रतिगृह्यताम् अर्घ्योऽङ्गमाचमनीयं नाममन्त्रेण स्नानम् नर्मदाचन्द्रभागादि गङ्गास
ङ्गमेजैर्जलैः स्नापितोसि मयादेव प्रीत्यर्थं प्रतिगृह्यताम् आचमनीयम् गङ्गाजलं समा
नीतं कर्पूरैकलशोस्थितम् आचमनं स्कन्ददेव प्रीत्यर्थं प्रतिगृह्यताम् वस्त्रम् वेदसूत्र
समायुक्ते यज्ञतानसमन्विते सर्ववर्णप्रभेदेव वाससी प्रतिगृह्यताम् वस्त्राङ्गमाचम
नीयं नाममन्त्रेण गन्धम् मलयाद्रिसमुद्भूतं नानागंधसमन्वितम् करएकस्तूरएनेदं
गंधंमे प्रतिगृह्यताम् अक्षताः शुक्लान्यतीवकृष्णानि करगंधीनि विद्योमतः अक्षतां
स्यप्रयच्छामि गृहाणपरमेश्वरः पुष्पाणि जलजंस्थलजंचापि पुष्पकालर्तुसम्भ
वम् भक्त्यानिवेदितं देव पुष्पंमे प्रतिगृह्यताम् धूपः गुग्गुलंघृतसंयुक्तं दशाङ्गेन
समन्वितम् धूपंगृहाणदेवेश त्रैलोक्यानन्ददायकम् दीपम् सवर्त्तिघृतसंयुक्तं
मन्धकारविनाशनम् मयानिवेदितंदेव गृहाणपरमेश्वर नैवेद्यम् सत्यान्नसिद्धं स
हविर्विविधानंदलक्षणम् भोजनार्थंमयादत्तं नैवेद्यंप्रतिगृह्यताम् भूमरणार्थे द्र
व्यंचसमर्प्य नाममन्त्रेण जपंकृत्वा समर्प्य ताम्बूलम् मण्डनंसर्वभूतानां दुर्ल्लभेसो
गन्धिकादिभिः ताम्बूलंगृह्यतांदेव प्रीतोस्माकंभवप्रभो नीराजनं कृत्वा पुष्पाञ्जलिं
समर्प्य प्रार्थयेत् तत्रप्रथमंस्कन्द प्रार्थना नमः कुमाराय महाप्रभाय स्कन्दायते

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्कन्दितदानवाय नवार्कबिम्बद्युतये नमोस्तु नमोस्त्वमोघोद्यतशक्तिपाणये १ नमो
विशालाक्षविचारिणेस्तु नमोस्तु ते स्वरमुखकामरूपिणे गुहायशृङ्गाभरणाय
त्रै नमोस्तु ते दानवदारणाय २ नमोस्तु ते कं प्रतिमप्रभाय नमोस्तु गुह्याय गुहाय
तुभ्यम् नमोस्तु ते त्रैलोक्यभयापहाय नमोस्तु ते बालपराक्रमाय ३ नमो विशाला
ललोचनाय नमो विशाखाय महाव्रताय नमो नमस्तेस्तु मनोरमाय नमो नमस्तेस्तु
कोत्कराय ४ नमो मयूरोज्ज्वलवाहनाय नमो धृतोदग्रपताकिनेस्तु नमोस्तु केयूर
धराय तुभ्यं नमः प्रभाय प्रणताय तुभ्यं ५ सेनान्ये पावकिने नमोस्तु कृपापरीता
मलदिव्यमूर्तये कृपामयो महाद्युधामलस्त्वं नमोस्तु षष्ठीशनमो नमस्ते ६ एवं
षड्विंशन्नामभिः स्कन्दं सम्प्रार्थ्य ॐ कारडात्कारडास्वरेहन्ती पतनः पतत्रस्य
रि प्रधानो पूर्वं प्रतनु सहस्रेण शतेन च इति मन्त्रेण स्कन्दोपरि दूर्वां समर्प्य प्रद्युम्न
प्रार्थयेत् भो प्रद्युम्न महाबाहो लक्ष्मीहृदयनंदनः कुमाररक्षमभीते प्रद्युम्नाय नमो
नमः १ त्रैलोक्यपूजितः श्रीमान् सदा विजयवर्द्धनः शान्तिं कुरु गदापाणे प्रद्युम्नाय
नमो नमः २ इति प्रद्युम्नं सम्प्रार्थ्य अरुन्धतिकाः पूजयेत् तत्र पूजासंकल्पः अद्येह
त्यादि जातस्य पुत्रस्य षष्ठीमहोत्सवे सर्वोपद्रवशान्त्यर्थं दध्यक्षतपुञ्जेषु मह

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृतिकाः पूजयेत् तत्र पूजासंकल्पः अद्येहेत्यादि जातस्य पुत्रस्य षष्ठीमहात्म्ये स
र्वोपद्रवशान्त्यर्थं दध्य सतपुत्रेषु मत्कृतिकानां पूजनं करिष्ये एतन्त इति प्रति
ष्ठा ॐ भूर्भुवः स्वः त्रिविष्टहागच्छ इह तिष्ठ सुप्रतिष्ठिता वरदा भव ॐ सम्भूत्यै ॐ स
न्नत्यै ॐ प्रीत्यै ॐ अनुसूयायै ॐ क्षमायै इति सम्पूज्य प्रार्थयेत् जगन्मातर्जग
द्धात्री जगदानंदकारिणी नमस्ते देवि कल्याणि प्रसीद मम कृत्तिके ॐ कार्त्तिकेया
य नमः कार्त्तिकेय महाबाहो गौरीहृदयनंदनः कुमार रक्ष मे भीतिं कार्त्तिकेय न
मोस्तु ते ततो विष्णुं प्रार्थयेत् त्रैलोक्यपूजितः श्रीमान् सदा विजयवर्द्धनः शान्तिं
कुरु गदापाणे नारायण नमोस्तु ते ॐ खड्गाय नमः ॐ शङ्खाय नमः ॐ मन्यना
य नमः ॐ चक्राय नमः इति सम्पूज्य दक्षिणां दद्यात् अद्येहामुकोहं अमुकस्य
जातस्य पुत्रस्य दीर्घायुरारोग्यावाप्तये सर्वोपद्रवशान्त्यर्थं गोमयनिर्मितप्रति
मायां षष्ठीदेव्याः पूजनं करिष्ये एतन्त इति प्रतिष्ठा ॐ भूर्भुवः स्वः गोमयप्रति
मायां षष्ठीदेवि इहागच्छ इह तिष्ठ सुप्रतिष्ठिता वरदा भव ॐ आं ह्रीं क्रौं यं रं
लं वं शं षं सं हं क्षं हं सः सोहं षष्ठीदेव्याः प्राणा इहागत्य सुखं चिरं तिष्ठ
न्तु जीव इह स्थितः सर्वेन्द्रियाणि इह तिष्ठन्तु इति प्राणप्रतिष्ठां च विधाय ध्यात्वा

एमः
४४

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निरेवंचन्यासंकुर्य्यात् ॐ खौं हृदयायनमः ॐ खीं शिरसेस्वाहा ॐ खूं शिखायैवषट्
ॐ खैं कवचायहुंम् ॐ खौं नेत्रत्रयायवौषट् ॐ खः अस्त्रायफट् इतिन्यासंविधाय
ध्यायेत् चतुर्भुजांमहादेवीं तुङ्गपीनस्तनीं शिवाम् मयूरवरमारूढां रक्तवस्त्रधरांशु
भाम् शूलशक्तिवराभीति हस्तांध्यायेन्महेश्वरीम् प्रफुल्लपद्मवदना मध्येपद्मासन
स्थिताम् सर्वाङ्गभूषितांदेवीं पीनोन्नतपयोधराम् रूपवतीसूमवदना पीतको
शेयवाससाम् चतुर्भुजांदक्षिणेन धृतमश्वानवंशकाम् नीलोत्पलंतुवामेन स्कंदं
तुदधतींतथाम् अधस्थितकराभ्यांतु महालक्ष्मींविचिन्तयेत् आवाहनम् आया
हिपुज्यसेदेवि महालक्ष्मीतिविश्रुते शक्तिरूपेणमेवाल रक्षजागरचामरे ॐ अ
म्बे अम्बिके अम्बालिके नमानयति कश्चन ससत्यश्विकः सुभद्रिकां काँपील
वासिनीम् ॐ लक्ष्मीदेव्यैनमः इतिनाममन्त्रेणाच आसनम् पाद्यम् समर्प्यअर्घं
दद्यात् अर्घमन्त्रः पत्रपुष्पफलाम्भोभि रत्नैर्यवकुशैर्युतम् लक्ष्मीदेविमयादत्
तं सर्वंगृहाणमोऽस्तुते ततोवैदिकमन्त्रेण नाममन्त्रेणच स्नानं स्नानाङ्गमाचमनी
यंचदत्वा समर्प्य वस्त्रम् तन्तुसन्तानसंयुक्तं कलाकौशेयकल्पितम् सर्वाङ्गा
भरणंश्रेष्ठ वसनंपरिधीयताम् वस्त्राङ्गमाचमनीयम् गन्धम् कुङ्कुमंचन्दनंचैव

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुगंधंसुमनोहरम् मङ्गीदेविमयादत्तं गन्धंगृह्णनमोस्तुते अक्षताःसुगन्धाद्युतिशुभाश्च
तण्डुलाःसुमनोहराःअक्षतांश्चमदत्ता मङ्गीदेविनमोस्तुते पुष्पाणि चतुर्वर्णानिपुष्पा
णि सुगन्धीनिविशेषतःमयानीतानिपूजार्थं गृहाणपरमेश्वरि ॐ समस्तेदेव्या० ॐश्री
यंते० ॐ काण्डात्काण्डा० इतिमन्त्रेणधूपंसमर्प्य इतिमन्त्रेणदूर्वांसमर्पयेत् गुग्गुलंघृ
तसंयुक्तं दशाङ्गनसमन्वितम् मङ्गीदेविनमस्तुभ्यं धूपंमेप्रतिगृह्यताम् अथदीपान्
ज्वाल्य गव्येनाज्येनसंयुक्ता वर्त्याकर्पूरगर्भया दीपान्देविमयादत्ता निमान्गृह्णन
मोस्तुते ततोघण्टिद्योपट्या पूपान्नुकमालायुतं अथा सततंकर्णताडनादिना भूतादि
विद्रावणाय पुनः पुनःशब्दंकारयेत् ततोनैवेद्यम् मोदकानिविचित्राणि शुल्कतण्डु
लकंदधि विचित्रपक्वान्नयुतं तथापूपसमन्वितम् फेणिकाघृतपूराद्यं नैवेद्यंप्रति
गृह्यताम् ॐमङ्गीदेव्यैनमः इतिनाममन्त्रेणाजपंविधाय गुह्यातीति समर्प्य नैवेद्यं
गमाचमनीयं करोद्वर्तनार्थे गंधंचसमर्प्य नीराजनम् अन्तस्तेजोवहिस्तेज एकीकृत्य
मितप्रभम् आरार्त्तिकमिदं देव गृहाणपरमेश्वरि नमस्कारः जयदेविजगन्मात र्जग
दानंदकारिणी प्रसीदममकल्याणि महाशक्तिनमोस्तुते ततःपुष्पाणिसंगृह्य प्रार्थ — रामः
येत् देवानांच ऋषीणांच मनुष्याणांचवत्सले अमुंममसुतंरक्ष मङ्गीदेविनमोस्तु — ८५

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ते पुरा देवैः पूजितासि ब्रह्मविष्णुशिवादिभिः अावाभ्यामपि देवि त्वं पूज्यसे भक्तिपूर्वकम्
देहि सस्य बालकस्यायु दीर्घं तु अनमोस्तु ते ततः पिता बालकस्य मष्टी देव्याः पुरस्थितः
बद्धाञ्जलिर्भक्तिनम्रो वाक्यमुच्चारयेदिदम् त्वं देवि माता दितिरदितिजा त्वं गौरि त्वमेवासि
धृतिः क्षमा त्वम् कीर्त्तिः समृद्धिर्भुवनस्य धात्री त्वमेव देवि प्रणतोस्मि तुभ्यम् यथा स
धृतिः क्षमा त्वम् कीर्त्तिः समृद्धिर्भुवनस्य धात्री त्वमेव देवि प्रणतोस्मि तुभ्यम् यथा स
वाणि भूतानि त्वयि संस्मृतानि स्थलवत् चराचराणि भूतानि त्वत्तो जातान्यनेकशः पुमान्सा
सीभवत्येष तेन सत्येन बुद्धिमान् त्वं सृष्टिरिन्द्रा सृजसि प्रजास्त्वं स्थितिस्त्वमेता सक
लाविभर्षि त्वामेव वाचा मनसा च कर्मणा समर्चयाम्यस्तु शिशुश्चिरायुः स्वस्तिमेस्तु
गृहे नित्यं त्वत्प्रसादात्करिष्यति पुत्रोत्सवमहं नित्यं पश्येयं त्वदनुग्रहात् ततो भक्त
स्य जननी प्रार्थयेत्तामतन्द्रिता तवः प्रसादात्तनयस्य वक्त्रे दृष्टा मया देवि नमोस्तु
तुभ्यम् सौभाग्यमारोग्यमभीष्टसिद्धिं देहि प्रजायाश्चिरजीवितं च गौर्याः पुत्राय
यास्कंदः शिशुः संरक्षितस्त्वया तथा ममाप्ययं बालो रक्ष्यतां मातृके नमः अस्ति देवि
नमस्तुभ्यं सूतिकागृहवासिनी पूजितासि मया भक्त्या सबालां रक्ष सूतिकाम् अ
मत बान्धवाः सर्वे स्वस्ति वाक्पुरःसरम् कामयन्तोऽर्भकस्यायुः प्रार्थयेयुः सर्वो
मितः ॐ स्वस्ति २ जननी सर्वसौख्यानां बालानां च विशेषतः नारायणी स्वरूपेण-

CC0. In Public Domain. Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बालंमेरक्षसर्वतः शक्तिस्त्वंसर्वदेवानां लोकानांहितकारिणी मातृवद्रक्षमेबालं महाल
क्ष्मिनमोस्तुते रुद्राणी रुद्ररूपेण महाविघ्नविनाशिनी प्राणदेवरदेदेवि रक्षबालंस्वपुत्रवत्
अमुंममकुलोत्पन्नं रक्षत्वंदेविबालकम् पूजितासिमहाभाग चिरंजीवतुबालकः रक्षोभूत
पिशाचेभ्यः डाकिनीशाकिनीषुच मातेवरक्षमेबालं पन्नगभ्यापदस्तुच त्वमेववैष्णवीदेवी
ब्रह्माणीचव्यवस्थिता रुद्रशक्तिसमाख्याता महालक्ष्मिनमोस्तुते धात्रीत्वंकान्तिकेयस्य
स्त्रीरूपंमदनस्यच त्वत्प्रसादाद्विघ्नेन चिरंजीवतुमेसुतः ततोबालकंभूमोस्थापयित्वा
हस्तेस्पृष्ट्वारक्षांपठेत् ॐ यत्तत्वंयामितदेवस्य विष्णोरमिततेजसः भौमस्यब्राह्मणाख्ये
व सर्वंभवतुमेस्तुते ततोञ्जलिंबद्ध्वाप्रार्थयेत् चन्द्रार्कयोर्दिगीशानां दिशांचगगनस्यच
निक्षेपार्थंमयादत्तं तेमेरक्षन्तुबालकम् अप्रमत्तंप्रमत्तंवा दिवारात्रमथापिवा रक्षन्तुस
र्वेदासर्वे देवाःशक्रपुरोगमाः रक्षत्वंवक्षधेदेवि सर्वेषुचजगतःप्रिये आयुःप्रमाणं
सकलं देहिदेविनमोस्तुते अथत्वामायुष्मनस्यास्य येकेचित्परिपन्थिनः विद्यारोग्या
वित्तानाच निर्दहस्वाचिरात्तान् अथाथर्ववेदोक्तां रक्षांबालकसमीपेपठेत् कृत्वा
त्वांपरिरक्षार्थं तथारक्षोभयस्यच रक्षाकर्मकरिष्यामि ब्रह्मातदनुमन्यताम् नागाः
पिशाचाःगन्धर्वाः पितरोयक्षराक्षसाः अभिभवन्तियेयेत्वां ब्रह्माद्यं तान्सदा
घा

एम॰
४६

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृथिव्यामन्तरिक्षे च येचरन्तिनिशाचराः विदिक्षु दिक्षु ये चान्ये पान्तु त्वां तेनमस्कृताः पा
तुत्वांमृमयो ब्रह्मा दिव्या राजर्षयस्तथा पर्वताश्चैवनद्यश्च तथासर्वेचसागराः अग्निरक्षतु
तेजिह्वां प्राणंरक्षतु वासवः सोमोव्यानमपानंतु पर्जन्यः परिरक्षतु उदानंविद्युतः पान्तु स
मानंस्तनयित्नवः बलंभित्तेवलंपातु वाचंवाचस्पतिस्तथा कामंत पान्तु गंधर्वाः सत्वमि
न्द्रोभिरक्षतु प्रज्ञांचवरुणोराजा समुद्रोनाभिमण्डलम् चक्षुः सूर्य्योदिशः श्रोत्रं चन्द्रमा
पातुतेमनः रात्र्यस्तपान्त्विमा आपो रोमाण्योषधयः स्तथा आकाशंतेनिशापातु देहंच
वसुंधरा एतैर्वेदात्मकैर्मंत्रैः कृत्वाव्याधिविनाशिभिः मयैवंकृतरक्षस्त्वं दीर्घमायु
रवाप्नुहि ब्रवीतुस्वस्तितेब्रह्मा विष्णुरुद्रास्तथैव च स्वस्तिवायुस्तथासूर्य्यः स्वस्तिदेवा
महोरगाः नारदस्यस्तथास्वस्ति कुर्वन्त्वायुः सदैवते इतिरक्षांपठित्वा बालकंकुङ्कु
मादिभिर्विभूष्य स्वाङ्केनिधाय सपत्नीकमाचार्य्यं वस्त्रालंकारादिभिः सम्पूज्य
दक्षिणासंकल्पंकुर्य्यात् अद्येहेत्यादिसंकीर्त्तनान्ते अमुकोहं अमुकराशेर्जातस्यपु
त्रस्य दीर्घायुरारोग्यावाप्तये कृतायाः षष्ठीदेव्याः पूजायाः साङ्गतार्थं षष्ठीदेव्याः
प्रीतये इमांदक्षिणां ब्राह्मणायदास्ये ॐ तत्सत् दक्षिणांदत्वा भूयसींसंकल्पयेत्
अद्येहेत्यादि अमुकोहं श्रुतिस्मृतिपुराणोक्तफलावाप्तये अमुकराशेर्जातस्य पुत्रस्य
दीर्घायुरारोग्य अभ्युदयप्राप्तये षष्ठीमहात्म्यकर्मणा कृतायाः स्कन्दप्रद्युम्नयोः ज

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मदानां अष्टकृत्तिकानां षष्ठीदेव्याश्च पूजामाः साङ्गतार्थं स्कन्दादीनां नवग्रहाणां च प्रीतये
इमां भूयसीं दक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यः तथान्येभ्यो दीनानाथेभ्यो नटनर्त्तकगा
यकेभ्यश्च विभज्य दातुमहमुत्सृजे ॐ तत्सत् न मम भूयसीं विभज्य सिद्धान्नेन ब्राह्म
णांश्च भोजयित्वा अभिषेकतिलकमंत्रपाठादि कारयेत् अथ कुलाचारात् आचाराद्वा
कर्णवेधमागते अर्द्धरात्रे वा देहीवेधनं कुर्यात् आचम्यार्घं संस्थाप्य पूजासंकल्पः
अद्येहेत्यादि अमुकोहं अमुकराशेः पुत्रस्य षष्ठीमहोत्सवकर्मणः उत्तरांगत्वेन एत
स्य बालकस्य परीक्षार्थं आयुर्वृद्ध्ये सर्वोपद्रवशान्त्यर्थं देहीवेधनं करिष्ये इति सं
कल्प्य हरिद्राद्रव्य पूगीफल गौरसर्षपादिभिर्मङ्गलद्रव्यैः एकां पोटलिकां विधाय
गृहाधारदारुणि वा बन्धयेत् एतत्तशति पोटलिकां प्रतिष्ठाप्य ॐ भूर्भुवः स्वः धनुर्वाणे
ष्टुप्रतिष्ठितौ वरदौ भवेताम् इति धनुर्वाणौ प्रतिष्ठाप्य धनुःपूजामंत्रः धृतं क्षेमेन रक्षा
र्थं संहारार्थं हरेणाव त्रयीमूर्त्तिगतं देवं धनुःशस्त्रं नमाम्यहं धनुषे नमः बाणपूजामंत्रः
कामदेवस्य ये बाणाः सफलास्त्यादिगनस्य च रामस्य च यथा बाणा तथास्माकं भवन्त्विह
बाणाय नमः इति मन्त्राभ्यां धनुर्वाणौ सम्पूज्य बालकमङ्के गृहीत्वा स्वस्तिवाचनं पठन्
धनुर्गृहीत्वा बाणान् संयोज्य घराटशब्दवाद्यः पुरस्सरं पोटलिकां बाणेन वेधयेत् रामः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततोदक्षिणासंकल्पः अद्येत्यादि अमुकशर्म्मणः पुत्रस्य सर्वोपद्रवशान्तये कृतस्य राकुपेधन
कर्म्मणः साङ्गुण्यार्थं इमां दक्षिणां ब्राह्मणायाददामि ॐ तत्सत् दक्षिणांदत्वा तिलकमन्त्र
पाठादिकारयेत् ततोगव्यघृतशर्षपैः सैन्धवनिम्बपत्रैश्च सूतिकागृहे धूपोदेयः मुण्डिं कल
निर्गुण्डी वचाकुष्ठचर्मसर्पाः बिल्वपत्रमयोधूपः कुमाराङ्गः प्रपामहत् ततोयवप्ररोहणीम
वासिनीनांपूजनं यजमानस्य वालकस्य च महानीराजनंचविधाय वालकं मातृहस्ते सम
र्पयेत् ततोगृहद्वारि रक्षकान् अपूपमालायुक्तान् खड्गमुशलादि शस्त्रपाणीन्स्थापयेत्
इतिषष्ठीमहोत्सवपूजा अथकथा ॐ नारायणंनमस्कृत्य नरं चैवनरोत्तमम् देवींसर
स्वतींव्यासं ततोजयमुदीरयेत् युधिष्ठिर उवाच पुत्रजन्मनि कन्यायाः उत्सवः कोविधी
यते किंदानंकस्यवा पूजा तन्मेब्रूहिजनार्दन: श्रीकृष्ण उवाच शृणुपाण्डव यत्नेन सुतो
त्पत्तिमहोत्सवम् जन्मषष्ठीदिने कार्य्या षष्ठीनाम्नी त्रिशूलिनी अपराह्णसमयपीठे गो
मयींप्रतिमांलिखेत् कपर्द्दिकाः प्रदातव्या ख्वाङ्ग ख्वाङ्ग विशेषतः ४ कोणकुण्डलकोदं
यौ दूर्वापल्लवशोभितौ दिव्यवस्त्रपरीधानां तांदेवीं पूजयेत्ततः ५ अग्रदीपाष्टकं दंसं
नैवेद्यै विविधैः शुभैः नालीकेरादिकंतद्वत् इक्षकालोद्भवैः फलैः ६ कलशंस्थापयेत्तत्र
अग्रतः पल्लवान्वितम् द्विजन्मानंसपत्नीकं सदाचारसमन्वितम् आहूयकारयेत्तस्मा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

ग॰

सर्वोहस्तेन पूजनम् भुक्तन्तण्डुलवेष्टां तु तस्योपरि समाहिताम् ८ नृत्यगीतविनोदेन वाद्ये
न च युधिष्ठिर: रात्रौ जागरणं कार्यं दैवज्ञैर्द्विजै: सह ९ चटकोत्कमालाभिर्वद्ध्वग्रीवम्
जातकम् पुन: पुनर्महाशब्दं कारयेत्कर्णताडनात् १० डाकिन्यो यातुधानाश्च भूतप्रेतपि
शाचका: बालग्रहाश्च नश्यन्ति न च स्यात्कर्णताद्भवम् ११ तत्र दानानि देयानि ब्राह्म
णेभ्यो विशेषत: प्रथमेऽहनि भक्ष्ये वा दाता नाप्नोति सूतकम् १२ दानं प्रतिग्रहं तत्र श्राद्धं च
क्रियते यत: प्रभाते दीयते दानं नटनर्त्तकगायकान् १३ स्त्रिय: सभर्तृका: पूज्या वस्त्रा
लङ्करणादिभि: अनेन विधिना यस्तु षष्ठीदेवीं प्रपूजयेत् आयुर्वृद्धिर्भवेत्तस्य सन्त
तेरपि पाण्डव: १४ इति षष्ठीमाहात्म्यपूजा कथा च अथ नामकरणम् तत्र नामक
र्मप्रयोग: तत्र नामकर्मदिवसे प्रात: सबालां सूतिकां स्नापयेत् कर्ता पिता पूर्वं गणे
शपूजनं कुर्यात् दीपं प्रज्वाल्य शुभासन उपविश्य आचम्य अर्घं संस्थाप्य प्राणा-
नायम्य पूजासंकल्प: अद्येत्यादि देशकालौ संकीर्त्य अमुकगोत्रोऽमुकशर्मा
हं अमुकराशे: पुत्रस्य कन्याया वा करिष्यमाणनामकर्मणि निष्क्रमणादि कर्म
णि च निर्विघ्नताकार्यसिद्ध्यै पूर्वाङ्गत्वेन भगवतो गणेशस्य पूजनं करिष्ये इति एमः
४८

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संकल्प्य उक्तविधिना गणेशं सम्पूज्य प्रधानसंकल्पं कुर्य्यात् अद्येहेत्यादि देशकालौ
संकीर्त्य अमुकगोत्रो अमुकराशि अमुकशर्म्माहं अमुकराशेरस्य बालकस्य आयुर्
वृद्ध्यै व्यवहारसिद्ध्यै बीजगर्भसमुद्भवैनो निर्वहणद्वारा श्रीपरमेश्वरप्रीतये नामकर्म्म
करिष्ये तथास्य पुत्रस्य श्रीवृद्ध्यै बीजगर्भसमुद्भवैनो निर्वहणाय निष्क्रमणक
र्म्मकरिष्ये तथास्य बालकस्यायुर्वृद्ध्यै धनप्राप्त्यै सूर्य्यावलोकनं भूम्युपवेश
नं च करिष्ये करिष्यमाण नामकर्म्म निष्क्रमण सूर्य्यावलोकन भूम्युपवेशन क
र्म्मणां पूर्वाङ्गत्वेन मातृपूजा नांदीश्राद्ध पुण्याहवाचनानि तन्त्रेण करिष्ये इति
संकल्प्य पूर्वोक्तविधिना मातृपूजा नान्दीश्राद्ध पुण्याहवाचनानि विधाय वेदीं कृ
त्वा तत्र पञ्चभूसंस्कारपूर्वकं अग्निं संस्थाप्य वेद्याः ईशानादिभागे कलशं वि
धिना कलशं संस्थाप्य तत्र ब्रह्मवरुणसहितादित्यादि नवग्रहानावाह्य सम्पू
ज्य आचार्य्यब्रह्मणोर्वरणं कुर्य्यात् तत्र संकल्पः अद्येहेत्यादि अमुकराशेः
पुत्रस्य करिष्यमाण नामकर्म्माङ्ग होमकर्म्मणि आचार्य्यब्रह्मणोः पूजनं व
रणं च करिष्ये तथा नामकर्म्माधिकारसिद्ध्यै त्रीन्ब्राह्मणान् भोजयिष्ये इति
संकल्प्य आचार्य्यब्रह्मणोर्वरणं कृत्वा त्रीन्ब्राह्मणान् भोजयित्वा ब्रह्मासना·

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

दिपर्व्वसु सर्व्वेषां कर्म्मसमाप्तौ पञ्चगव्यहोमार्थं पानार्थं च पञ्चगव्यं कुर्य्यादा
अथ पञ्चगव्यविधिः अथातः संप्रवक्ष्यामि पञ्चगव्यं यथाविधिः पावनार्थे द्विजा
तीनामिह लोके परत्र च १ गोमूत्रं गोमयं क्षीरं दधि सर्प्पिः कुशोदकम् निर्द्दिष्टं
पञ्चगव्यं च पवित्रं कायशोधनम् २ गोमूत्रे वरुणो देवो हव्यवाहस्तु गोमये
क्षीरे चन्द्रश्च भगवान्वायुर्दधिसमाश्रितः ३ भानुराज्ये स्थितास्तद्वज्जले हरिरुदा
हृतः दर्भे देवाः स्थिताः सर्वे पवित्रं तेन नित्यशः ४ मूत्रं तु नीलवर्णायाः कृष्णायाश्च गो
मयं स्मृतम् पयश्च ताम्रवर्णायाः श्वेतायाश्च दधि उच्यते ५ कपिलाया घृतं ग्राह्यं
महापातकनाशनम् अलाभे सर्व्ववर्णानां कपिलैका प्रशस्यते ६ मूत्रस्यैकप
लं दद्यात् तदर्धं गोमयं स्मृतम् क्षीरं सप्तपलं दद्यात् दधि त्रिपलमुच्यते ७ आज्य
स्यैकपलं दद्यात् पलमेकं कुशोदकम् सर्प्पिः कुशोदकं चैव पृथक्मन्त्रैर्विधी
यते ८ सर्वेषामलाभे सर्प्पिः कुशोदकं पयमिति निर्णयः गायत्र्या गृह्य गोमू
त्रं गन्धद्वारेति गोमयं आप्यायस्वेति वै क्षीरं दधिक्राव्णेति वै दधिः तेजोसि शु
क्रमित्याज्यं देवस्य त्वा कुशोदकम् अथ मन्त्राः ॐ तत्सवितुरित्यादि कन्यागा

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पश्चाद्गोमूत्रं गृह्य वरुणं ध्यायन् ताम्रपात्रे स्थापयेत् ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करी
षिणीम् ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् इति गोमयं संगृह्य अग्निं ध्यायन् तत्रै
व स्थापयेत् ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् भवा वाजस्य संगथे इति दुग्धं
संगृह्य सोमं ध्यायन् तत्रैव स्थापयेत् ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः सु
रभि णो मुखा करत्प्रण आयूंषि तारिषत् इति दधि गृह्य वायुं ध्यायन् तत्रैव स्थापयेत् ॐ
तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानां मनाधृष्टं देवयजनमसि इति
घृतं संगृह्य रविं ध्यायन् तत्रैव स्थापयेत् ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्याम् इति कुशोदकं संगृह्य हरिं ध्यायन् तत्रैव स्थापयेत् आपो हिष्ठेति तिसृभिः
लोड्य ॐ कारेण कुशत्रयं साग्रं समूलं गृहीत्वा पुनरोङ्कारेण तं गृहीत्वा जुहुयात् सप्त
पत्राण्येषदर्भा अच्छिन्नाग्रा अकल्मषाः तैर्गृहीत्वा होतव्यं पञ्चगव्यं यथाविधिः
इरावती इदं विष्णुर्मानस्तोके चत्रावती गायत्री प्रजापतीनेत्वेता आहुतयः स्मृताः आलो
ड्य प्रणवेनैव निर्मथ्य प्रणवेन तु उद्धृत्य प्रणवेनैव त्रिः पिबेत्प्रणवेन तु यद्यदस्थिगतं पा
पं देहे तिष्ठति देहिनाम् ब्रह्मकूर्चो दहेत्सर्वं तत्तदग्निरिवेन्धनम् पालाशेनाथ पर्णेन
स्वर्णपात्रेण वा पुनः रौप्यपात्रेण ताम्रेण ब्रह्मतीर्थेन वा पिबेत् पञ्चगव्ये होमं तु केचि
दुक्तवन्तः पूर्वमामनन्ति पश्चात्तु हुत्वाहुतिं होमं न यथावधीरितं कर्त्तव्यम् इति पञ्च

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गौ. श्री.

गव्यविधिः ततः पार्थिवनामाग्निमावाह्य एतन्तइतिप्रतिष्ठाप्य ॐ भूर्भुवः स्वः पार्थिवना
माग्ने सुप्रतिष्ठितोभव ॐ तदेवाग्निरितिध्यात्वा पार्थिवनामाग्नयेनमः इतिनाममन्त्रेण
पाद्यादिनीराजनान्तं सम्पूज्य अथद्रव्यत्यागसंकल्प अद्येहनामकर्म्माङ्गहोमकर्म्मणाहं
यक्ष्ये तत्र आघाराज्यभागदेवताभ्य इदमाज्यं अग्नये विष्णवे रुद्राय अद्भ्यः सवित्रे प्रजा
पतये अग्नये स्विष्टकृते च इदं पञ्चगव्यं महाव्याहृतिदेवताभ्यः सर्वप्रायश्चित्तदेवताभ्यः
अग्नये प्रजापतये च इदमाज्यं मया परित्यक्तं यथादैवतमस्तु दक्षिणं जान्वाच्य मन
सा प्रजापतिं ध्यात्वा ब्रह्मणान्वारब्धो जुहुयात् ॐ प्रजापतये स्वाहा इदं प्रजापतये ॐ
ॐ इन्द्राय स्वाहा इदमिन्द्राय ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमा
य इत्याघारावाज्यभागौ हुत्वा पञ्चगव्यहोमं कुर्य्यात् तत्र मंत्राः सर्वमंत्राणामादि
भूतत्वात् प्रथमं गायत्र्याहोमः ॐ तत्सवितुः मात् स्वाहा इदं सवित्रे ॐ इरावती धेनुम
तीह्यभूतं सूयवसिनी मनवे दशस्या व्यस्कभ्नारोदसी विष्णवेतेदाधर्त्थ पृथिवी मभि
तोमयूखैः स्वाहा इदमग्नये ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधेपदम् समूढमस्यपांसु
रे स्वाहा इदं विष्णवे ॐ मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषुरी
रिषः मानोवीरान् रुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वाहवामहे स्वाहा इदं रुद्राय ॐ
शन्नोदेवीरभिष्टय आपोभवन्तुपीतये शंय्योरभिस्रवन्तुनः स्वाहा इदमद्भ्यः ॐ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रजापते नत्वदेतान्यन्योविश्वारूपाणि परिताबभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयंस्या
मपतयोरयीणां स्वाहा इदंप्रजापतये ॐ अग्नयेस्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते इति
पञ्चगव्ये होमंविधाय कृतशेषंपञ्चगव्यंसूतिकायैदद्यात् साचब्रह्मतीर्थेन त्रिःप्राश्नाति
आचारात् ध्रुवंगन्धाक्षतपुष्प दूर्वादिभिःसम्पूज्य ब्रह्माण्वेणान्वारम्भंकारयित्वा सू
तिकांभर्त्तुःसमीपमानयति साचबालकमङ्केगृहीत्वा अग्निंप्रदक्षिणीकृत्य भर्त्तुर्वामत
उपविशेत् गणेशायनवग्रहेभ्यश्च पुष्पाञ्जलिंसमर्प्पयेत् ततोब्रह्मणान्वारब्धः आज्येन
भूराद्यानवाहुतिर्जुहुयात् स्विष्टकृतंहुत्वा संस्रवप्राशनादि पूर्णपात्रदानान्तंकर्म्मसमा
पयेत् ततोदैवज्ञोवाधिते काले समागते नव्यवस्त्रे कुङ्कुमापिष्टातकेन बालकनाम
लिखित्वा एतन्न्नीति ॐ भूर्भुवःस्वः बालकनामस्यप्रतिष्ठितोभवति प्रतिष्ठाप्य लग्नदा
नसंकल्पंकुर्य्यात् अद्येहेत्यादि अमुकराशेर्बालकस्य नामकर्मलग्ना यत्रकुत्रस्थान
स्थितानां आदित्यादिनवग्रहाणां शुभानां शुभफलाधिक्यप्राप्त्येन दुष्टानांदुष्टफलोप
शान्त्यर्थं इमांस्वर्णनिष्क्रयिणीं दक्षिणां दैवज्ञायतुभ्यमहंसम्प्रददे इति दक्षिणां
दत्वा ततः स्वनवांशे समागते लिखितनामकं तन्नव्यवस्त्रं शंखेवेष्टयित्वा तेनबालक
स्य दक्षिणकर्णे पञ्चघोषपुरःसरं अमुकशर्म्मासि दीर्घायुर्भवेति नामश्रावयेत्
शर्म्मान्तंब्राह्मणस्य वर्म्मान्तंक्षत्रियस्य दासान्तंशूद्रस्य नामकुर्य्यात् ततोहोमदक्षि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णासंकल्पः अद्येहेत्यादि अमुकशर्म्माबालकस्य नामकर्म्माङ्गहोमकर्म्मणः साङ्गुण्यार्थं इमां
स्वर्णदक्षिणां आचार्य्यायतुभ्यमहंसम्प्रददे इतिहोमदक्षिणांदद्यात् नामकर्म्मदक्षिणांद
द्यात् अद्येहेत्यादि अमुकशर्म्माबालकस्य बैजिकगार्भिकदुरितोपशान्तये दीर्घायुरारोग्या
वाप्तये कृतस्यनामकरणकर्म्मणः साङ्गुण्यार्थंइमांदक्षिणां ब्राह्मणेभ्योदास्ये ॐ तत्सत्
ततोनिष्क्रमणंकुर्य्यात् तत्रविशेषः अद्येहेत्यादि अमुकशर्म्माहमस्यबालकस्य करिष्यमा
णनिष्क्रमणकर्म्मणि सर्वारिष्टनिवृत्तिपूर्वकदीर्घायुरारोग्यावाप्तये जलदिगीशानां
दिशांचन्द्रस्य अर्कस्य वासुदेवस्य गगनस्य च पूजनं करिष्ये एतेनैः ॐ भूर्भुवः स्वः
जलदिगीशादिदेवा गगनपर्य्यन्ताः सुप्रतिष्ठितावरदाभवन्तु एवंप्रतिष्ठाप्य नामम
न्त्रेणार्घ्यध्यानादि ॐ दिगीशेभ्योनमः दिग्भ्योनमः चन्द्रायनमः अर्कायनमः वासुदेवायन
मः गगनायनमः इतिनाममन्त्रैः पाद्यादिभिः सम्पूज्य प्रार्थयेत् चन्द्रार्कयोर्दिगीशानां
दिशांचगगनस्यच निक्षेपार्थमिमंदद्मि तेमेरक्षन्तु बालकम् अप्रमत्तंप्रमत्तंवा दिवारा
त्रमथापिवा रक्षन्तु सर्वदा सर्वे देवाः शक्रपुरोगमाः इतिसम्प्रार्थ्य दक्षिणांदत्वा आकु
नसूत्रमापतन्पठेत् इतिनिष्क्रमणम् अथसूर्य्यावलोकनम् तत्रस्वस्तिवाचनपूर्वकं
मातुरङ्कस्थितंबालकं बहिरानीय आदित्यंपूजयेत् यथा आचम्य अर्घंसंस्थाप्य रामः
५१

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूमौरक्तचन्दनेन सूर्य्यंलिखित्वा पूजासंकल्पः अथेहेत्यादिदेशकालौ संकीर्त्य अमुकगणाः
वालकस्य बैजिकगार्भिकदुरितोपशान्तये आदित्यस्यपूजनंकरिष्ये ध्यानम् ध्येयः सदास
वितृमंडलमध्यवर्त्ती नारायणः सरसिजासनसन्निविष्टः केयूरवान्मकरकुण्डलवान्किरी
टी हारीहिरण्मयवपुः धृतशङ्खचक्रः इतिध्यात्वा आकृष्णेतिवेदमन्त्रेण ॐ आदित्यायनमः
इतिनाममन्त्रेण च आवाहनादिनीराजनान्तं सम्पूज्य वालकायसूर्य्यंप्रदर्शयेत् ॐ तच्च
क्षुरितिदध्यङ्ङाथर्वणऋषिः उष्णिक्छन्दः सूर्य्योदेवता सूर्य्योदीक्षणेविनियोगः ॐ त
च्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् पश्येमशरदः शतंजीवेमशरदः शतंशृणुयामशरदः
शतंप्रब्रवामशरदः शतमदीनाः स्यामशरदः शतंभूयश्चशरदः शतात् इतिमन्त्रेणवाल-
कायसूर्य्यंप्रदर्श्य दक्षिणांदद्यात् इतिसूर्य्यावलोकनम् अथभूम्युपवेशनम् तत्रगो
मयेनसंलिप्तायांभूमौ ॐ पृथिव्यैनमः ॐ वाराहायनमः ॐ कुलदेवताभ्योनमः इति
नाममन्त्रैर्भूमौपृथिवीं वाराहं कुलदेवतां च प्रतिष्ठाप्यावाह्य उपचारैः सम्पूज्य वाल
कंभूमावुपवेशयेत् आचाराद्दुर्वैःपादस्थापनम् ततस्तंवालं देवब्राह्मणेभ्यः प्रणाम
य्य आशीर्वादादिभिरभिनन्दितं प्रदक्षिणमार्गेण गृहाभ्यन्तर्नयेत् अथतत्रजीवमातृ
णांपूजनंकुर्य्यात् आचम्य अर्घंसंस्थाप्य पूजासंकल्पंकुर्य्यात् अथेहेत्यासंकीर्त्य

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्म्मादिकर्म्मणा मुत्तरांगत्वेनुभित्तिलिखितानां कल्याण्या
अमुकगोत्रोऽमुकनाम्नः पुत्रस्य नामकर्म्मादिकर्म्मणा मुत्तरांगत्वेन भित्तिलिखितानां कल्याण्यादिसप्तजीवमातरः इहागच्छे
दिजीवमातॄणां पूजनं करिष्ये एतन्तो० ॐ भूर्भुवः स्वः कल्याण्यादिसप्तजीवमातरः इहागच्छ कल्याणीमंगलाभद्रा पुण्या
पुण्यमुखीतथा जयाच विजया चैव सप्तैता जीवमातरः इति ध्यात्वा ॐ कल्याण्यैनमः ॐ मङ्ग
लायैनमः ॐ भद्रायैनमः ॐ पुण्यायैनमः ॐ पुण्यमुख्यैनमः ॐ जयायैनमः ॐ विजयायै
नमः इति नाममन्त्रैः गन्धनादिनीराजनान्तं सम्पूज्य गुडसर्प्पिभ्यां वसोर्धाराः पातयेत् अद्येह
मुकोहं जीवमातॄणां प्रीतये गुडसर्प्पिभ्यां वसोर्धाराः पातयिष्ये ॐ वसोः पवित्रमसीति
वसोर्धाराः पातयित्वा वृहमाणीति पुष्पाञ्जलिं समर्प्य दक्षिणां दद्यात् अथ भूयसीदक्षि
णा अद्येहेत्याद्युच्चार्य्य अमुकोहं अमुकगोत्रो ऽमुकनाम्नोस्य बालकस्य दीर्घायुरारोग्या
वाप्तये बीजगर्भसमुद्भवैनो निर्वहणद्वारा श्रीपरमेश्वरप्रीत्यर्थं कृतानां नामकरणनिष्क्र
मण सूर्यावलोकन भूम्युपवेशन जीवमातृका पूजनकर्म्मणां साङ्गतार्थं कलशआचा
हितानां ब्रह्मवरुणसहितादित्यादि नवग्रहाणां प्रीतये इमां भूयसीं दक्षिणां नानागोत्रे
भ्यो ब्राह्मणेभ्यो ऽन्यस्येभ्यो दीनानाथेभ्यो नटनर्त्तकगायकेभ्यो विभज्य दास्ये ॐ
तत्सत् दक्षिणां दत्वा तत्राचाराद्महानीराजनादि कारयित्वा अभिषेक तिलकमंत्र एमः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पाठादिकारयेत् ब्राह्मणान्स्वबन्धुवर्गादीन्भोजयित्वा स्वयंभुञ्जीत इतिनामकरणनिष्क्र
मणसूर्य्यावलोकन भूम्युपवेशन जीवमातृकापूजन विधानम् अथान्नप्राशनविधिः षष्ठेष्टमे
वामासि सम्वत्सरे पूर्णे वा पुत्रस्यान्नप्राशनंकुर्य्यात् स्त्रीणांतु पञ्चमेसप्तमेवामासि तत्र
ज्योतिःशास्त्रोक्ते चन्द्रतारानुकूले दिवसे कर्त्ता कृतनित्यक्रियः शुचिः शुक्लवासाः प्रथमंगणेशं
पूजयेत् स्वासने उपविश्याचम्यार्घं संस्थाप्य पूजासंकल्पः अद्येहेत्यादिसंकीर्त्य अमु
कगोत्रोमुकशर्म्माहं अमुकराशेरमुकस्य पुत्रस्य करिष्यमाणान्नप्राशनकर्म्मणि नि
र्विघ्नतयाकार्य्य सिद्धये पूर्वाङ्गत्वेन भगवतोगणेशस्य पूजनंकरिष्ये पूर्वोक्तप्रकारेण ग
णेशंसम्पूज्य प्रधानसंकल्पः अद्येहेत्याद्युच्चार्य्य अमुकोहं अमुकराशेरस्यबालकस्य
मलप्राशनशुद्ध्यन्नाद्य ब्रह्मवर्चसतेज इन्द्रियायुर्लक्षण फलसिद्धये बीजगर्भसमुद्भवैनो
निर्बहणद्वारा श्रीपरमेश्वरप्रीतये अन्नप्राशन कर्म्मकरिष्ये तत्पूर्वाङ्गत्वेन गौर्य्यादिषोड
शमातृणांपूजनं नान्दीश्राद्धं पुण्याहवाचनंच करिष्ये इतिसंकल्प्य पूर्वोक्तविधिना मा
तृपूजानांदीश्राद्ध पुण्याहवाचनानि विधाय होमार्थं वेदींकृत्वा तत्रपञ्चभूसंस्कार
पूर्वकमग्निंसंस्थाप्य आचार्य्यब्रह्मणोर्वरणंकुर्य्यात् अद्येहामुकोहं अमुकराशेः
पुत्रस्य अन्नप्राशनाङ्गहोमकर्म्मणि आचार्य्यब्रह्मणोः पूजनपूर्वकंवरणंकरिष्ये इतिसंक
ल्प्य आचार्य्यब्रह्मणोर्वरणंकृत्वा कलशंसंस्थाप्य तत्रब्रह्मवरुणासहितादित्यादिनव

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यहानावाह्य सम्पूज्य तत्रप्रक्षेपोपवेशनादि आसादनान्ते विशेषोपकल्पनीयान्यासाद्य
ल् अन्नं सर्वं जनं रसांश्च उद्धरणपात्रे मधुशर्करघृतानि पुस्तकशास्त्रादिस्वप्रवृत्तिचिह्नानि
इतिस्थापयित्वा ततः पर्युक्षणान्तं कर्मकृत्वा शुचिनामाग्निं संस्थाप्य एतन्नो ॐ भूर्भुवः
स्वः शुचिनामाग्ने इहागच्छ इह तिष्ठ सुप्रतिष्ठितो वरदो भवेति प्रतिष्ठाप्य ततः तद्देवाग्निरि
त्यादिना ध्यात्वा ॐ शुचिनामाग्नये नमः इति नाममन्त्रेण आवाहनादि नीराजनान्तं सम्पूज्य
दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धो मनसा प्रजापतिं ध्यात्वा जुहुयात् इदं त्यागं कुर्यात्
अद्येह अमुकोहं अमुकस्य पुत्रस्यान्नप्राशन होमकर्मणा यक्ष्ये तत्र प्रजापतिमिन्द्रमग्निं
सोमं देवीं वाचं आज्येन प्राणापानं चक्षुः श्रोत्रं च चरुणा शेषेणाज्येन चरुणा स्विष्टकृतं आज्ये
नमहाव्याहृतिदेवताः सर्वप्रायश्चित्तदेवताः प्रजापतिं च यक्ष्ये इदं चर्वाज्यं मयापरित्यक्तं ॐ
तत्सत् तत्तद्देवताभ्यो यथादैवतमस्तु ॐ प्रजापतये स्वाहा इदं प्रजापतये ॐ इन्द्राय स्वाहा
इदमिन्द्राय ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय ततो द्वे आज्याहुती जु
होति देवीं वाचमिति भार्गव ऋषिस्त्रिष्टुप्छन्दो देवी वाग्देवता आज्याहुतिहोमे विनियोगः
ॐ देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वा
गस्मानुपसुष्टुतैतु स्वाहा इदं वाचे वाजो न इति देवा ऋषयः त्रिष्टुप्छन्दो अन्नं देवता आ
ज्याहुतिहोमे वि० ॐ देवीं वाचमिति पुनः पठित्वा ॐ वाजो नो अद्य प्रसुवाति दानं वाजो देवाँ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋतुभिः कल्पयामि वाजो हि मां सर्ववीरं जजान विश्वा ऽ आशा वाजपतिर्जयेयं स्वाहा इदं वा
चे वाजाय ततः श्रुवेण चरुमभिघार्य्य आज्यप्लुतेन स्थालीपाकेन जुहोति ॐ प्राणेनान्नमशीय
स्वाहा इदं प्राणाय ॐ अपानेन गन्धानशीय स्वाहा इदमपानाय ॐ चक्षुषा रूपाण्यशीय
स्वाहा इदं चक्षुषे ॐ श्रोत्रेण यशोऽशीय स्वाहा इदं श्रोत्राय तत आज्यचरुभ्यां ब्रह्मान्वार
ब्धो जुहुयात् ॐ अग्नये स्विष्टकृते स्वाहा इदम॰ ततः आज्येन भूराद्या नवाहुतीर्जुहुयात् ततः
संस्रवप्राशनम् पवित्रप्रतिपत्तिः प्रणीताविमोकः ब्रह्मणे पूर्णपात्रदानम् तत्र संकल्पः अ
द्येहेत्यादि अमुकोऽहं अमुकराशेः पुत्रस्यान्नप्राशनाङ्गहोमकर्मणः साङ्गतार्थं अपूर्ण
पूर्णार्थं च इदं पूर्णपात्रं सद्रव्यं ब्रह्मन्तुभ्यं सम्प्रददे ब्रह्मा गृहीत्वा अकर्म्मेति मन्त्रा
शिषं दद्यात् ततः सुलग्नसमागते लग्नदानसंकल्पः अद्येहेत्याद्युच्चार्य्य अमुकोऽहं अमु
कराशेः पुत्रस्यान्नप्राशनलग्नात् यत्रकुत्रस्थितानां आदित्यादिनवग्रहाणां दुष्टानां दुष्टफ
लोपशान्त्यर्थं शुभानां शुभफलाधिक्यप्राप्त्यै इदं सुवर्णं इमां दक्षिणां ब्राह्मणेभ्यो विभज्य
दास्ये ॐ तत्सत् दक्षिणां दत्वा सर्वान्रसान् सर्वमन्नं मध्वाज्यसक्तुसहितं एकस्मिन्पात्रे कृ
त्वा सुवर्णान्तर्हितया मुद्रिकया मातुरुत्सङ्गे स्थितं बालकं स्वाङ्कस्थितं वा देवतापुरतो ऽ ना
मिकाङ्गुष्ठाभ्यां हन्त हन्तेति मन्त्रेण पञ्चवारं प्राशयेत् हन्कारमनुष्या इति श्रुतेः ततोमतस्य
जलेन त्रिवारं मुखं शोधयेत् ततो माता बालकं स्वाङ्कादुभेत् तदा स बालको वस्त्रशस्त्र
लेखनी पुस्तकापि यदि प्रथमं गृह्णाति तेन तस्य जीविका भवेदिति ज्ञातव्यम् ततो होमदक्षि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अद्येहामुकोहं अमुकराशेः पुत्रस्य अन्नप्राशनाङ्गहोमकर्म्मणः
ण कर्म्मसाङ्गदक्षिणासंकल्पः अद्येहामुकोहं अमुकराशेः पुत्रस्य साङ्गतार्थं चेमां दक्षिणां आचार्याय अन्येभ्यो ब्रा
तथान्नप्राशनकर्म्मणः साङ्गफलप्राप्त्यर्थं साङ्गतार्थं च नानागोत्रेभ्यो ब्राह्मणेभ्यः तथान्येभ्यो नट
नर्त्तकेभ्यश्च विभज्य दास्ये तथेमां भूयसीदक्षिणां नानागोत्रेभ्यो विभज्य दास्ये तथाद्येोपपन्नेनान्नेन यथासंख्याका
नर्त्तक गायकादि दीनानाथेभ्यश्च विभज्य दास्ये तथायथोपपन्नेनान्नेन यथासंख्याका
न्ब्राह्मणांश्च भोजयिष्ये ॐ तत्सत् इति संकल्प्य दक्षिणां दत्वा रक्षाबंधनघृतच्छायाप्या
पुत्रकरणाभिषेक तिलकमंत्रपाठादिकारयित्वा जीवमातृपूजनं महानीराजनं च कृत्वा ब्राह्म
णान्भोजयित्वा इष्टबंधसहितः स्वयं भुञ्जीत इत्यन्नप्राशनविधिः अथजन्मोत्सवविधिः
ब्राह्मे मुहूर्त्ते उत्थाय तिलकल्कोदकेन स्नायात् स्नानसंकल्पः अद्येहत्याद्युच्चार्य अमु
कगोत्रो अमुकराशिः अमुकशर्म्माहं आयुरभिवृद्धये संवत्सरावच्छिन्न फलप्राप्तिकाम स्ति
लकल्कमिश्रित शीतलोदकेन स्नानं करिष्ये इति स्नात्वा सन्ध्यादिनित्यकर्म्मविधाय
जन्मदिने शनिभौमवासर संत्वे तत्तत्सूचितदोषपरिहाराय किञ्चित् ब्राह्मणाय दत्वा
अथ मुष्टिभवात्किञ्चिद्दितिकिञ्चित्सर्ग्वा ततो नवीनवस्त्रधारणं कुर्य्यात् परिधास्यै इ
त्यस्याथर्वणऋषिः पंक्तिश्छन्दो वासो देवता वस्त्रपरिधाने विनियोगः ॐ परिधास्यै यशोधा
स्यै दीर्घायुत्वाय जरदष्टिरस्मि शतं जीवाव शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये इति न
वं धौतं वस्त्रं परिधाय उत्तरीयधारणं कुर्य्यात् यशसामित्याथर्वणऋषिः पंक्तिश्छन्दः लिं

रामः
५८

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गोत्रादेवता उत्तरीयपरिधानेवि० ॐ यशसामाद्यावापृथिवी यशसेन्द्राबृहस्पती यशोभगश्च
माविद यशोमाप्रतिपद्यताम् सतिवस्त्रान्तरं यदस्त्वेतिपरिधाय निम्बगुग्गुल सिद्धार्थदूर्वागोरो
चनादिभिः पोटलिकांकृत्वा एतन्नइतिप्रतिष्ठाप्य ॐ भूर्भुवः स्वः पोटलिके सुप्रतिष्ठितावरदा
भवेतिप्रतिष्ठाप्य दक्षिणहस्तेवध्नीयात् ततउक्तविधिना गणेशंसम्पूज्य कलशंसंस्थाप्य
तत्रब्रह्मवरुणसहितादित्यादि नवग्रहानावाह्य सम्पूज्य अर्घसंस्थाप्य प्रधानसंकल्पं कु
र्यात्· अद्येहेत्यादि अमुकगोत्रो अमुकराशिरमुकशर्म्माहं ममायुष्याभिवृद्ध्यये वंशवृद्धि
कर्मकरिष्ये तदङ्गत्वेन दध्यक्षतपुञ्जेषु आवाहितानां कुलदेवतादि षष्ठीदेविपर्य्यन्तानां
कलशे आवाहितानां ब्रह्मवरुणसहितादित्यादि नवग्रहाणांच पूजनंकरिष्ये तत्रस्थाल्यां
नूतनंश्वेतंवस्त्रं प्रसार्य्य दध्यक्षतान् गृहीत्वा उत्तरपृष्ठ्यास्थापयेत् ॐ भूर्भुवः स्वः कुलदे
वते इहागच्छ इहतिष्ठ पूजार्थंत्वामावाहयामि १ ॐ भूर्भुवः स्वः स्वनक्षत्रेश अमुक इहागच्छ
इहतिष्ठ पूजार्थंत्वामावाहयामि ॐ भूर्भुवः स्वः प्रकृतिपुरुषात्मक मातापितरौ इहागच्छत
इहतिष्ठतं सुप्रतिष्ठितौवरदौभवतम् ॐ भू· ब्रह्मन्· ॐ भू· भानो· ॐ भू· विघ्नेश· ॐ भू· मा
र्कण्डेय· ॐ भू· वले· ॐ भू· व्यास· ॐ भू· जामदग्न्यराम· ॐ भू· अश्वत्थामन्· ॐ भू· कृपा-
चार्य्य· ॐ भू· प्रह्लाद· ॐ भू· हनूमन्· ॐ भू· विभीषण· ॐ भूर्भुवः स्वः षष्ठीदेवी इहागच्छ
इहतिष्ठ सुप्रतिष्ठितावरदाभव पूजार्थंत्वां आवाहयामि इत्यावाह्य एतन्त इत्यादि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

ॐ भूर्भुवः स्वः कुलदेवतादिदेवताः अर्क्कादिषष्ठीपर्यन्ताः इहागच्छन्तु इहतिष्ठन्तु सुप्रतिष्ठिता
वरदाभवन्तु ॐ वरदाभयपाणय इति संपूज्य ध्यानम् मार्कण्डेयध्यानविधिमः ॐ द्विभुजं जटि
लं सौम्यं कमण्डलुं चिरजीविनम् मार्कण्डेयं नरो भक्त्या पूजयेत्प्रयतः शुचिः इति ध्यात्वा नामम
न्त्रेण पूजनम् ॐ कुलदेवतायै नमः ॐ स्वजन्मनक्षत्राय अमुकाय नमः ॐ प्रकृतिपुरुषात्म
कमातापितृभ्यां नमः ॐ ब्रह्मणे नमः ॐ भानवे नमः ॐ विघ्नेशाय नमः ॐ मार्कण्डेयाय नमः
ॐ बलये नमः ॐ व्यासाय नमः ॐ जामदग्न्यरामाय नमः ॐ अश्वत्थाम्ने नमः ॐ कृपाचा
र्याय नमः ॐ प्रह्लादाय नमः ॐ हनुमते नमः ॐ विभीषणाय नमः ॐ षष्ठीदेव्यै नमः इति
नाममन्त्रैः आवाहनासनपाद्यार्घ्यस्नानाचमन वस्त्रगंधाक्षतपुष्पधूपदीप नैवेद्यभूषणा
दिभिः सम्पूज्य नाममन्त्रेण जपं विधाय नीराजनं कृत्वा ब्रह्मामुरारीति नवग्रहेभ्यः पुष्पा
ञ्जलिं समर्प्य मार्कण्डेयं प्रार्थयेत् मार्कण्डेय महाभाग सप्तकल्पान्तजीवन आयुरा
रोग्यसिद्ध्यर्थमस्माकं वरदो भव १ चिरजीवी यथा त्वं भो भविष्यामि तथा मुने रूपवा
न्वित्तवांश्चैव श्रिया युक्तश्च सर्वदा २ मार्कण्डेय नमस्तेऽस्तु सप्तकल्पान्तजीवन आयु
रारोग्यसिद्ध्यर्थं प्रसीद भगवन्मुने ३ चिरजीवी यथा त्वं तु मुनीनां प्रवर द्विज कुरुष्व मुनि
शार्दूल तथा मां चिरजीविनम् ४ ततः षष्ठीं प्रार्थयेत् जय देवि जगन्मातर्जगदानंदका
रिणी प्रसीद मम कल्याणि महाषष्ठि नमोऽस्तु ते १ रूपं देहि यशो देहि भगं भगवति दे

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हिमे पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे २ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च
ब्रह्माविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे ३ इति सम्प्रार्थ्य ततोऽञ्जलिना मार्कण्डेयाय निवेदितपयः
पञ्च वारं पिबेत् तत्र मन्त्रः सतिलं गुडसम्मिश्रमञ्जल्यर्द्धमितं पयः मार्कण्डेयाद्वरं लब्ध्वा पिबा
म्यायुः प्रवृद्धये कृतायाः कुलदेवतादीनां इति पीत्वा मुखं प्रक्षाल्य दक्षिणासंकल्पः अद्येहेत्या
दि अमुकगोत्रोऽमुकशर्माहं आयुरभिवृद्धये कृतायाः कुलदेवतादीनां आदित्यादिनवग्रहाणां
च पूजायाः साङ्गुण्यार्थं इमां दक्षिणां ब्राह्मणेभ्यो विभज्य दास्ये ॐ तत्सत् तथाचैवमापन्न
नान्नेन ब्राह्मणान्भोजयिष्ये इति संकल्प्य दक्षिणां दत्वा अभिषेकतिलकमन्त्रपाठादि
फाययित्वा घृतच्छायां विधाय ब्राह्मणान्भोजयित्वा स्वयं भुञ्जीत स्वाङ्गं नखकेशानां भेष
नाध्वगमो तथा आमिषं कलहं हिंसा वर्षवृद्धौ विवर्जयेत् जन्मतिथिरोदयिकी ग्राह्या इति ज
न्मोत्सवविधिः अथ कर्णवेधः तत्र व्यासः कृतचूडे व्रते बाले कर्णवेधो विधीयते नेह्याचार
कुलाचारतो वा गन्तव्यम् वर्षे तृतीये पञ्चमे वेति अयुग्मवर्षे कर्णवेधः तत्र चन्द्रतारानुकूले
शुभदिने कर्णवेधोक्तनक्षत्रे पिता प्रातःकृत्याय स्वकीयं प्रातःकृत्यं निर्वर्त्य गणेशपूजनं कुर्यात्
आचम्य अर्घं संस्थाप्य पूजासंकल्पः अद्येहेत्यादि अमुकोहं अमुकराशेः पुत्रस्य करिष्य
माणकर्णवेधकर्मणि निर्विघ्नताप्राप्तये पूर्वाङ्गत्वेन गणेशस्य पूजनं करिष्ये उक्तविधिना

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गणेशंसम्पूज्य प्रधानसंकल्पं कुर्य्यात् अद्येहेत्याद्युच्चार्य्य अमुकगोत्रोऽमुकशर्म्माहं अमुकरा
शेः पुत्रस्य बीजगर्भसमुद्भवैनो निवर्हणद्वारा पुत्रस्यायुः श्रीवृद्ध्यै श्रीपरमेश्वरप्रीतये कर्णवेधकर्म
करिष्ये तत्पूर्वाङ्गत्वेन गणपतिसहित गौर्य्यादिषोडशमातॄणां पूजनं नान्दीश्राद्धं पुण्याहवाच
नंचकरिष्ये इतिसंकल्प्य उक्तविधिना मातृपूजा नान्दीश्राद्ध पुण्याहवाचनानिकृत्वा कलशं
संस्थाप्य तत्रनवग्रहानावाह्य जलेकेशवादिदेवानांपूजनं कुर्य्यात् तत्रसंकल्पः अद्येहेत्यादि
अमुकराशेः पुत्रस्य कर्णवेधकर्म्मणि कलशे आदित्यादिनवग्रहाणां जलेकेशवादिदेवानां
पूजनंकरिष्ये इतिसंकल्प्य एतन्तेइति ॐ भूर्भुवः स्वः कलशे आदित्यादिनवग्रहाः जलेकेश
वादिदेवाः सुप्रतिष्ठितावरदाभवन्तु नाममन्त्रेणपाद्यादिभिः पूजयेत् ॐ केशवायनमः ॐ
हरायनमः ॐ ब्रह्मणेनमः ॐ चन्द्रायनमः ॐ सूर्य्यायनमः ॐ दिगीशेभ्योनमः ॐनासत्या
भ्यांनमः ॐ सरस्वत्यैनमः ॐ गवेनमः ॐ गुरुभ्योनमः इतिनाममन्त्रैर्ध्यानावाहनासन पाद्या
र्घ्याचमन वस्त्रगंधाक्षत पुष्पधूपदीप नैवेद्यभूषणादिभिः सम्पूज्य जपंविधाय समर्प्य
नीराज्य पुष्पाञ्जलिंसमर्प्य ततः स्वस्वदेवंभिषग्वरं ब्राह्मणांश्चोचितंच नमस्कृत्य मातुरु
त्संगास्थितं भूषणवस्त्रादिभिरलंकृतं बालकं गुडमोदकादिभोजनार्थंदत्वा अद्येहेत्यादि
अमुकराशेरस्यबालकस्य कर्णवेधलग्नादमुकस्थानस्थितेनामुकग्रहेण सूचितारिष्ट
निवृत्त्यर्थं ग्रहाणांप्रीतयेइमांदक्षिणां ब्राह्मणायददास्ये इतिलग्नदानंविधाय ततो दैवज्ञ

रामः
५६

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

योधिते शुभे लग्ने पित्राश्रोत्रियको ऽन्योवा सुवर्णसूच्या रजतसूच्यावा अथवाङ्गुल्या ब्राह्मणवा
लकस्य दक्षिणकर्णं वेधयेत् तत्रमंत्रः भद्रंकर्णेभिरितिप्रजापतिर्ऋषिः त्रिष्टुप्छंदः लिंगो
क्तादेवता दक्षिणकर्णाभिमंत्रणे विनियोगः ॐ भद्रंकर्णेभिः शृणुयामदेवा भद्रंपश्येमाक्षभि
र्यजत्राः स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहिदेवहितंयदायुः अथवामकर्णाभिमंत्रणम्
वक्ष्यन्तीवेतिदेवाऋषयः त्रिष्टुप्छन्दः लिंगोक्तादेवता वामकर्णाभिमंत्रणेविनियोगः ॐ
वक्ष्यन्तीवेदागनीगन्तिकर्णं प्रियꣳसखायं परिषस्वजानाः योषेवशिङ्क्ते विततादिधन्वञ्ज्या
ऽइयꣳसमनेपारयन्ती इत्यभिमंत्र्यकर्णौ वेधयित्वा दक्षिणासंकल्पंकुर्यात् अद्येहा
मुकोहं अमुकगोत्रस्य बालकस्य कर्णवेधकर्मणः साङ्गफलप्राप्त्यर्थं साङ्गुण्यार्थं चेमां
दक्षिणां ब्राह्मणेभ्योविभज्यदास्ये ॐ तत्सत् तथायथोपपन्नेनान्नेन ब्राह्मणांश्चभो
जयिष्ये इतिसंकल्प्यदक्षिणांदत्वा अभिषेकतिलकरक्षाबंधनघृतच्छायामन्त्रपाठा
दिकारयित्वा जीवमातृपूजनंमहानीराजनंचकुर्यात् इतिकर्णवेधविधिः अथाक्षरस्वी
कारविद्यारम्भो बालकस्यपञ्चमवर्षे कुम्भादित्यविवर्ज्जिते उदगयने चन्द्रताराद्यनुकू
लेशुभेदिने अक्षरस्वीकारं विद्यारम्भंचकारयेत् मार्कण्डेयः अभ्यंगस्नानपूर्वंतु गन्धा
द्यैश्चविभूषितः शुक्लवस्त्रंसमास्तीर्य्य तण्डुलोपरिपूजयेत् सर्वंसनिष्पत्तिकाले विद्या
रम्भंतुकारयेत् पूजयित्वाहरिंलक्ष्मीं देवींचैवसरस्वतीम् अथप्रयोगः स्वस्तिवाच

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नपठित्वा अर्घंसंस्थाप्य प्राणानायम्य उक्तविधिनागणेशंसम्पूज्य प्रधानसंकल्पंकुर्व्या
त् अद्येहेत्यादि अमुकोहं अमुकशर्म्मणः पुत्रस्य विद्याप्राप्त्यै व्यवहारसिद्ध्यै अक्षरारम्भं
विद्यारम्भंचकरिष्ये तत्पूर्वांगत्वेन गणपतिसहितगौर्य्यादिषोडशमातृणांपूजनं नान्दीश्रा
द्धं पुण्याहवाचनंचकरिष्ये इतिसंकल्प्य मातृपूजा नान्दीश्राद्धं पुण्याहवाचनानिविधा
य कलशंसंस्थाप्य तत्रग्रहानावाह्य सम्पूज्य रक्षासूत्रंचकल्पयित्वा वेदिकायांताम्रपी
ठेवा नवंधौतंशुक्लवस्त्रंसमास्तीर्य्य रक्ताक्षतपुञ्जेषु गणेशाद्यादीन्पञ्चाशद्देवानावाह
येत् तत्रसंकल्पः अद्येहामुकोहं अमुकशर्म्मणस्य बालकस्य अक्षरस्वीकारविद्यारम्भ
कर्म्मणि पूर्वाङ्गत्वेन रक्ताक्षतपुञ्जेषु गणेशादयस्यादिदेवानां तथायजुर्विद्यादीनांच आ
वाहनपूर्वकं पूजनंकरिष्ये इतिसंकल्प्य ॐ भूर्भुवः स्वः गणेश इहागच्छ इहतिष्ठ पूजा
र्थंत्वां आवाहयामि इत्युक्त्वा स्वदक्षिणतः स्वाभिमुखंस्थापयेत् ॐ भू विघ्नेश ॐ भू ल
क्ष्मी ॐ भू देवी ॐ भू सरस्वति ॐ भू स्वविद्ये यजुर्विद्ये ॐ भू स्वविद्यासूत्रकारका
त्यायन ॐ भू ब्रह्मन् ॐ भू व्यास ॐ भू गौतम ॐ भू जैमिने ॐ भू मनो ॐ भू
पाणिनि ॐ भू कात्यायन ॐ भू पतञ्जलि ॐ भू यास्क ॐ भू पिङ्गल ॐ भू गर्ग ॐ
भू कणाद ॐ भू कपिल ॐ भू वाल्मिके ॐ भू वामन ॐ भू धन्वन्तरे ॐ भू कौशाम्ब
ॐ भू भरत ॐ भू विश्वकर्म्मन् ॐ भू वेदाः इहागच्छन्तु पूजार्थंयुष्मानावाहया एमः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मि ॐ भू॰ पुराणानि॰ ॐ भू॰ न्याय॰ ॐ भू॰ मीमांसे॰ ॐ भू॰ धर्म्मशास्त्र॰ ॐ भू॰ शिक्षे॰ ॐ भू॰ कल्प॰
ॐ भू॰ व्याकरण॰ ॐ भू॰ निरुक्त॰ ॐ भू॰ छन्दांसि॰ ॐ भू॰ ज्योतिष॰ ॐ भू॰ वैशेषिक॰ ॐ भू॰ वेदान्त॰
ॐ भू॰ सांख्य॰ ॐ भू॰ पातञ्जल॰ ॐ भू॰ काव्य॰ ॐ भू॰ अलङ्कार॰ ॐ भू॰ वैद्यशास्त्र॰ ॐ भू॰ धनुर्वेद॰
ॐ भू॰ गान्धर्ववेद॰ ॐ भू॰ शिल्पशास्त्र॰ ॐ भू॰ पालकाचार्य्य॰ ॐ भू॰ शालीहोत्राचार्य्य॰ ॐ भू॰
शौनिकाचार्य्य॰ इतिसमुच्चयन्तनाममन्त्रैः क्रमेणावाह्य एतन्त इतिप्रतिष्ठाप्य ॐ भूर्भुवः
स्वः गणेशादिशौनिकान्तादेवताः सुप्रतिष्ठितावरदाभवन्तु अथसरस्वत्यावाहनेविशेषः
भूमौगोचर्ममात्रंविलिप्य पाषाणादखण्डोद्धृतांमृदमानीय सैकतंस्थण्डिलंनिर्म्माय तस्यो
परितयामृदा पञ्चकोणांअष्टकोणांवा सरस्वतीयन्त्रंविलिख्य तस्मिन्सरस्वतीमावाह
येत् ॐ भूर्भुवःस्वः भुवनमातः सर्ववाङ्मयरूपे सरस्वतिइहागच्छइहतिष्ठ पूजार्थंत्वामा
वाहयामि इत्यावाह्य ॐ एतन्ते॰ ॐ भूर्भुवःस्वः अस्यांमृण्मयमूर्त्तौ सरस्वतिसुप्रति
ष्ठितावरदाभव इतिप्रतिमास्थापयेत् अथध्यानम् तत्रपूर्वंगणेशध्यानम् धृतपाशा
ङ्कुशकल्पलतिकः स्वदश्चबीजपूरयुतः शशिसकलकलितमौलि स्त्रिलोचनोरुणवपु
षेभगजवदनः भास्वद्भूषणदीप्तो बृहदुदरः पद्मविष्टरोल्लसितो ध्येयोऽनायतदापद
सरसिरुहः सदामनुजैः १ अथविष्णोर्ध्यानम् उद्यत्कोटिदिवाकराभमनिशं शंखंगदां
पंकजं चक्रंविभ्रतमिन्दिरावसुमती संशोभिपार्श्वद्वयम् कोटीराङ्गदहारकुण्डलधरं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पीताम्बरं कौस्तुभोद्दीप्तं विभ्रयधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजेत् २ अथलक्ष्मीध्यानम् का
न्त्याकाञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैः हस्तोत्क्षिप्तहिरण्मयामृतघटैः रासिच्यमा
नांश्रियं विभ्राणांवरमब्जयुग्ममभयं हस्तैः किरीटोज्वलां क्षौमावद्धनितम्बविम्बललितां
वन्देरविन्दस्थिताम् ३ अथदेवीध्यानम् अध्यारूढांमृगेन्द्रं सजलजलधरश्यामलांहस्तप
द्मैः शूलंबाणंकृपाणंत्वरिजलजगदाचापपाशान्वहन्तीम् चन्द्रोत्तंसांत्रिनेत्रां चतसृभिरभि
तः खेटकं विभ्रतीभिः कन्याभिः सेव्यमानांप्रतिभयभयदां शूलिनींभावयामि ४ अथसर
स्वतीध्यानम् अङ्कालुकश्यगाङ्कु कोटिसदृशी मापीनतुङ्गस्तनीं चन्द्रार्द्धाङ्कितशेखरां मध्य
मदामालोलनेत्रत्रयाम् विभ्राणामनिशं वरं जपवटीं विद्यांकपालंकरे गाढायौवनगर्वि
तोत्तलिमितं वागीश्वरीमाश्रये ५ इतिध्यात्वा ॐ वरदाभयपाशाय इतिसर्वेषांध्यानम्
ततश्चतुर्थ्यन्तेनाममन्त्रैः सर्वेषांपूजनम् ॐ गणेशायनमः ॐ विष्णवे · ॐ लक्ष्म्यै · ॐ दे
व्यै · ॐ सरस्वत्यै · ॐ ऋषिविद्यायै यजुर्विद्यायै · ॐ ऋषिविद्यास्तम्भकाय कात्यायनाय · ॐ ब्रह्म
णे · ॐ व्यासाय ॐ गौतमाय · ॐ जैमिनये · ॐ मनवे · ॐ पाणिनये · ॐ कात्यायनाय · ॐ
पतञ्जलये · ॐ भास्कराय · ॐ पिङ्गलाय · ॐ गर्गाय · ॐ कणादाय · ॐ कपिलाय · ॐ
वाल्मीकये · ॐ वामनाय · ॐ धन्वन्तरये · ॐ कृष्णाम्बाय · ॐ भरताय · ॐ विश्वकर्मणे ·
ॐ वेदेभ्यः · ॐ पुराणेभ्यः · ॐ न्यायाय · ॐ मीमांसायै · ॐ धर्मशास्त्राय · ॐ त्रिकायै ·

रामः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ कल्पाय॰ ॐ व्याकरणाय॰ ॐ निरुक्ताय॰ ॐ छन्दोभ्यो नमः ॐ ज्योतिषाय॰ ॐ वैशेषिकाय॰
ॐ वेदान्ताय॰ ॐ सांख्याय॰ ॐ पातञ्जलाय॰ ॐ काव्याय॰ ॐ अलङ्काराय॰ ॐ वैद्यशास्त्राय॰
ॐ धनुर्वेदाय॰ ॐ गान्धर्ववेदाय॰ ॐ शिल्पशास्त्राय॰ ॐ पालकाचार्य्याय॰ ॐ शालीहोत्राचा
र्य्याय॰ ॐ शौनिकाचार्य्याय॰ इति नाममन्त्रैः ॐ गणानान्त्वा॰ ॐ तद्विष्णोः॰ ॐ श्रीश्चते॰ ॐ सम
स्यै॰ ॐ सरस्वतीयोन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्त्ति अपां रसेन वरुणो साम्न
न्द्रः श्रियेजनयन्नप्सुराजा॰ इति वैदिकमन्त्रैश्च सेवज्ञां आसन पाद्यार्घ्यस्नानाचमन वस्त्र
यज्ञोपवीत गन्धाक्षतपुष्पधूपदीपनैवेद्यभूषणताम्बूल नीराजनान्तं पूजनं विधाय नामम
न्त्रैः पुष्पाञ्जलिं समर्प्य सर्ववाङ्मयाधिपतये श्रीसरस्वत्यै नमः इति सरस्वत्यै पुष्पाञ्जलिं
समर्प्य नमस्कार प्रदक्षिणाः कुर्य्यात् ततो वेद्यां पञ्चभूसंस्कार पूर्वक मग्निं संस्थाप्य
आचार्य्यब्रह्मणोर्वरणं कुर्य्यात् एतेनेति पुष्टिवर्द्धननामाग्निं प्रतिष्ठाप्य ॐ भूर्भुवः स्वः
पुष्टिवर्द्धननामाग्ने सुप्रतिष्ठितो वरदो भव इति वाग्निं इति ध्यात्वा पुष्टिवर्द्धननामाग्नये नमः
इति नाममन्त्रेण पाद्यादिनीराजनान्तं सम्पूज्य ब्रह्मोपवेशनादि पर्य्युक्षणान्तं कर्म्म समाप्य
द्रव्यत्यागं कुर्य्यात् अद्येहामुकगोत्रो ऽस्य बालकस्य अक्षरारम्भविद्यारम्भहोमकर्म्मणाहं
यक्ष्ये तत्रेदमाज्यं आघाराज्यभागदेवताभ्यो गणेशादिदेवताभ्यो महाव्याहृतिदेवताभ्यः
सर्वप्रायश्चित्तदेवताभ्यः अग्नये स्विष्टकृते च मया परित्यक्तं यथादेवतमस्तु ब्रह्मणा चा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रन्धौ मनसा प्रजापतिं ध्यात्वा जुहुयात् ॐ प्रजापतये स्वाहा इदं प्रजापतये इत्याघारावाज्यभागौ
हुत्वा प्रधानहोमं कुर्यात् ॐ गणेशाय स्वाहा इत्यादि त्रिसनिकान्तं चतुर्थ्यन्त स्वाहान्तमन्त्रैः
के कामाज्याहुतिं हुत्वा ततो भूरादि नवाहुति होमं स्विष्टकृतं च हुत्वा संस्रवप्राशनादि पूर्णपा
त्रदानान्तं विधाय होमदक्षिणा अद्येहामुकशर्मा पुत्रस्य अक्षरारम्भ विद्यारम्भकर्मणि एत
द्धोमकर्मणः साङ्गतार्थं इमां दक्षिणां आचार्याय ददास्ये तत्सत् इति दत्त्वा धात्रीं वस्त्रभूष
णादिभिः संतोष्य आचार्यं वस्त्रालंकारादिभिः सम्पूज्य लग्नदानं कुर्यात् अद्येहामुक
शर्मा पुत्रस्य अक्षरस्वीकार विद्यारम्भलग्नाद्यवकुवास्थितानां ग्रहाणां शुभानां शुभफला
धिकप्राप्त्यै दुष्टानां दुष्टफलनिवारणार्थं इमां दक्षिणां ब्राह्मणाय ददास्ये इति लग्नदा
नं विधाय ब्राह्मणान् संतोष्य अभ्यङ्गस्नानपूर्वकं वस्त्रस्रग्गन्धालंकारादिभिर्भूषितं बाल
कं गणेशादिदेवेभ्यः प्रणाम्य प्राङ्मुखो गुरुः पश्चिमाभिमुखं बालकं गणेशादिदेवेभ्यः
प्रणाम्य प्राङ्मुखो गुरुः पश्चिमाभिमुखं बालकं प्रणवपूर्वकं अक्षरस्वीकारं कारयेत् तत्र प्र
भूर्भुवः स्वः नमस्कारः ॐ अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया चक्षुरुन्मीलितं येन
तस्मै श्रीगुरवे नमः ततः पालाशदण्डोद्धृत शुभधूलिसंयुते शुभपीठे पञ्चकोणमष्टको
णं वा सरस्वतीयन्त्रं विलिख्य तत्र सरस्वतीं प्रणमेत् ॐ सरस्वति नमस्तुभ्यं वरदे कामरू
पिणि विश्वरूपे विशालाक्षि विद्यां देहि नमोस्तु ते इति प्रणम्य गन्धाक्षतपुष्पपूगीफला

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिभिः सम्पूज्य स्वर्णशलाकया रौप्यशलाकया वा अकारादिक्षकारान्तान् वर्णान् लिखित्वा
वाचयेत् यथा ॐ नमः सिद्धं अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः क ख ग घ ङ च
छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह ळ क्ष इत्यक्षराणि त्रिवारं वाच
यित्वा विद्यारम्भं कारयेत् यस्य ज्ञानदयासिन्धोरिति वाग्यथा विवेति च पठित्वा गुरुं दक्षिणादि
भिः संतोष्य प्रणम्य भूयसीं संकल्पयेत् अद्येहामुकराशेर्बालकस्य अक्षरस्वीकार विद्या
रम्भकर्म्मणोऽङ्गत्वेन अक्षतपुञ्जेषु गणेशादिदेवानां पूजनस्य होमकर्म्मणश्च साद्गुण्यार्थं
साङ्गफलप्राप्त्यर्थं चेमां दक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दास्ये ॐ तत्सत् तथा
यथोपपन्नेनान्नेन ब्राह्मणांश्च भोजयिष्ये इति संकल्प्य दक्षिणां दत्वा रक्षाबंधन अभ्यु
क्षणाभिषेक तिलकमंत्रपाठादिकारयित्वा ब्राह्मणान्भोजयित्वा स्वयं भुक्त्वा यथा
सुखं विहरेत् इत्यक्षरस्वीकार विद्यारम्भौ अथ चूडाकरणम् तत्र चूडाकर्मदिवसात्पूर्व
दिवरात्रौ गणपतिपूजनपूर्वकं केशाधिवासनं कुर्यात् तत्र पीतवस्त्रनवखण्डेषु हरिद्रादूर्वा
क्षतपाषाणादि मङ्गलद्रव्याणि क्षिप्त्वा सूत्रेण त्रिगुणेन दृढं बध्वा नवपोटलिका निर्म्माय तस्मै
कोदशमीं च निर्म्माय स्थापयेत् ततः स्वस्तिवाचनपूर्वकं शुभासन उपविश्याचम्य गणेशा
पूजनं कुर्यात् तत्र संकल्पः अद्येहेत्यादि अमुकोऽहं अमुकराशेः पुत्रस्य करिष्यमाणचू
डाकरणप्रयोगाङ्ग केशलतिकाधिवासनकर्म्मणो निर्विघ्नतासिद्धये भगवतो गणेश्वरस्य म

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री
रा

थामिलितोपचारैः पूजनं करिष्ये इति संकल्प्य गणेशपूजन विधिना गणेशं सम्पूज्य प्रधानसं
कल्पं कुर्य्यात् यथा अद्येहेत्यादि अमुकोहं अमुकशर्म्मणः पुत्रस्य श्वः करिष्यमाणचूडाक
र्म्मसिद्ध्यर्थं केशाधिवासनं करिष्ये इति संकल्प्य निर्म्मिताः पोटलिकाऽआदाय एकैके
कया पोटलिकया एकैकां जूटिकां केशगुच्छीयात् तत्रक्रमः पूर्वशिरो दक्षिणतस्ति स्त्रः
ततः पश्चात्त्रिस्त्रः तत उत्तरतोपि त्रिस्त्रः तत एकया मध्ये सम्प्राचितां शिखां मङ्गलघोषपुरस्स
रं बध्नीयात् आचारादि पोटलिके अन्ये निर्म्माय तयोरेकांकक्रे एकांशालल्यां च बध्नीया
त् ततः एतन्त्रो ॐ भूर्भुवः स्वः चूडाकर्म्म जूटिकाः सुप्रतिष्ठिता भवन्त्विति प्रतिष्ठाप्य द
क्षिणासंकल्पः अद्येहेत्यादि अमुकशर्म्मणः पुत्रस्य केशाधिवासनकर्म्मणः साङ्गतार्थं द
क्षिणां दक्षिणां ब्राह्मणाय दास्ये ॐ तत्सत् इति दक्षिणां दत्वा पोटलिका उष्णिमादिना व
ध्वा सेवेश्वोदितिकेशाधिवासनम् अथ चूडाकर्म्मदिवसे प्रातरुत्थाय स्वकीयं नित्य
कर्म्म समाप्य गीतवादित्रादि पञ्चघोषपूर्वकं पश्चिमद्वारेण शालां प्रविशेत् सा च शाला
नवग्रहयागसिद्धैव तत्र स्वासन उपविश्याचम्य अर्घ्यं सम्पाद्य प्राणायामं विधाय ग
णेशपूजनविधिना गणेशपूजनं विदध्यात् तत्र प्रधानसंकल्पः ॐ विष्णुः अद्येहेत्यादि
अमुकोहं अमुकस्य करिष्यमाणचूडाकरणोपनयन वेदारम्भसमावर्त्तनकर्म्मसु स
र्वाभ्युदयप्राप्त्यर्थं गणपतिसहित गौर्य्यादि षोडशमातृणां पूजनं करिष्ये इति संकल्प्य मातृः

षोडशे

एम्पः
९०

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूजयित्वा वसोर्धाराः पातयित्वा दक्षिणां दद्यात् तत आभ्युदयिकश्राद्धं कुर्य्यात् पुण्याहवाच
नं च विधाय साम्प्रतिकाचारात् गणेशपूजनमात्रं विधाय चूडाकरणवेदीसमीपमागत्योपवि
श्याचम्यार्घं संस्थाप्य प्रधानसंकल्पं कुर्य्यात् यथा अद्येहेत्यादि संकीर्त्तनान्ते अमुकोहं
अमुकशर्म्मणः पुत्रस्य बीजगर्भसमुद्भवैनो निवर्हणबलायुर्वर्चोभिवृद्धिद्वारा ॐ तत्सत् श्रीपरमे
श्वरप्रीतये उपनयनात्प्राक् चूडाकर्म्मसंस्कारं करिष्ये तत्र चूडाकर्म्माधिकारसिद्ध्यर्थं त्री
न्ब्राह्मणान्भोजयिष्ये इति संकल्प्य तत्र आचार्य्यब्रह्मकर्म्मकर्तॄन् आचार्य्यब्रह्मणोक्त
विधिना वरणं कुर्य्यात् तत आचार्य्यः चूडाकरणविधौ पञ्चभूसंस्कारपूर्वकमग्निं स्था
पयेत् अत्रावसरे माता कुमारं मङ्गलद्रव्यैः संस्नाप्य अहतवाससी परिधाप्य स्वयं च नवीन
वस्त्राणि परिधाय कुमारमङ्के निधाय पञ्चघोषपुरःसरं पश्चिमद्वारेण शालां प्रविश्य अग्नेः
पश्चात्पत्युर्वामत उपविशति ततः पिता ब्रह्मोपवेशनादि पर्युक्षणान्तं कर्म्म समाप्य आ
मादनान्ते विशेषमवन्तनिस्थापयेत् शीतोष्णोदकमिश्रणाय मेकं पात्रं शीतं जलम् उष्णं
जलम् नवनीतपिण्डं घृतपिण्डं दधिपिण्डं वा क्षीरणीशलली त्रिशुक्लानकुर्ष्येतल्प्यतः सप्त
विंशतिदर्भपिञ्जूल्यः पवित्रलक्षणाः ताम्यक्षौकार्य्याकतिक्षालितः क्षुरः सूत्रवेष्टितः कृत
नेक्षुरस्ताम्रमयः ताम्रपरिष्कृतो लोहो वा आनडुहं गोमयं नापितश्चेति ततः पवित्रच्छेदना
दिपर्युक्षणान्तं कर्म्म कृत्वा सभ्यनामाग्निं संस्थाप्य एतन्तदिति ॐ भूर्भुवः स्वः सभ्यनामा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्नेस्त्वप्रतिभृतो वरदोभव तेदेवाग्निरिति चत्वारिशृङ्गाइतिच ध्यानावाहन पाद्यादिनीराजनान्तं
सम्पूज्य द्रव्यत्यागंकुर्य्यात् अद्येहेत्यादि अमुकोहं अमुकशर्म्मा पुत्रस्य चूडाकर्म्मणाख्ये
तत्रप्रजापतिमिन्द्रमग्निं सोममग्निंवायुं सूर्य्यं अग्नीवरुणावग्नी वरुणावग्निं वरुणं सवि
तारं विष्णुं विश्वान्मरुतः स्वर्कान् वरुणमदितिं प्रजापतिमग्निं स्विष्टकृतं चाज्येनाहं यक्ष्ये
इदमाज्यं तत्तद्देवताभ्यो मयापरित्यक्तं यथादैवतमस्तु इतिद्रव्यत्यागसंकल्पः दक्षिणं
जान्वाच्य ब्रह्मणान्वारब्धो मनसाप्रजापतिं ध्यात्वा जुहुयात् ॐ प्रजापतये स्वाहा इदं प्र·
ॐ इन्द्राय स्वाहा इदमि· ॐ अग्नये स्वाहा इदम· ॐ सोमाय स्वाहा इदं सोमाय इत्याघा
राज्यभागौ कृत्वा भूरादिहोमं कुर्य्यात् ब्रह्मणे पूर्णपात्रदानम् अद्येहामुकोहं अमुक
शर्म्मा अमुकनाम्नः पुत्रस्य चूडाकर्म्माङ्गहोमकर्म्मणः साङ्गफलप्राप्तये साद्गुण्यार्थञ्च इदं
पूर्णपात्रं सदक्षिणं ब्रह्मणे तुभ्यमहं सम्प्रददे अकृत्कर्म्म कर्म्मकृत् इतिमन्त्रपाठः ततो
दैवज्ञबोधित शुभलग्ने लग्नदानं कुर्य्यात् तत्रसंकल्पः अद्येहामुकशर्म्मा स्वकुमारस्य
चूडाकर्म्म लग्नाधिपत्यकुत्रस्थानस्थितानां आदित्यादि नवग्रहाणां दुष्टानां दुष्टफलोप
शान्तये शुभानां विशेषतः शुभफलप्राप्तये इदं सुवर्णं सुवर्णनिष्क्रयीभूतं द्रव्यं वा दैव
ज्ञायदातुमहमुत्सृजे ॐ तत्सत् दैवज्ञं सम्पूज्य दद्यात् तत उपकल्पितपात्रे शीतास्वु
अप्स्वु उष्णा आपः आसिञ्चति अनेनमन्त्रेण उष्णेनवायउइति परमेष्ठीऋषिः प्रतिष्ठा एमः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

छन्दो लिंगोक्ता देवता उष्णोदकासेचने विनियोगः ॐ उष्णेन वाय उदकेनेह्यदिति केशान्वप इति
तत्र तूष्णीं नवनीतपिण्डं घृतपिण्डं दधिपिण्डं च प्रक्षिपति ततः पश्चाद्यथा पूर्वमधिवासितं
दक्षिणं गोदानं मुन्दयति क्लेदयति आर्द्रीकरोतीत्यर्थः तत्र मंत्रः सवित्रेति प्रजापतिर्ऋषिर्गा
यत्री छन्दः आपो देवता उन्दने विनियोगः ॐ सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूं दी
र्घायुत्वाय वर्चसे इति ततस्त्रिशाखया शल्ल्या तूष्णीं कुशमिश्रान्केशान्विनीय पृथ
क्कृत्य तेष्वेव केशेषु कुशतरुणान्यन्तर्दधाति तत्र मंत्रः ओषध इति प्रजापतिर्ऋषिर्यजुश्छन्दः
ओषधिर्देवता कुशतरुणान्तर्द्धाने विनियोगः ॐ ओषधे त्रायस्व स्वधिते मैनं हिंसीः
इति सकुशतरुणान्केशान्सव्यहस्ते धृत्वा दक्षिणहस्तेन क्षुरमादत्ते तत्र मंत्रः शिवो नामेति
प्रजापतिर्ऋषिर्यजुश्छन्दः क्षुरो देवता क्षुरग्रहणे वि० ॐ शिवो नामासि स्वधितिस्ते पिता
नमस्ते अस्तु मा मा हिंसीः इति ततः सकुशतरुणेषु केशेषु क्षुरं प्रवपति निदधाति सं
लग्नीकरोतीत्यर्थः तत्र मंत्रः निवर्त्तयामीति प्रजापतिर्ऋषिर्यजुश्छन्दः क्षुरो देवता प्रवप
ने विनियोगः ॐ निवर्त्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सु
वीर्याय इति ततस्तान्केशान्क्षुरेणाच्छिनत्ति अनेन मन्त्रेण येनावपदिति त्वं वामनय ऋषिः
पंक्तिश्छन्दः सविता देवता केशच्छेदने वि० ॐ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य
विद्वान् तेन ब्रह्माणो वपतेदमस्यायुष्मञ्जरदष्टिर्यथासत् इति सकेशानि कुशतरुणानि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निप्रच्छिद्य उत्तरतो धृतमातो आनडुहे गोमयपिण्डे निक्षिपेत् तत्रविशेषः पितासके
शानि पिञ्जूलानि क्षिप्त्वा प्रागग्रांस्त्रिकुशान् हस्ते निदधाति सा प्रागग्रायानडुहे
गोमयपिण्डे निदधाति एवं पश्चिमगोदाने उन्दनं विनयनं कुशान्तर्धानं च पू
र्वोक्तैरेव मन्त्रैः कुर्यात् क्षुरस्तु मन्त्रेणागृहीत्वा न पुनः संस्कारमर्हति इत्याभेदात् मंत्र
प्रवपनं च पूर्वोक्तमन्त्रेण कुर्यात् छेदने मन्त्रविशेषः त्र्यायुषमिति नारायण ऋषि
रुष्णिक्छन्दोऽग्निर्देवता केशच्छेदने विनियोगः ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्या
युषम् यद्देवेषु त्र्यायुषम् तन्नो अस्तु त्र्यायुषम् इति छित्वा पूर्ववत् गोमयपिण्डे
निदध्यात् एवं पुनर्वारद्वयं उत्तरयोः पश्चिमगोदानयोः पश्चिमगोदानयोः उन्दनं वि
नयनं कुशान्तर्धानं क्षुरादानं प्रवपनं छेदनं गोमयप्राशनं च तूष्णीं कुर्यात् एवं
दक्षिणगोदाने उन्दनविनयन कुशान्तर्धान क्षुरादानप्रवपनानि कुर्यात् छेदने
तु मन्त्रविशेषः येनेति प्रजापतिर्ऋषिर्यजुश्छन्दः क्षुरो देवता केशच्छेदने विनि०
ॐ येन भूरिश्चरा दिवं ज्योक् च पश्चाद्धि सूर्यम् तेन ते वपामि ब्रह्मणा जीवातवे जी
वनाय सुश्लोक्याय स्वस्तये इति मन्त्रेण छित्वा गोमयप्राशनं पूर्ववत् एवं पुनर्वारद्व
यं उत्तरयोः दक्षिणगोदानयोः उन्दनं विनयनं कुशान्तर्धानं क्षुरादानं प्रवपनं छेदनं गो एमः
मयप्राशनं च तूष्णीं कुर्यात् अथ त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति शिरसः समन्तात् ६२

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दक्षिणं परिभ्रामयतीत्यर्थः सक्तुमंत्रेणादित्यूहितम् तत्रमंत्रः यत्क्षुरेणेतिवामदेवऋषिर्य
जुश्छन्दः क्षुरोदेवताक्षुरपरिहरणेवि० ॐ यत्क्षुरेणमज्जयिता सुपेशसा वप्तावावपति के
शान्छिन्धिशिरोमास्यायुः प्रमोषीः इति अथोनडुहेशमेराजतेनसर्वशिरश्चार्द्रीकृत्य मु
खवपनार्थं नापितायक्षुरंप्रदत्तंकृत्य क्षुरसंपरिवपति अक्षण्वमितिवामदेवऋषिरनु
ष्टुप्छन्दः क्षुरोदेवताक्षुरप्रदानेविनियोगः ॐ अक्षण्वमपरिवपइति परिवपामीतिनापितो
वदेत् अथयथाकुलाचारं शिखावर्ज्जंवपनंकृत्वा ततःसकेशंगोमयपिण्डं पत्न्याले
गोष्ठे उदकान्तेवानिधापयेत् ततःस्नातंपर्युक्षितशिरसं पुष्पमालाभिरलङ्कृतं
माणवकं आचार्यसमीपमानीय अग्नेः पश्चादवस्थापयेत् अथपितास्वाचार्या
यवरंददाति कुमारस्याचार्याभावात् अद्येहेत्यादिअमुकोहं एतन्नाम्नःपुत्रस्य
चूडाकर्माङ्गहोमकर्मणः चूडाकर्मणाच्यसाङ्गफलप्राप्तये साङ्गतार्थं च इदंस
वर्णंअग्निदैवतं आचार्याय तुभ्यमहंसम्प्रददे ॐतत्सत्ममेति संकल्प्यदद्यात्
इतिचूडाकर्मपद्धतिः अथउपनयनम् प्रथमंप्रायश्चित्तंकुर्यात् तत्रसंक
ल्पः अद्येहेत्यादिअमुकोहं स्वस्योपनेतव्यस्य योग्यतासिद्धये कृच्छ्रत्रयगोत्रयनिष्क्र
यीभूतंस्वर्णंतिलपात्रं ब्राह्मणायददे तथोपनेत्रापि प्रायश्चित्तसंकल्पं कु
र्यात् अद्येहेत्यादिअमुकोहं स्वस्योपनयनयोग्यतासिद्धये कृच्छ्रत्रयगोत्रयनिष्क्र

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बीभूतं सक्तुवर्णांतिलपात्रं ब्राह्मणायदास्ये ॐ तत्सन्नममेति दद्यात् अथाचार्य्यः पि
ता उपनयनवेदीसमीपमागत्य वेद्यां पञ्चभूसंस्कारपूर्वकं समुद्भवनामाग्निमावा
ह्य संस्थाप्य प्रधानसंकल्पं कुर्य्यात् अद्येहेत्यादि अमुकराशि रमुकशर्म्माहं
अमुकगोत्रस्य पुत्रस्य बीजगर्भसमुद्भवैनोनिबर्हणद्वारा ॐ तत्सत् श्रीपरमेश्व
रप्रीत्यर्थं वेदाध्ययनादिकर्म्माधिकारसम्पादकद्विजत्वसंसिद्धिकाम उपन
यनाख्यं कर्म्म करिष्ये तत्पूर्वांगत्वेन त्रीन्ब्राह्मणान्सहानेन वटुना भोजयिष्ये
इति संकल्प्य ब्राह्मणान्भोजयित्वा तैः सह कुमारं च भोजयेत् अथाचार्य्यो ब्र
ह्मोपवेशनादि स्रुवेणाज्ये दीर्घाकाराकृतीरित्यन्तं विधाय विष्टरोपकल्प
नीयवस्तून्यासादयेत् तानि च कौपीनम् मेखला यज्ञोपवीतम् अजिनम्
दण्डः समिधस्तिलाः भिक्षापात्रं चेति अथ पर्य्युप्तशिरसं कुमारं मङ्गलद्रव्यैः
स्नापयित्वा पुष्पमालादिभिश्चालङ्कृत्य वेदगीतवादित्रघोषपुरःसरं
प्रदक्षिणामग्निं परिक्रममाणं आचार्य्यसमीपमानयन्त्याचार्य्यः पुरुषाः
अथाचार्य्यो माणवकं स्वस्य दक्षिणतोऽग्नेः पश्चात् उदङ्मुखं उपवेश्य
ॐ ब्रह्मचर्य्यमागाः इति ब्रूयात् ॐ ब्रह्मचर्य्यमागाम् इति माणवको वदेत् पुन रामः

६३

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रचार्य्यः ब्रह्मचार्य्यसीति पृच्छति माणवकोपि ब्रह्मचार्य्यस्मानीति ब्रूयात् अथाचार्य्यो
माणवकं कौपीनं वासः परिधापयति मन्त्रेण येनेन्द्रायेत्यङ्गिरा ऋषिर्बृहती छन्दो बृहस्पति
र्देवता वासः परिधाने विनियोगः ॐ येनेन्द्राय बृहस्पतिर्वासः पर्य्यदधादमृतम् तेन त्वा परिदधा
म्यायुषे दीर्घायुत्वाय बलाय वर्चसे इत्याचार्य्यस्यैव मन्त्रपाठः परिदधामीति मन्त्रलिङ्गात्
अत्राद्विराचमनम् शूद्रेणाहिममक्ता वघावेद्वदेन योजितः उपनेयो माणवको द्विरपः प्राश
नं ततः तदप्यमन्त्रकम् अथ मेखलां बध्नाति अनेन मन्त्रेण इयं दुरुक्तमिति वामदेव ऋ
षिर्गायत्री छन्दो मेखला देवता मेखलाबन्धने विनियोगः ॐ इयं दुरुक्तं परिबाधमाना वर्णं
पवित्रं पुनती म आगात् प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेय
म् इति मन्त्रं पठतो माणवकस्य कटिप्रदेशे मेखलां त्रिगुणं कृत्वा प्रवरसङ्ख्याग्रन्थीन्क
रोति माणवकस्यैव मन्त्रपाठः म आगादिति मन्त्रलिङ्गात् तत्र मेखला च मौञ्जी
त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला धनुर्ज्या राजन्यस्य मौर्वी वैश्यस्येति
क्रमेण सूत्रोक्ता ग्राह्या अत्रावसरे प्रणवपूर्वया गायत्र्या शिखाबन्धनं कुर्य्यात्
तदप्यत्र यज्ञोपवीतदानधारणे सूत्रकारेणानापात्ते तथापि विभूषाहारकौपीनो
पवीताजिनमेखला इति व्यासवचनात्तिकार्य्ये अवसरस्तु प्योचित्यान्मेखलाबन्ध
नानन्तरं एकं यज्ञोपवीतं धारयेत् अथ प्रकृतत्वात् यज्ञोपवीतविधानम् कलश्रु-

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

परिस्थापयेत् ॐ भूर्भुवः स्वरोम् इति संस्थाप्य ॐ यज्ञोपवीतं प्रतिष्ठापयामीति वेदत्स
तन्तइति प्रतिष्ठाप्य ॐ कारदेवत्याय प्रथमतंतवे नमः ॐ अग्निदेवत्याय द्वितीयतंतवे
नमः ॐ भगदेवत्याय तृतीयतंतवे नमः ॐ सोमदेवत्याय चतुर्थतंतवे नमः ॐ पितृदेव
त्याय पंचमतंतवे नमः ॐ प्रजापतिदेवत्याय षष्ठतंतवे नमः ॐ वायुदेवत्याय सप्तमतंत
वे नमः ॐ सूर्यदेवत्यायाष्टमतंतवे नमः ॐ सर्वदेवत्याय नवमतंतवे नमः इति तन्तुदेवताः
सम्पूज्य ग्रन्थित्रयाधिपान् हरिब्रह्मेश्वरान्सम्पूज्य ॐ हरये नमः ॐ ब्रह्मणे नमः ॐ
ईश्वराय नमः ॐ यज्ञोपवीतकारस्याधिपाय परब्रह्मणे नमः इति च सम्पूज्य तदादा
य ॐ आकृष्णेनेति मन्त्रेण आदित्याय प्रदर्शयेत् पुनः कलशोपरि संस्थाप्य अक्षो
दशातकृत्वः प्रणवं सकृद्गायत्रीं च जपन्स्पृशेत् ततः प्राणानायम्य त्र्यम्बकमन्त्रं ज
पन्दक्षिणहस्तेन स्पृशेत् ततो दशकृत्वः सावित्र्याभिमंत्रिताभिरद्भिः सिञ्चेत् एवं
संस्कृतं यज्ञोपवीतं धारयेत् अनेन मन्त्रेण यज्ञोपवीतमिति परमेष्ठी ऋषिः त्रिष्टु
प्छन्दः लिंगोक्ता देवता श्रौतस्मार्त कर्मानुष्ठानसिद्ध्यै यज्ञोपवीत परिधाने विनियोगः
ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रतिमुञ्च शु
भ्रं यज्ञोपवीतं बलमस्तु तेजः ॐ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्या
मि एवं मन्त्रं पठतो माणवकस्य दक्षिणबाहुमुद्धृत्य वामांसोपरि निदध्यात् ततः प्रद

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्षिणमग्निंपरीत्य माणवकोऽग्नेः पश्चात्स्थित्वा आचमनं कृत्वा स्ववर्णोक्तंकैणेयमादिचर्म्मः
यज्ञोपवीतवत्परिदध्यात् मन्त्रः मित्रस्यचक्षुरिति वामदेवऋषिस्त्रिष्टुप्छन्दः अजिनंदेवता
अजिनधारणेविनियोगः ॐ मित्रस्यचक्षुर्द्धरुणंबलीयस्तेजोयशस्वी स्थविरंसमिद्धम्
अनाहनस्यंवसनंजरिष्णु परीदंवाज्यजिनंदधेहम् इतिमन्त्रेण ऐणेयंब्राह्मणः रौरवंक्षत्रि
यः मेषमजंवावैश्यः परिदध्यात् अथाचार्यःपादादिकेशप्रमाणं स्ववर्णोक्तंपालाशंबैल्वमौदु
म्बरजातं दण्डंतत्तद्वर्णाय माणवकायप्रयच्छति सचमन्त्रेणादत्ते योमेदण्डइतिप्रजापतिऋ
षि र्यजुश्छन्दो दण्डोदेवता दण्डग्रहणेविनियोगः ॐ योमेदण्डः परापतद्वैहायसोऽधिभू
म्याम् तमहंपुनरादद आयुषे ब्रह्मणेब्रह्मवर्चसाय इतिप्रतिगृह्य मन्त्रेणोच्छ्रयति-
उच्छ्रयस्वेति प्रजापतिर्ऋषिर्यजुश्छन्दो दण्डोदेवता दण्डोच्छ्रयणेविनियोगः ॐ उच्छ्र
यस्व वनस्पतऊर्ध्वोमापाह्यंहसः आस्ययज्ञस्योदृचः अथाचार्योऽद्भिःस्वमञ्जलि
मापूर्य तेनमाणवकाञ्जलिमापूरयति मन्त्रैः आपोहिष्ठेत्यादितिसृणांसिन्धुद्वीपऋ
षिर्गायत्रीछन्दो आपोदेवताः माणवकाञ्जलिपूरणेवि० ॐ आपोहिष्ठामयोभुवस्तान
ऊर्जेदधातनः महेरणायचक्षसे १ ॐ योवःशिवतमोरसस्तस्यभाजयतेहनःउशती
रिवमातरः २ ॐ तस्माअरङ्गमामवोयस्यक्षयायजिन्वथ आपोजनयथाचनः ३
अथाचार्योमाणवकं प्रतीक्ष्यसूर्यमुदीक्षस्वेतिप्रैषंददाति माणवकःसूर्यमुदीक्ष

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्नञ्जलिस्थं जलं सूर्य्यायप्रक्षिप्योर्द्ध्वबाहुः आदित्यमुपतिष्ठते अनेनमन्त्रेण तच्चक्षुरिति
दध्यङ्ङाथर्वणऋषिः त्रिष्टुप्छन्दः सूर्य्योदेवता सूर्य्योपस्थाने विनियोगः ॐ तच्चक्षुर्द्देवहि
तम्पुरस्ताच्छुक्रमुच्चरत् पश्येमशरदः शतञ्जीवेमशरदः शतं शृणुयामशरदः शतम्प्रब्रवा
मशरदः शतमदीनाः स्यामशरदः शतम्भूयश्चशरदः शतात् अथाचार्य्योमाणवकस्य
दक्षिणांसोपरिस्वदक्षिणहस्तंनीत्वा हृदयमालभेत अनेनमन्त्रेण ममव्रतेतइति प्रजा
पतिऋषिस्त्रिष्टुप्छन्दो बृहस्पतिर्द्देवता हृदयालम्भने वि० ॐ ममव्रतेते हृदयन्दधामि
ममचित्तमनुचित्तं तेस्तु ममवाचमेकमनाजुषस्व बृहस्पतिस्त्वानियुनक्तुमह्यम् इति अथा
चार्य्योमाणवकस्य निरङ्कुशं दक्षिणहस्तं गृहीत्वा कोनामासीत्याह वटुः अमुक
शर्म्माहंभोः इतिप्रत्याह पुनराचार्य्यो माणवकंपृच्छति कस्यब्रह्मचार्य्यसि भवतः
इतिमाणवकवदेत् भवतइत्युच्यमाने ॐ इन्द्रस्यब्रह्मचार्य्यस्यग्निराचार्य्यस्तवाह
माचार्य्यस्तव अमुकशर्म्मन् इतिवटुनामादेशान्तेमुक्त्वा अथैनंभूतेभ्यः परिददाति
तत्रमंत्रः ॐ प्रजापतयेत्वापरिददामि देवायत्वासवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः
परिददाम्यरिष्ट्यै इति अथकुमारोग्निंप्रदक्षिणंपरीत्य आचार्य्यस्योत्तरतउपवि
शति अथाचार्य्यो ब्रह्मोपवेशनादि पर्य्युक्षणान्तंकर्म्मकृत्वा समुद्भवनामाग्निंसं
स्थाप्य एतन्त इतिप्रतिमृश्य ॐ भूर्भुवःस्वः समुद्भवनामाग्ने [illegible] प्रतिष्ठितोभवतेद रामः ६५

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाग्निरितिध्यानावहनादिनी राजनानंसम्पूज्य देवताभिध्यानंकरोति अथेहामुकोहं
अमुकस्य वटो रुपनयन कर्म्मण्यायक्ष्ये तत्र प्रजापतिमिन्द्रमग्निं सोममग्निंवायुं सूर्य्यम
ग्नी वरुणावग्नि वरुणावग्निं वरुणंसवितारं विष्णुं विश्वान्मरुतः सर्वकान्वरुणामदितिं
प्रजापतिं स्विष्टकृतं चाज्येनाहंयक्ष्ये एतत्कर्मद्रव्यं तत्तद्देवताभ्यो मयापरित्यक्तं ॐ
तत्सद्यथादैवतमस्तु इत्याघाराज्यभागौहुत्वा भूरादिनवाहुतिहोमे स्विष्टकृतं च
हुत्वा संस्रवप्राशनम् प्रणीताविमोकः ब्रह्मणे पूर्णपात्रदानम् अथेहामुकोहं अमु
करशर्म्मः पुत्रस्य उपनयनाङ्गहोमकर्म्मणः साङ्गतार्थं अपूर्णपूर्णार्थंच इदंपूर्णपा
त्रंसदक्षिणं ब्रह्मणे तुभ्यंसम्प्रददे इतिदद्यात् अथाचार्य्योवटुं संज्ञाप्ति शिक्षयति
त्वर्थः यथा ब्रह्मचार्यसि इत्याचार्य्योवदेत् आसानिइतिवटुः कर्म्मकुरु कर्त्वा
णि· मादिवासुषुप्थाः· नस्वपामि वाचंयच्छ यच्छानि· समिधमादेहि· आदधानि
इति अथैदैवज्ञाविधिर्नदीक्षालग्ने लग्नदानं कुर्य्यात् अथेहामुकोहं अमुकशर्मः
अस्यपुत्रस्य सावित्री ग्रहणलग्नात् अमुकस्थानस्थितेन अमुकग्रहेण सूचितारि
ष्टनिवृत्तिद्वारा शुभफलप्राप्त्ये ग्रहाणांप्रीतये इदं सुवर्णं सप्रणनिष्क्रयीभूतं द्रव्यं
वा दैवज्ञाय ब्राह्मणायसम्प्रददे ॐ तत्सत् न मम इति अथास्मै सावित्रीमन्त्रो होतर
तोग्नेः प्रत्यङ्मुखोपविष्टाय सप्रसन्नाय गुरुं समीक्षमाणाय गुरुणां समिद्धिना

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

य दक्षिणतस्तिष्ठत आसीनायवा स्वयंपूर्वाभिमुखो गुरुः अथबटुः फलपुष्पादिभिर्गुरोः पा
दावुपसंगृह्णीयात् गीतवादित्रे वाद्यमाने व्यस्तहस्ताभ्यां दक्षिणहस्तेन दक्षिणंपादं वाम
हस्तेन वामंपादं गृहीत्वा अमुकगोत्रो अमुकप्रवरो अमुकवेदान्तर्गता मुकशाखाध्यायी अ
मुकशर्म्माहं भोगुरो त्वामभिवादये इत्येतदुपसङ्गृह्णतो नामगुरुरस्य आयुष्मान्भव सौम्यामुक
शर्मन्भो इत्याशिषंप्रयुञ्जीत ततः सावित्रीदानम् गायत्र्याविश्वामित्रऋषि गायत्रीछं
दः सवितादेवता सावित्रीदानेविनियोगः इत्यार्षादिकंस्मृत्वा प्रणवव्याहृतिपूर्वां गाय
त्रीं पच्छोब्रूयात् तद्यथा ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्यं इतिप्रथमंवारं ॐ भूर्भुवःस्वः त
त्सवितुर्वरेण्यं भर्गोदेवस्यधीमहि इतिद्वितीयंवारं ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्य
म्भर्गोदेवस्य धीमहिधियोयोनः प्रचोदयात् ॐ इतितृतीयंवारं सर्वांगायत्रीं प्रतिब्रूया
त् इतिब्रह्मगायत्री क्षत्रियायतुत्रिष्टुप्छन्दस्कां बृहस्पतिदृष्टां सवितृदैवत्यां दे
वस्यसवितुरित्यादिकामृचंब्रूयात् ॐ देवस्यसवितुर्मतिमासवंविश्वदेव्यम् धि
याभगम्मनामहे इतिक्षत्रियगायत्री वैश्यायजगतीछन्दस्कां विश्वारूपाणीति ऋ
चंब्रूयात् ॐ विश्वारूपाणि प्रतिमुञ्चते कविः प्रासावीद्भद्रं द्विपदेचतुष्पदे विनाक
मख्यत्सवितावरेण्यो नुप्रयाणमुषसो विराजति इतिवैश्यगायत्री ततोब्रह्मचा
री स्वाचार्यायवरंदद्यात् अथेह अमुकराशि अमुकशर्म्मा अमुकवर्म्मा अमुकगुप्ता

रामः
६६

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाऽहं कृतेतद्वामनीयग्रहणकर्मणः साङ्गुण्यार्थं इदं स्वर्णं मग्निदैवतं वररूपेणाचार्याय तु
भ्यमहं संप्रददे इति संकल्प्य गुरोः पादयोः प्रणिपत्य समर्पयेत् गुरुराशीर्भिरभिनंद्य ततो
ब्रह्मचारी कालोपस्थितां मध्याह्नसंध्यामुपास्य समिदाधानं कुर्यात् तत्रोपकल्पनीयानि
वस्तून्यासादयेत् इन्धनं पञ्चधा त्रिधा वा विभक्तम् पर्युक्षणार्थमुदकम् समिधस्तिस्रः
होमार्थं पुनरिन्धनवारिणी ततो ब्रह्मचारी अग्नेः पश्चादुपविश्य प्रथमतोऽग्निं पञ्चभिर्म
न्त्रैः सन्धुक्षयति पाणिनाग्निं परिसमूहयति सम्मृष्टीकरोतीत्यर्थः पाणिनेति स्रुवादेर्नि
रासः अग्ने सुश्रव इत्यादीनां पञ्चानां ब्रह्मा ऋषिर्गायत्री छन्दः अग्निर्देवता परिसमू
हने वि० ॐ अग्ने सुश्रवः सुश्रवसं मा कुरु १ ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि २ ॐ
एवं मा सुश्रवः सौश्रवसं कुरु ३ ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि ४ एव
महं मनुष्याणां वेदस्य निधिपा भूयासं स्वाहा इत्यग्निं परिसमूह्य ततः उपकल्पितो
दकेन प्रदक्षिणमग्निं पर्युक्ष्योत्थाय अग्नये इति मन्त्रेण समिधमादधाति अग्नय इति प्र
जापतिर्ऋषिः शक्वरी छन्दः समिद्देवता समिदाधाने वि० ॐ अग्नये समिधमाहार्षं बृह
ते जातवेदसे यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया
पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यश
स्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहा इत्येकां समिधमादाय घृताक्तां कृत्वा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दक्षिणाकरांसमृज्याजुहुयात् एवं द्वितीयां तृतीयां च समिधं होमयित्वा ततः तूष्णीमुपवि
श्य पूर्ववत् अग्ने नक्षत्रवद् इत्यादि पञ्चभिर्मन्त्रैः परिसमूहनं उपकल्पिताभिरद्भिः प्रदक्षि
णं पर्युक्षणं च विधाय तूष्णीं पाणी प्रतप्य मुखं विमृज्य यथा तनूपा ऽअग्ने इत्यादीनां
बृहद्देवा ऋषयो यजुश्छन्दोऽग्निर्देवता मुखमार्जने विनियोगः ॐ तनूपा ऽअग्नेसि तन्वं
मे पाहि ॐ आयुर्दा ऽअग्ने स्यायुर्मे देहि ॐ वर्चोदा ऽअग्नेसि वर्चो मे देहि ॐ अग्ने य
न्मे तन्वा ऽऊनं तन्म ऽआपृण ॐ मेधां मे देवः सविता ऽआदधातु ॐ मेधां देवी सरस्वती
आदधातु ॐ मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ इति सप्तभिर्मन्त्रैः प्रतिमन्त्रं
ललाटाच्चिबुकपर्यन्तं मुखं प्रोञ्छति ततः अङ्गानि च म ऽआप्यायन्तां इति वाहु
भ्यां सर्वाङ्गमालभेत शिरस आपादम् वाक्च म ऽआप्यायताम् इति मुखे प्राणश्चम
ऽआप्यायताम् इति नासिकायाम् ॐ चक्षुश्च म ऽआप्यायताम् इति नेत्रयोः श्रो
त्रं च म ऽआप्यायताम् इति श्रोत्रयोः यशो बलं च म ऽआप्यायताम् इति बाह्वोः च
ङ्गालम्भननिमित्तकउदकस्पर्शः ततो ऽनामिकया अग्नेः भस्म गृहीत्वा त्र्यायुषं कु
रुते त्र्यायुषमिति नारायण ऋषिः उष्णिक्छन्दोऽग्निर्देवता त्र्यायुषकरणे विनियोगः
ॐ त्र्यायुषं जमदग्नेः इति ललाटे कश्यपस्य त्र्यायुषम् इति ग्रीवायाम् यद्देवेषु
त्र्यायुषम् इति दक्षिणांसे तन्नो अस्तु त्र्यायुषम् इति हृदि अथ गन्धमिवाक्षतम्

रामः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अमुकगोत्रो अमुकप्रवरो यजुर्वेदान्तर्गता मुकशाखाध्यायी अमुकशर्म्माहं भो अग्ने त्वां
अभिवादये ततो व्यस्तपाणिभ्यां गुरोः पादावुपसंगृह्णीयात् यथा दक्षिणेन पाणिना द
क्षिणं पादं वामेन वामं पादं गृहीत्वा अमुकगोत्रो अमुकप्रवरो यजुर्वेदान्तर्गता मुकशा-
खाध्यायी अमुकशर्म्माहं भो गुरो त्वामभिवादये इति वाक्यमुक्त्वा शिरसाभिवादयेत्
अभिवादितो गुरुस्तु आयुष्मान्भव सौम्य अमुकशर्म्मन् इत्याशिषं दद्यात् इति गुरुवंद
नं विधाय अन्यानप्यभिवादयेत् केचित्तु अभिवादनात्पूर्वं सन्ध्योपासनमामनन्ति
तत्र ब्रह्मचारी सन्ध्यामुपास्याग्निकार्यं गुरूपसङ्ग्रहणं देवेभ्यो नमस्कारं च कृत्वा
भिक्षार्थं गच्छेत् तदुक्तं याज्ञवल्क्येन गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः
आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत् आदिमध्यावसानेषु भवच्छब्दोपलक्षि
ता ब्राह्मणक्षत्रियविशां भैक्षचर्य्या यथाक्रमम् इति सूत्रं च भवत्पूर्वं ब्राह्मणो भि
क्षेत भवन्मध्यं तु राजन्यो भवदन्त्यां विशः तिस्रोऽप्रत्याख्यायिन्यः षड्द्वादशाप
रिमिता वा मातरं प्रथमाम् इति तत्र क्रमः भिक्षापात्रं स्कन्धेऽवलम्ब्य भवति भिक्षां
देहि मातः इति ब्राह्मणो याचेत भिक्षां भवति देहि मातः इति राजन्यस्य देहि भिक्षां
भवति मातः इति वैश्यस्य ब्राह्मणदत्तां भिक्षां ॐ स्वस्ति इत्युक्त्वा प्रतिगृह्य आचार्याय

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यनिवेदयेत् भो गुरो इमां भिक्षां मया लब्धा इति निवेद्य आत्मभोजनार्थं स्वीकुर्य्यात् इति
भिक्षाचरणम् गायत्र्यष्टशतंच जपित्वा सन्ध्यां विदध्यात् लोपे त्वष्टोत्तरं जपेत् इति ततो हे
मदक्षिणा अद्येहामुकोऽहं अमुकगोत्रपुत्रस्योपनयनाङ्ग होमकर्म्मणः साङ्गतार्थं
इदं स्वर्णं वररूपेण आचार्य्याय तुभ्यं सम्प्रददे ॐ तत्सत् इति दत्वा आशिषं प्रतिगृह्णी
यात् इत्युपनयनम् अथ वेदारम्भप्रयोगः आचार्य्यो वेदारम्भे वेदीसमीपमागत्योप
विश्याचम्य गणेशं नमस्कृत्य पञ्चभूसंस्कारपूर्वकमग्निस्थापनं विधाय अर्घ्यं
संस्थाप्य ब्रह्मोपवेशनादि पर्युक्षणान्तं कर्म्म कृत्वा संकल्पं कुर्य्यात् अद्येहाद्या
दि अमुकगोत्रस्य वटोः यजुर्वेदादिक्रमेण वेदारम्भं करिष्ये इति प्रतिज्ञाय स्रुवेण
मध्ये दीर्घाकारां कुतीरित्यनां विधाय अग्निं प्रति आप्य एतन्नः इत्यादि ॐ भूर्भु
वः स्वः हरिनामाग्ने सुप्रतिष्ठितो वरदो भव तेदथाग्निरिति मन्त्रेण ध्यानादिनीरा
जनान्तं सम्पूज्य दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धो मनसा प्रजापतिं ध्यात्वा द्रव्य
त्यागसंकल्पः अद्येह अमुकवटोः वेदारम्भकर्म्मणि अहं यक्ष्ये तत्र प्रजापतिमिन्द्रम
ग्निं सोममन्तरिक्षं वायुं ब्रह्माणं छन्दांसि प्रजापतिं देवान् ऋषीन् श्रद्धां मेधां
सदसस्पतिमनुमतिमग्निं वायुं सूर्यं अग्निवरुणावग्निं वरुणावग्निं वरुणं सवि
तारं विष्णुं विश्वान् मरुतः स्वर्कान् वरुणमादित्यं प्रजापतिं स्विष्टकृतं याक्ष्येनाहं यमः

६८

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यसे आघारावाज्यभागौकृत्वा ॐ प्रजापतयेस्वाहा इदंप्रजापतये ॐ इन्द्रायस्वाहा इदमिन्द्राय
ॐ अग्नयेस्वाहा इदमग्नये ॐ सोमायस्वाहा इदंसोमाय अथयजुर्वेदाहुतयः ॐ अन्तरि
क्षायस्वाहा इदमन्तरिक्षाय ॐ वायवेस्वाहा इदंवायवे ॐ ब्रह्मणेस्वाहा इदंब्रह्मणे ॐ
छन्दोभ्यःस्वाहा इदंछन्दोभ्यः ॐ प्रजापतयेस्वाहा इदंप्र॰ ॐ देवेभ्यस्वाहा इदंदेवेभ्यः ॐ
ऋषिभ्यःस्वाहा इदंऋषिभ्यः ॐ श्रद्धायैस्वाहा इदं॰ ॐ मेधायैस्वाहा इदंमे॰ ॐ सद
सस्पतयेस्वाहा इदंस॰ ॐ अनुमतयेस्वाहा इदमनुमतये अथऋग्वेदाहुतयः ॐ पृथि
व्यैस्वाहा इदंपृथिव्यै ॐ अग्नयेस्वाहा इदमग्नये इतिद्वे आहुती ब्रह्मणेछन्दोभ्य इ
त्यादयोनवाहुतयः पूर्ववत् अथसामवेदाहुतयः ॐ दिवेस्वाहा इदंदिवे ॐ सूर्याय
स्वाहा इदंसूर्याय इतिद्वे ब्रह्मणेछन्दोभ्य इत्यादयोनवपूर्ववत् अथाथर्ववेदाहु
तयः ॐ दिग्भ्यःस्वाहा इदंदिग्भ्यः ॐ चन्द्रमसेस्वाहा इदंचन्द्रमसे इतिद्वे ब्रह्मणे
छन्दोभ्य इत्यादयोनवपूर्ववत् ततोभूरादिनवाहुतिहोमं स्विष्टकृतंचकृत्वा संस्रव
प्राशनम् पवित्रप्रतिपत्तिः प्रणीताविमोकः ब्रह्मणेपूर्णपात्रदानसंकल्पः अद्ये
हामुकोहं अमुकशर्म्मणस्य पुत्रस्य वेदारम्भाङ्गहोमकर्म्मणः साङ्गफलप्राप्तये अ
मुकब्राह्मणाय इदंपूर्णपात्रंसदक्षिणं ब्रह्मन्तुभ्यंसम्प्रददे इतिदद्यात् ब्रह्माचअ
त्रकर्म्मेति मन्त्राशिषंदद्यात् अथवेदारम्भक्रमः यथा अद्येहामुकोहं अमुकशर्म

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मेरणेः वेदारम्भकर्म्मणः पूर्वाङ्गत्वेन गणेशादीनां स्थापनं आवाहनं पूजनं करिष्ये ताम्र
स्थाल्यादौ स्वक्षतान् गृहीत्वा उत्तरपूर्वस्थापयेत् ॐ भूर्भुवः स्वः गणेश इहागच्छ इह
तिष्ठ पूजार्थं त्वामावाहयामि ॐ भूर्भुवः स्वः विष्णो ॐ भूर्भुवः स्वः सरस्वति ॐ भूर्भुवः
स्वः लक्ष्मि ॐ भूर्भुवः स्वः स्वविद्यासूत्रकार कात्यायन एतन्नइति प्रतिष्ठाप्य नाम
मन्त्रेण ध्यानादिनीराजनान्तं सम्पूज्य ततो ब्रह्मचारिणो वेदमध्यापयेत् यथा अग्ने
रुत्तरतो ब्रह्मचारिणमुदङ्मुखं प्राङ्मुखं वा प्रागग्रेषु कुशेषूपवेश्य स्मार्ताचमनं
प्राणायामं ५ ब्रह्माञ्जलिं कारयित्वा महाव्याहृतिपूर्वं ॐकारपूर्वं त्रिवारं गायत्रीं
पठित्वा सावेदारम्भं कुर्य्यात् तत्र यजुर्वेदारम्भे विनियोगः ॐ इषेत्वादि खम्ब्रह्मान्तस्य
माध्यन्दिनीयकस्य वाजसनेयकस्य विवस्वान् ऋषिः गायत्र्यादीनि सर्वाणि छन्दां
सि सर्वाणि यजूंषि सामानि प्रतिलिङ्गोक्ता देवता यजुर्वेदारम्भे विनियोगः ॐ भीः
ॐ भूर्भुवः स्वः ॐ इषेत्वोर्ज्जे त्वा वायवः स्थ देवो वः सविता प्रार्प्पयतु श्रेष्ठतमाय
कर्म्मण ऽ आप्यायध्वमघ्न्या ऽ इन्द्राय भागम् प्रजापतीरनमीवा ऽ अयक्ष्मा मावस्तेन
ऽ ईशत माघशꣳसो ध्रुवा ऽ अस्मिन्गोपतौ स्यात बह्वीर्य्यजमानस्य पशून्पाहि ॐ व
सोः पवित्रम् इतिस्व ध्रु त्यारम्भं कारयित्वा अध्यायादीन्प्रतिब्रूयात् ॐ कृष्णोसि २
समिधाग्निम् ३ एदम् ४ अग्नेस्तनूः ५ देवस्यत्वा ६ वाचस्पतये ७ अयमाम्य रामः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हीतोसि ८ देवसवितः ९ अपोदेवाः १० युञ्जानः प्रथमम् ११ इमानोऽ क्रमः १२ मसिष्ट्वमि १३ धूपक्षितिर्धुवयोनिः १४ अग्निर्जाताम् १५ नमस्ते १६ अस्मन्मूर्ज्जम् १७ वाजस्य १८ स्वाही त्वा १९ ऋतस्ययोनिः २० इमम्मे २१ तेजोसि २२ हिरण्यगर्भः सम् २३ अप्यस्तूपरः २४ शादन्दद्भिः २५ अग्निश्च २६ समास्त्वा २७ होतायक्षत् २८ समिद्धो अञ्जन् २९ देवसवितः ३० सहस्रशीर्षापुरुषः ३१ तेदव ३२ अस्याजरासः ३३ यज्जाग्रतः ३४ अपेतः ३५ त्सस्य विश्वोर्वाम्भगाम् ३५ ऋचंवाच ३६ देवस्यत्वा ३७ देवस्यत्वा ३८ स्वाहाप्राणेभ्यः ३९ ॐ ईशावास्यमिदं ४० सर्वंयत्किञ्च जगत्यां जगत् तेनत्यक्तेनभुञ्जीथामा गृधः कस्यस्विद्धनम् ४० ॐ हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् योसावादित्ये पुरुषः सोसावहम् इति यजुर्वेदारम्भः अथ ऋग्वेदादिमन्त्रस्य मधुच्छन्दऋषिर्गायत्री छन्दो ग्निर्देवता स्वाध्याये विनियोगः ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् होतारं रत्नधातमम् इति ऋग्वेदारम्भः अथ सामवेदादिमन्त्रस्य गोतमऋषिर्गायत्री छन्दो ग्निर्देवता स्वाध्याये विनियोगः ॐ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि इति सामवेदारम्भः शन्नोदेवीरिति दध्यङ्ङाथर्वण ऋषिर्गायत्री छन्दो ग्निर्देवता स्वाध्याये विनियोगः ॐ शन्नोदेवीरभिष्टय आपो भवन्तु पीतये शंय्योरभिस्रवन्तु नः इत्यथर्ववेदारम्भः पुनः पूर्ववत् महाव्याहृतिप्राणायामु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

र्विको गायत्रीं त्रिरुक्त्वा ॐ विरमोस्त्विति वदन्गुरुः शिष्यः पादोपसङ्ग्रहणपूर्वकं प्रणम्य
विरमेत् अथ नित्यानिराकरणमन्त्रान्पठेत् अथातोधीत्याधीत्या निराकरणम् प्रतीक
म्मे विचक्षणं जिह्वा मे मधुमद्वचः कर्णाभ्यां भूरि श्रुवे मा त्वा हार्षीच्छ्रुतम्मयि ॐ
ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोसि सनिरसि शान्तिरस्यनि
मृस्य निराकरणमसि ब्रह्मकोशम्मे विश वाचा त्वापिदधामि तिष्ठ प्रतिस्वकरणे स्वरूपो
ऽप करोदेवो रस्य ग्रहधारणे धारणशक्तिर्मयि भवत्वा प्यायन्तु मेङ्गानि वाक्प्रा
णश्चक्षुः श्रोत्रं यशोबलं यन्मे श्रुतमधीतन्तन्मे मनसि तिष्ठतु तिष्ठतु ॐ भूः इति त्रया
चारात् अस्मिन्नवसरे बटुं पाठाय वाराणसीं प्रति प्रस्थापयन्ति वेदानांग्रहणे स्वत्रम्
अष्टचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत् द्वादशाहादशाब्दं वा प्रतिवेदं यावद्ग्रहणं
वेति अध्ययननियमाः आचार्येणाहूतोऽधीयीत शयानं चेदासीनः आसीनं चेत्ति
ष्ठन् तिष्ठन्तं चेदभिधावन् अभिधावन्तं चेदभिक्रामन् गुरुमेवं वर्त्तमानो ब्रह्मचारी
ब्रह्मभूयाय कल्पते इति अथ दक्षिणासंकल्पः अद्येहामुकोहं अमुकशर्म्मणाव
टोः वेदारम्भहोमकर्म्मणः वेदारम्भकर्म्मणश्च साङ्गतासिद्ध्यर्थं साद्गुण्यार्थं च
दुदक्षिणामग्निदैवतं वररूपेणाचार्याय तुभ्यं सम्प्रददे इति दद्यात् आचार्यो
प्याशिषं दद्यात् इति वेदारम्भविधिः अथ समावर्त्तनविधिः अथ स्नातको वररूपेण रामः ७०

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गवादिकमाचार्य्यायदद्यात् तत्रसंकल्पः अद्येहामुकोऽहं स्नातकत्वाधिकारसिद्धये इ
मांगांगोप्रत्याम्नायीभूतंसुवर्णंवा आचार्य्यायतुभ्यमहंसम्प्रददे इतिगुरवेवरंदत्वा भो
गुरो अहंस्नास्ये इतिसम्प्रार्थ्य स्नाहीतिलब्धानुज्ञः स्नायात् अत्रस्नानादौ ब्रह्म
चार्य्येवाधिकारी स्नायादितिकर्त्तरि प्रत्ययविधानात् अथाचार्य्यःसमावर्त्तनवे
दीसमीपमागत्य उपविश्य तत्रपञ्चभूसंस्कारपूर्वक मग्निंसंस्थाप्य प्रतिज्ञासं
कल्पं कुर्य्यात् अद्येह अमुकोऽहं अमुकस्यशर्म्मणःस्नातकत्वसिद्धये समाव
र्त्तनकर्म्मकरिष्ये इतिसंकल्प्य ब्रह्मोपवेशनादि पात्रासादनान्ते विशेषोपकल्प
नीयानि वस्तून्यासादयेत् तानिच अग्निकार्य्ये इन्धनंपञ्चधाविभक्तम् पर्य्यु
क्षणार्थमुदकम् समिधस्तिस्रः पुनरिन्धनवारिणी हरिताःकुशाः स्नानाधिकरण
भूताः सर्वौषधिमिश्रित तीर्थवारिपूर्णा अष्टौकुम्भाउदकसंस्थाः स्नुव्यौपस्था
नार्थंपयस्सम् भोजनार्थंदधितिलाः सौराष्ट्रंगोपित्त स्नानार्थंवारि औदुम्बरं दन्त
धावनम् उत्सादनीयमुत्सनमुदकम् चन्दनम् अहतेवाससी पुष्पमालाद्वौशिरोवेष्ट
नम् कञ्चुकादीनि परिधानवस्त्राणि कर्णवेष्टन हस्तभूषणा मुद्रिकादीनिभूष
णानि अञ्जनम् दर्प्पणम् नूतनम् छत्रम् उपानहौ वैणवोदण्डः सहस्रधाराव
ति ततःपवित्रच्छेदनादि पर्य्युक्षणान्तं कर्म्मकृत्वा राजपुत्रनामाग्निंस्थापयेत्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स.क.प

स्तन्न इत्यादि ॐ भूर्भुवः स्वः राजपुत्र नामाग्ने सुप्रतिष्ठितो वरदो भव नेदं वाग्निरित्यादिभि
र्ध्यानावाहनपाद्यादिभी राजनामानं सम्पूज्य दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धो मन
सा प्रजापतिं ध्यात्वा आघारावाज्यभागौ हुत्वा वेदारम्भवत्प्रधानाहुतिर्जुहुयात् द्रव्य
त्यागं कुर्यात् अथेह अस्य वटोः समावर्त्तन कर्म्मणि याहं यक्ष्ये तत्र प्रजापतिमिन्द्रम
ग्निं सोमं अन्तरिक्षं वायुं ब्रह्माणं छन्दांसि प्रजापतिं देवान् ऋषीन् श्रद्धां मेधां
सदसस्पतिमनुमतिं पृथिवीमग्निं दिवं सूर्य्यं दिशश्चन्द्रमसं अग्निं वायुं सूर्य्यं अग्नि
वरुणावग्नि वरुणावग्निं वरुणं सूर्य्यं सवितारं विष्णुं विश्वान्मरुतः स्वर्क्कान्वरुण
मदितिं प्रजापतिं स्विष्टकृतं चाज्येनाहं यक्ष्ये इदमाज्यं तत्तद्देवताभ्यो मयापरि
त्यक्तं यथादैवतमस्तु ॐ प्रजापतये स्वाहा इदं प्रजापतये ॐ इन्द्राय स्वाहा इदमि
ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय अथ यजुर्वेदाहुत
यः ॐ अन्तरिक्षाय स्वाहा इदमन्तरिक्षाय ॐ वायवे स्वाहा इदं वायवे ॐ ब्रह्म
णे स्वाहा इदं ब्रह्मणे ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यः ॐ प्रजापतये स्वाहा-
इदं प्रजापतये ॐ देवेभ्यः स्वाहा इदं देवेभ्यः ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यः
ॐ श्रद्धायै स्वाहा इदं श्रद्धायै ॐ मेधायै स्वाहा इदं मेधायै ॐ सदसस्पतये स्वा
हा इदं सदसस्पतये ॐ अनुमतये स्वाहा इदमनुमतये अथ ऋग्वेदाहुतयः ॐ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ पृथिव्यैस्वाहा इदंपृथिव्यै ॐ अग्नयेस्वाहा इदमग्नये इतिद्वे आहुती ब्रह्मणेछन्दोभ्य
इतिनवपूर्ववत् अथसामवेदाहुतयः ॐ दिवेस्वाहा इदंदिवे ॐ सूर्य्यायस्वाहा इदꣳसूर्य्या
य इतिद्वे आहुती ब्रह्मणे छन्दोभ्य इत्यादिनवपूर्ववत् अथाथर्ववेदाहुतयः ॐ
दिग्भ्यःस्वाहा इदंदिग्भ्यः ॐ चन्द्रमसेस्वाहा इदंचन्द्रमसे इतिद्वेब्रह्मणेछन्दोभ्य इ
त्यादिनवपूर्ववत् ततोभूरादिनवाहुतिहोमंस्विष्टकृतंचहुत्वा संस्रवप्राशनम् पवि
त्रप्रतिपत्तिः प्रणीताविमोकः ब्रह्मणेपूर्णपात्रदानसंकल्पः अद्येहत्यादि अमुकोहं
अमुकगोत्रस्यवटोः समावर्त्तनाङ्गहोमकर्म्मणः साङ्गफलप्राप्तये अपूर्णपूर्णार्थं
चइदंपूर्णपात्रं सदक्षिणं ब्रह्मन्तुभ्यंसम्प्रददे अकर्म्मेतिमन्त्रपाठः ततोब्रह्म
चारी अग्नेसुश्रवइत्यादिमन्त्रैः अग्निंपरिसमूहनंकुर्य्यात् अग्नेसुश्रवइत्या
दीनांपञ्चानां ब्रह्माऋषिर्यजुश्छन्दोग्निर्द्देवता अग्निपरिसमूहनेविनियोगः
ॐ अग्नेसुश्रवसुश्रवसंमाकुरु १ ॐ यथात्वमग्नेसुश्रवसुश्रवाऽअसि २ ॐ
एवमाꣳसुश्रवसौश्रवसंकुरु ३ ॐ यथात्वमग्नेयज्ञस्यनिधिपाऽअसि ४ ॐ ए
वमहंमनुष्याणांवेदस्यनिधिपाभूयासꣳस्वाहा प्रदक्षिणमग्निंपर्युक्ष्योत्थाय
एकांसमिधमादायतिष्ठन् अग्नयेसमिधमिति प्रजापतिर्ऋषिः पङ्क्तिश्छन्दः
समिद्देवतासमिधादानेविनियोगः ॐ अग्नयेसमिधमाहार्षं बृहतेजातवेदसे

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ह॰ क॰ म॰ ७२

यथात्वमग्नेसमिधासमिध्यस एवमहमायुषा मेधयावर्चसाप्रजयापशुभिर्ब्रह्मवर्चसेनस-
मिन्धेजीवपुत्रोममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्च
स्यन्नादो भूयासꣳस्वाहा इतिमन्त्रेणदक्षिणपाणिनास्रुक्त्वाहोमयेत् एवंद्वितीयांतथा
तृतीयांचसमिधंहोमयित्वा उपविश्य-अग्नेसुश्रवइत्यादिपञ्चभिर्मन्त्रैः पूर्ववत्परि
समूहनं पर्युक्षणंचविधाय तूष्णींपाणीप्रतप्य मुखंविमृज्य ॐ तनूपाऽअग्नेऽसितन्वं
मेपाहि ॐ आयुर्दाऽअग्नेऽस्यायुर्मेदेहि ॐ वर्चोदाऽअग्नेऽसिवर्चोमेदेहि ॐ अग्ने
यन्मेतन्वाऽऊनंतन्मऽआपृण ॐ मेधाम्मेदेवः सविताऽआदधातु ॐ मेधांदेवीसर
स्वतीऽआदधातु ॐ मेधामश्विनौदेवावाधत्तांपुष्करस्रजौ इतिप्रतिमन्त्रंललाटा
टादिचुबुकपर्यन्तं मुखंप्रोञ्छति ततः अङ्गानिचमऽआप्यायन्ताम् इतिशिरसआ
पादमङ्गान्यालभेत् ॐ वाक्चमऽआप्यायतामितिमुखम् ॐ प्राणश्चमऽआप्याय
ताम् इतिनासिकायाम् ॐ चक्षुश्चमऽआप्यायताम् इतिचक्षुषी ॐ श्रोत्रंचमऽआ
प्यायताम् इतिश्रोत्रे ॐ यशोबलञ्चमऽआप्यायताम् इतिबाहू ततउदकस्पर्शः
अथानामिकयाग्नेर्भस्मगृहीत्वा त्र्यायुषाणिकुरुते ॐ त्र्यायुषंजमदग्नेः इति
ललाटे ॐ कश्यपस्यत्र्यायुषम् इतिग्रीवायाम् ॐ यद्देवेषुत्र्यायुषम् इतिदक्षि
णांसे ॐ तन्नोऽअस्तुत्र्यायुषम् इतिहृदि ॐ त्र्यायुषमितिसर्वमन्त्रेणसर्वाङ्गे रामः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथाभ्यभिवादनम् व्यस्तपाणिभ्यां कार्य्यम् अमुकगोत्रो अमुकप्रवरो अमुकवेदान्त
र्गता ऽमुकग्रामवास्तव्यो अमुकशर्म्माहं भो अग्ने त्वामभिवादये इत्यग्निमभिवाद्य ततः
कर्णौ स्पृष्ट्वा हिमं यत् व्यस्तपाणिभ्यां अमुकगोत्र इत्यादि पूर्ववदभिवादनवाक्यमुक्त्वा
भो गुरो त्वामभिवादये इति गुरुमभिवादयेत् गुरुश्च आयुष्मान् भव सौम्य अमुकशर्म्मन्
इत्याशिषं ददाति अथ परिश्रितः स्थापितस्ततः कुम्भानां पुरस्तात् प्रागग्रान् कुशानास्ती
र्य तेषु स्वदंस्थितो ब्रह्मचारी प्राञ्चि उदञ्चि कर्म्माणि भवन्तीति न्यायात् दक्षिण
स्य प्रथमस्य सूत्रकोरणेपात्ते तस्मादित्येव क्रमेण प्रथमादुदकुम्भा दप आदत्ते अ
नेन मन्त्रेण ये अप्स्वन्तरिति प्रजापतिर्ऋषिः यजुश्छन्दः आपो देवता अपामादाने विनियोगः
ॐ ये अप्स्वन्तरग्नयः प्रतिगोह्या ऽउपगोह्यो मयूखो मनोहा स्खलो विरुजस्तनूदूषु
रिन्द्रियहान्तान्विजहामि यो रोचनस्तमिह गृह्णामि इति प्रथमोदककुम्भा दक्षिणपुलु
केन अपो गृहीत्वा आत्मानमभिषिञ्चति मन्त्रेण तेनेति प्रजापतिर्ऋषिर्यजुश्छन्दः
आपो देवता अभिषेचने विनियोगः ॐ तेनाभिषिञ्चते तेन मामभिषिञ्चामि श्रिये
यशसे ब्रह्मणे ब्रह्मवर्चसाय इति १ अथ द्वितीयोदककुम्भात् पूर्ववत्येपर्यन्त
रितिजलादानम् अभिषिञ्चनेतु मन्त्रविशेषः येनेति प्रजापतिर्ऋषिर्यजुश्छन्द
आपो देवता अभिषेचने विनियोगः ॐ येन श्रियमकृणुतां येनावमृशतां सुरा
म् येनाक्षावभ्यषिञ्चतां यद्वां तदश्विना यशः इति अथ तृतीयोदककुम्भात्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येसंतरीति पूर्ववदपोगृहीत्वा आपोहिष्ठेत्यादितिसृणां सिन्धुद्वीपऋषिर्गायत्रीछन्दः
आपोदेवता अभिषेचने विनियोगः ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन महेर
णायचक्षसे इत्यभिषिच्य अथचतुर्थकुम्भात् येसंतरीतिपूर्ववज्जलमादाय ॐ
योवःशिवतमोरसस्तस्यभाजयतेहनः उशतीरिवमातरः इतिसिच्येत् अथपञ्चमकु
म्भात् येपत्वतरीतिपूर्ववज्जलमादाय ॐ तस्माअरङ्गमामवो यस्यक्षयायजिन्वथ
आपोजनयथाचनः इतिशिरोभिषिच्येत ततः षष्ठात् सप्तमात् अष्टमात् चउदककु
म्भात् येपर्वजरीतिमन्त्रेणापोगृहीत्वा तूष्णींशिरोभिषेचनंकुर्य्यात् ततोऽभिषेका
वशिष्टं जलेन सहस्रधारांशिरसिधृत्वा स्नायात् समावर्त्तनात् उत्साहपुनः स्नातेति
पुनः पादोपादानाय अथमेखलामोक्षः तत्रपूर्ववद्धृतांमेखलां बटुः मन्त्रंपठन्स्व
यमेवशिरोमार्गेण निस्सारयेत् उदुत्तममिति शुनःशेपऋषिः त्रिष्टुप्छन्दः मेख
लादेवता मेखलामोक्षेवि० ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथा
य अथावयमादित्यव्रतेतवानागसोअदितयेस्याम मेखलामुन्मुच्य निधायेति
सूत्रात् साहचर्य्यात् दण्डमजिनंच तूष्णींनिधाय आचामेत् ततउपकल्पितमन्य
द्वासः तूष्णींपरिधाय आदित्यमुपतिष्ठेत मन्त्रेण उद्यन्भ्राजिष्णुरिति प्रजापतिर्ऋषिः
शक्करीछन्दः आदित्योदेवता आदित्योपस्थानेविनियोगः ॐ उद्यन्भ्राजिष्णुरिन्द्रोमरु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ङ्गिरसात्प्रातर्य्यो वभिरस्ता द्दुश्वसनिरसि द्दुश्वसनिंमा कुर्व्वा विदं आगमेयो यन्ध्रा श्विन्दुरि
न्द्रो मरुद्भि रस्ता द्दिवायो वभिरस्ता व्रतसनिरसि व्रतसनिंमा कुर्व्वा विद्न्मागमस इति मन्त्रे
णाऊर्द्ध्ववाहुः सूर्य्योपस्थानं कुर्य्यात् ततो दधितिलान् दक्षिणहस्तगतेन सोमतीर्थेन प्रा-
श्य जटालोमनखानि संहृत्य वपननिमित्तं केशीतलोदकेन स्नात्वा आचम्य ततः द्वादशां
गुल अष्टांगुलदीर्घेण कनिष्ठिकाग्रस्थूलेन उदुम्बरकाष्ठेन ब्राह्मणक्षत्रियवैश्यानां क्र
मेण दन्तधावनं कुर्य्यात् अन्नाद्यायेत्यस्य व्यूहध्वमित्यस्य सोम ऋषि रनुष्टुप्छन्दः सोमो देवता दन्तधा
वने विनि० ॐ अन्नाद्याय व्यूहध्वं सोमो राजायमागमत् स मे मुखं प्रमार्क्ष्यते यशसा च भ
गेन च इति ततः आचम्य सुगन्धिद्रव्ययुक्तेन कटुतैलेन सर्ववारि चूर्णेन शरीरोद्वर्तनं कृत्वा
तेष्णोदकेन सशिरस्कं स्नात्वाचम्य चन्दनाद्यनुलेपनं गृहीत्वा गृह्यवेदीसमीपमागत्य-
उपविश्याचम्य अनुलेपनेन हस्तावुपलिप्य नासिकयोर्मुखस्य चोपगृह्णीत मन्त्रेण
प्राणापानावित्यस्य प्रजापतिरृषिः यजुश्छन्दः प्राणापानादिलिंगोक्ता देवताः चन्दनोप
संग्रहणे विनियोगः ॐ प्राणापानौ मे तर्प्पय नासिकाभ्यां चक्षुर्मे तर्प्पय चक्षुर्भ्यां-
श्रोत्रं मे तर्प्पय श्रोत्राभ्यां ततः अपसव्यं विधाय पाणी प्रक्षाल्य तदवनेजनं दक्षिणांगुष्ठ
पितृतीर्थेन दक्षिणस्यां दिशि निषिञ्चेत् पितर इति प्राजापत्य ऋषि सरस्वतीन्द्राग्न
यो यजुश्छन्दः पितरो देवता निनेचने विनि० ॐ पितरः शुन्धध्वम् इति पाण्योरवनेजनज
लं भूमौ निषिञ्चेत् पित्र्यत्वात्सव्येनोदकस्पर्शः ततोनुलेपनानन्तरं केशवादिनाम

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भिर्द्वादशतिलकान्धारयेत् यथा ॐ केशवायनमो ललाटे ॐ नारायणायनमः उदरे ॐ माधवा
यनमो हृदये ॐ गोविन्दायनमः कण्ठकूपके ॐ विष्णवेनमो दक्षिणकुक्षौ ॐ मधुसूदनायन
मो बाहौ ॐ त्रिविक्रमायनमः कर्णमूलयो ॐ वामनायनमो वामकुक्षौ ॐ श्रीधरायनमो
वामबाहौ ॐ पद्मनाभायनमः पृष्ठदेशे ॐ दामोदरायनमः ककुदि ॐ वासुदेवायनमो मूर्द्धि
इति ललाटे वंशपत्राकृतिकं मध्यशून्यं धारयेदितिच एवं तिलकं धृत्वा जपेत् सा चक्षा
इति प्रजापतिर्ऋषिः अनुष्टुप्छन्दो लिंगोक्तादेवता जपे विनियोगः ॐ सा चक्षा अहमक्षिभ्यां
भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासमिति अथोपकल्पितं अहतं वासः परि
धत्ते परिधास्य इत्याथर्वणाऋषिः पंक्तिश्छन्दो वासो देवता वासः परिधाने विनियोगः ॐ
परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि शतं जीवामि शरदः पुरूची रायस्पोषमभ
भिसंव्ययिष्ये अथोत्तरीयम् यशसामेत्याथर्वणाऋषिः पंक्तिश्छन्दो लिंगोक्तादेवता
उत्तरीयपरिधाने विनियोगः ॐ यशसामाद्यावापृथिवी यशसेन्द्राबृहस्पती यशोभगश्च
माविदद्यशोमाप्रतिपद्यताम् इति एकस्य वासस्य तदा पूर्वोत्तरेणाच्छादयेत् ततो द्विराच
म्य द्वितीय यज्ञोपवीतधारणं कुर्यात् ब्रह्मचारिण एकं तु स्नातकस्य द्वे बहूनि वेति
वचनात् केचित्तु पूर्वधृतमुत्तार्य जले प्रक्षिप्य परं नवं उक्तलक्षणं उपवीतद्वयं यज्ञोप
वीतमिति मन्त्रेणायमिति वदन्ति ततआचम्य मालारूपाः सुमनसो गृह्णाति याआहर रम्पः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दितिभारद्वाजऋषिरनुष्टुप्छन्दः सुमनसो देवता पुष्पमालाग्रहणे विनियोगः ॐ याआहरज्ज
मदग्निः श्रद्धायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन च अथावबध्नीते यद्य
शोऽप्सरसामिति भारद्वाजऋषिरनुष्टुप्छन्दः सुमनसो देवताः पुष्पमाला बंधने विनियोगः
ॐ यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु तेन संग्रथिताः सुमनस आबध्नामि यशो म
यि अथोष्णीषेण शिरो वेष्टयते युवा सुवासा इति विश्वामित्रऋषिस्त्रिष्टुप्छन्दो बृह
स्पतिर्देवता शिरोवेष्टने वि० ॐ युवा सुवासाः परिवीत आगात् स उ श्रेयान्भवति जाय
मानः तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः इति ततोऽन्यान्यपि कञ्चुका
दीनि वासांसि धारयेत् कर्णवेष्टकौ परिधत्ते अलङ्करणमसि भूयोऽलङ्करणं भूयात्
इति मन्त्रेण कुण्डलं कर्णयोर्ददाति अथाक्षिणी आङ्क्ते नेत्रे वृत्रस्येति प्रजापतिर्ऋ
षिर्यजुश्छन्दः आञ्जनं देवता अक्ष्यञ्जने वि० ॐ वृत्रस्यासि कनीनकश्चक्षुर्दा असि
चक्षुर्मे देहि ततः आत्मानमादर्शे प्रेक्षते रोचिष्णुरिति प्रजापतिर्ऋषिर्यजुश्छन्दः आ
दर्शो देवता आदर्शप्रेक्षणे वि० ॐ रोचिष्णुरसि ततश्छत्रं प्रतिगृह्णाति बृहस्पतेश्छदिरिति
गौतमऋषिर्बृहती छन्दः छत्रं देवता छत्रग्रहणे वि० ॐ बृहस्पतेश्छदिरसि पाप्मनो
मामन्तर्धेहि तेजसो यशसो मा मान्तर्धेहि तत उपानहौ युगपत्प्रतिमुञ्चते प्रतिष्ठे स्थ
इति जमदग्निर्ऋषिर्विराट्छन्दो लिङ्गोक्ता देवता उपानत्प्रतिमोके वि० ॐ प्रतिष्ठे स्थो
विश्वतो मा पातम् ततो वैणवं दण्डमादत्ते विश्वाभ्य इति याज्ञवल्क्यऋषिर्यजु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क. प्र.

ष्ठदेदण्डोदेवतादण्डग्रहणेवि० ॐ विश्वाभ्योमानाष्ट्राभ्यस्परिपाहिसर्वतः इतिमन्त्रेणदण्ड
ग्रहणंकुर्य्यात् अथमातृपूजनादिपूर्णपात्रदानान्तं आचार्यस्यकृत्यम् अष्टकलशा
भिषेकादिदण्डग्रहणान्तं स्नातकस्यवेदेः कार्यम् वासश्छत्रोपानहदण्डव्यतिरिक्तानि
दन्तधावनादीनि मंत्रवंतिसदाकुर्य्यात् वासःप्रभृतीनितुनूतनान्येवमंत्रवंतिधारयेत् आ
चार्यसम्पूज्य वरंदद्यात् गौर्ब्राह्मणस्यवरमुच्यते संकल्पः अद्येहामुकोहं ममस्नातक
त्वसिद्ध्यै कृतस्यसमावर्त्तनकर्म्मणः सांगतासिद्ध्यर्थं साद्गुण्यार्थं इमांगांगोनिष्क्रयी
भूतं सुवर्णंवापरस्पेण आचार्याय तुभ्यंसम्प्रददे ॐ तत्सत् इतिदत्वा ततआचार्य
मुखात् स्नातकोनियमान्शृणुयात् स्नातकस्यनियमान्वक्ष्यामः इतिसूत्रम् नृत्यगीत
वादित्राणिनकुर्य्यात् नृत्यंतालाद्यनुकार्यंगाविक्षेपः गीतंतालोपनिबद्धं षड्जादिस्वर
विशेषरागध्वनिः वादित्रंतालाद्यनुकारि चतुर्विधम् एतानिस्वयंनकुर्य्यात् नृत्यादि
प्रयुक्तानत्यान्द्रष्टुंनगच्छेत् क्षेमेरात्रौग्रामान्तरंनगच्छेत् क्षेमेराजादिभयरहि
त्येसति रात्रौग्रामाद्ग्रामान्तरंनगच्छेत् नचधावेत् उदपानावेक्षणं वृक्षारोहणफल
प्रचयन सन्धिसर्प्पणविवृतस्नान विषमलंघन शुक्तवचन संध्यादित्यप्रेक्षणभिक्ष
णानिनकुर्य्यात् अस्यार्थः उदपानंकूपादि तस्योपरिस्थित्वाकौतुकादिना अधोमुखो
भूत्वा अवेक्षणंदर्शनंनकुर्य्यात् वृक्षारोहणम् शिखराधिरोहणम् फलप्रचयनंवृथा
ऽपक्वफलत्रोटनम् संधिसर्प्पणंसंधिकुड्यं जीर्णद्वारं तेनसर्प्पणंगमनंनकुर्य्यात्

एम:
७५

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महासंध्यासु संध्यामनुपास्य सूर्यग्रहणमध्यगमनं नकुर्यात् अथवा अनुरक्तयोः पुत्रजन
कयोः मित्रयोः दंपत्योः भ्रात्रोर्वा एकं संध्यः तत्र भेदाय मध्यगमनंनकार्यम् विवृतस्ना
नम् नग्नस्नानम् विषमलंघनं गर्त्तादिलंघनम् शुक्तवचनं लज्जाकरामंगलपरुषं दुःकोक्ति
त्रिविधंनिष्ठुरंवाक्यम् संध्यादित्यप्रेक्षणं त्रिषुसंध्यासु आदित्यावलोकनम् नदुष्कृतम्
नैक्षेतादित्यमुद्यन्तं नास्तंयान्तंकदाचन नोपसृष्टंनवारिस्थं नमध्येनभसोगतमिति
भिक्षणंमिद्धुल्लयाचनम् एतानिकर्माणिसतिनकुर्यात् वर्मात्यपावृतोव्रजेत् देवे इन्द्रे व
र्षतिसति सूर्येतपतिसति अप्रावृतः अनाच्छादितः सन् ॐ अयम्मेवज्रः पाप्मान
मपहन्तु इमंमंत्रंपठन् व्रजेत् गच्छेत् अप्स्वात्मानंनवीक्षेत अप्सुजलेषु आत्मानं
प्रतिबिम्बितं मुखंनपश्येत् तथातैलादिष्वप्युपलक्षणम् घृतेतु छायादर्शनंकर्त
व्यमेव अजातलोम्नीं विपुंश्चलीं षण्ढंचनोपहसेत् अजातलोम्नीं भूनिन्यादिस्त्रा
नैरोमरहितां विपुंसीं पुरुषचिह्नं श्मश्र्वादियुक्तां स्त्रियंनोपहसेत् नचगच्छेत् षंढं
नपुंसकंचनोपहसेत् दोषाधिक्यापत्तेः नगच्छेत् गुर्विणीं सगर्भांसा परि सद्यः प्र
सूतां रजस्वलां निवृत्तरजस्कां वृद्धांचनोपगच्छेत् विजन्येति गुर्विणींप्रति ब्रूयात्
सकुलमितिनकुलंब्रूयात् कपालंकर्परंमनुष्यादिशिरः भगालमितिब्रूयात् इन्द्र
धनुर्मणिधनुरितिब्रूयात् गांधयंतीं परस्मैनाचक्षीत स्ववत्संपाययती गांगोस्ते
पाययति वत्समिति परस्मैनवदेत् उच्चारणंस्ववत्सां भूमौ उत्सर्पन् गच्छन्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिष्ठन् मूत्रपुरीषे न कुर्य्यात् एतच्च फालकृष्टभूमि मार्गजीर्णदेवायतन प्राणिगर्त्तादी
नां मप्युपलक्षणं स्वयं प्रक्षीणेन त्रुटितेन अयज्ञीयकाष्ठेन गुदं प्रमृजीत गोमलो
ष्ठादीनामप्युपलक्षणम् विकृतं वासो नाच्छादयीत विकृतं स्मृतिशिष्टाचाराभ्यां
विरुद्धं नील्यादिरक्तं वासो न परिधीतेत्यर्थः पालाशादिपुष्परक्तं कामाद्वे वासस्तं
परिदध्यादेव उपनिषद्गद्धं चैतत् कामास्यस्य प्राबल्यात् दृढव्रतो वधत्रः स्यात् दृ
ढं स्थिरं प्रारब्धं कर्म यस्य असमाप्तकर्मा न स्यादित्यर्थः वधात् घातात् आत्मानं
त्रायते इति वधत्रः तत्र शृङ्गिनखिदंष्ट्रिभ्यः सम्भवति तेभ्यो रक्षां कुर्वीतेत्यर्थः
सर्वत आत्मानं गोपायेत सर्वं वा एषोऽपरेणां याभिचामिव भूयात् मे त्रो ब्राह्मण
उच्यते इति स्मरणात् इति साधारणाश्रमानियमाः अथ समावर्त्तनानन्तरं त्रिरेव
नियमाः अभोज्याशी भवेत् मासेन भक्षयेत् अमृण्मयपात्री मृण्मयेन पात्रेण जलं
न पिबेत् एतच्चालाबुतुम्ब्यादीनां मप्युपलक्षणम् स्त्रीशूद्रशव कृष्णशकुनि शुनाम
दर्शनमसंभाषणं च स्त्री नारी शूद्रश्चतुर्थो वर्णः शवो मृतकः कृष्णशकुनिः काकः
श्वा कुक्कुरः एतेषां दर्शनं भाषणं चाचिरात्रं वर्जयेत् शवशूद्रसूतकान्नानि नाद्यात्
शवान्नं मृतसूतकान्नं शूद्रान्नं सूतकान्नं जाताशौचान्नं च नाद्यात् मूत्रपुरीषष्ठी
पनानि आतपे सूर्य्ये सम्मुखे न कुर्य्यात् सूर्य्याच्चात्मानं नान्तर्दधीत छत्रवस्त्रादि
ना आत्मानं शरीरं न गोपायेत् तप्तोदकेनार्थान् कुर्वीत शौचादीन् तप्तजलेन कुर्य्या

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दित्यर्थः अवज्योतिरात्रौ भोजनं न कुर्य्यात् दीपादि प्रज्वाल्य भोजनं कुर्य्यान्नान्धकार इत्यर्थः
सत्यमेव वक्तव्यं यदेत् अनृतं मिथ्याभाषणं न कुर्य्यात् सर्वांश्चिमामित्वा एतान्नियमान्करि
ष्यामीति वटुमवधार्य्य आचार्य्यः स्नातं वटुं स्वपादयोः पातयित्वा पूर्णाहुतिं जुहुयात् ततो
तकः आचार्य्यं सम्पूज्य उत्तरांगत्वेन नवग्रहाणां पूजनं कुर्य्यात् ग्रहवेदीसमीपमागत्य आ
सन उपविश्य आचम्य संकल्पं कुर्य्यात् ॐ विष्णुः २ अद्येहेत्यादि अमुकोहं अमुकस्य वटोः
कृतानां चूडोपनयनवेदारम्भसमावर्त्तनकर्म्मणां उत्तरांगत्वेन आदित्यादि नवग्रहाणां पूजनं
करिष्ये ततः आदित्याय नमः इत्यादिनाममन्त्रैः पाद्यादिनीराजनान्तं सम्पूज्य वृहमाग्
रारीति संप्रार्थ्य प्रतिमादानसंकल्पं कुर्य्यात् अद्येहेत्यादि अमुकोहं अमुकशर्म्मा पुत्र
स्य चूडोपनयनवेदारम्भसमावर्त्तनकर्म्मणां साङ्गफलप्राप्त्यर्थं साङ्गतार्थं इमाः स
पूजिताः सौवर्णीः आदित्यादिनवग्रहप्रतिमाः वस्त्राच्छन्नाः ब्राह्मणेभ्यो विभज्य दास्ये
ॐ तत्सत् इत्येतत्प्रतिमादानप्रतिष्ठार्थं सिद्ध्यर्थं इदं द्रव्यं च ब्राह्मणेभ्यो विभज्य दास्ये
इति संकल्प्य आकृष्णेनेति पद्मासनः पद्मकोद्विवाहु रित्यादि वैदिक पौराणिक मंत्रा
भ्यां सर्वां प्रतिमाः पृथक् पृथक् दत्वा अन्येभ्योपि जापकपाठकेभ्यो दक्षिणां दद्यात्
ततो भूयसीं संकल्पयेत् अद्येहेत्यादि अमुकोहं अमुकशर्म्मा पुत्रस्य चूडोपनयन
वेदारम्भसमावर्त्तनकर्म्मणां न्यूनातिरिक्तपरिपूर्त्यर्थं साङ्गतार्थं इमां भूयसीं दक्षि
णां नानागोत्रेभ्यो ब्राह्मणेभ्यो नटनर्त्तकगायकेभ्यो दीनानाथेभ्यश्च विभज्य दास्ये

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथास्तत्कर्म्मणः साङ्गफलप्राप्त्यर्थं साद्गुण्यार्थं यथोपपन्नेन सिद्धान्नेनामान्नेन वा
यथासंख्याकान् ब्राह्मणान्भोजयिष्ये इतिसंकल्प्य नवग्रहादीनां विसर्जनम् मन्त्रः
ॐ उस्रावेतं धूर्षाहौ युज्येथामनः सु अवीरहणौ ब्रह्मचोदनौ स्वस्तिसजमानस्य
गृहान् गच्छतम् यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् इष्टकामसमृद्ध्य
र्थं पुनरागमनाय च गच्छ गच्छेति पठेत् यस्यस्मृत्येति च पठित्वा ॐ अच्युताय नमः
प्रमादात्कुर्वतां कर्म्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति
श्रुतिः ॐ विष्णवे नमः ब्राह्मणेभ्यो दक्षिणां दत्वा अभिषेकतिलकरक्षाबंधन
घृतच्छायामन्त्रपाठादिकानि कृत्वा ततः मंगलतूर्य्य घंटादिवादित्रवहिर्शालातः
त्रिविकादिर्यानेन स्वस्तिवाचनं पठन् गृहं गत्वा जीवमातृणां पूजनं कुर्यात् सु
मुखश्चेत्यादि पठित्वा आसन उपविश्याचम्य अर्घ्यं संस्थाप्य पूजासंकल्पः
अद्येहेत्यादि अमुकोहं अमुकराशेः पुत्रस्य चूडोपनयनवेदारम्भसमावर्तन
कर्म्मणां उत्तरांगत्वेन गृहप्रवेशकर्म्मणि सर्वाभ्युदयप्राप्तये भित्तिलिखितानां
कल्याण्यादिसप्तजीवमातृणां यथामिलितोपचारैः पूजनं करिष्ये एतत्त इ
त्यादि ॐ भूर्भुवः स्वः कल्याण्यादिसप्तजीवमातरः इहागच्छन्तु इहतिष्ठन्तु
वरदाभवन्तु इतिप्रतिष्ठाप्य ध्यानम् कल्याणी मंगला भद्रा पुण्या पुण्यानमु

एमः
११

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वीतथाजयाचविजयाचैव सप्तैताजीवमातरः इतिध्यात्वा नाममन्त्रेणपाद्यादिनीराज
जान्तं सम्पूज्य वसोर्धाराः पातयित्वा ब्रह्मण्यमिति सम्प्रार्थ्य दक्षिणासंकल्पः अद्येहामु
कोहं एतत्कर्मणउत्तरांगत्वेन जीवमातृणां पूजनकर्मणः साङ्गुण्यार्थं इमां दक्षिणां
ब्राह्मणायदास्ये ॐ तत्सत् इतिदद्यात् ततश्चाचारान्मातृष्वसृ भगिन्यादिभिर्वधूः
महानीराजनं तिलकादिच कार्य्यम् ततोब्राह्मणान्भोजयित्वा इष्टबंधुभिः सहभुञ्जी
त यथासुखं विहरेत् इतिसंस्कारपद्धतौ चूडोपनयनवेदारम्भसमावर्तनपद्धतिः
अथविवाहपद्धतिः अथपूर्वांगविधिः विवाहदिनात्पूर्वदिने तस्मिन्नेवदिनेवा पित्रा
दिः पत्न्यासह कृताभ्यंगस्नानः अहतेधौतेवाससी परिधाय शुभासने प्राङ्मुखउप
विश्याचम्य पत्नीसहितं सत्कार्य्यमपत्यं चोपवेश्य गणेशमुक्तविधिनासम्पूज्य
प्रधानसंकल्पं कुर्य्यात् अद्यदेशकालौसंकीर्त्य अद्येहेत्यादि अमुकगोत्रो अमुकशर्माहं अमुक
शर्माहं अमुकगोत्रः एतस्याः कन्यायाः बीजगर्भसमुद्भवैनो निबर्हणद्वारा श्रीपरमे
श्वरप्रीत्यर्थं भर्त्रासहधर्मप्रजोत्पादन द्रव्यपरिग्रहे अधिकारसिद्धये पुत्रपक्षे अ
मुकशर्मणोस्यपुत्रस्य पत्न्यासहधर्मप्रजोत्पादनपूर्वकसकलगार्हस्थ्यसिद्धयेइत्या
दिसंकल्प्य मातृपूजाभ्युदयिकपुण्याहवाचनानिविधाय कलशस्थापनं कृत्वा
नवग्रहानावाह्यसम्पूज्य लेख्यचन्दनादिना लिखितयोर्गौरीहरयोः पूजनंक-
न्याहस्तेनकारयेत् संकल्पः अद्येहेत्यादि अमुकराशि रमुकी अहं सर्वसौभाग्यस

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऽर्घ्यंसंस्थाप्य तत्रब्राह्मणानाहूयसम्पूज्य वरागमनंप्रतीक्षेत अथवरस्यपितामार्गागतस्ववर
स्वजनतादिवृत्तांतानि वेदनार्थं सफलदधिपात्रसहितं सौम्यवेशंमनुष्यद्वयं वरस्यांगणायशि
ष्टहरिद्रारंजितं तैलकुसुमपकं कतिका पद्रस्त्रहस्ते नापितादिकंच प्रेषयति ततः कन्यापिता
पितृप्रेषितंगृहीत्वा मनुष्यंसौमनुष्याणांवा अर्चांकृत्वा यथाशक्तितद्योग्यद्रव्यंदत्वा-
सुभोज्येनभोजयित्वा स्वयमपिस्वीयमाप्त मनुष्यद्वयं फलसहितं वरस्यशीघ्रमाकारणा
र्थं प्रेषयति ततः कन्यापितानिजमंदिराद्द्वारागतं समाजमध्य स्थितंवरंविलोक्य
जनतयासह वरमानेतुं कतिचित्पदानिगत्वा द्वारमानाय्य द्वारेयथाशक्ति वराद्युमित-
यानंचोत्थाय वरंयानादुत्तार्य वरहस्तात् श्रीफलादिसादरं गृहीत्वा स्वानीयस्वस्तिका-
दिशोभितायां भद्रासनायां शुद्धायांभूमौ स्वासनेप्राङ्मुखमुपवेश्य स्वयमुदङ्मु
ख उपविशेत् वरस्यदक्षिणतः आचार्य्य आचार्य्यवरस्य पादप्रक्षालनार्थं पात्रस्थ
गंगंप्रयच्छति मंत्रः ॐ आपद्घनध्वांतसहस्रभानवः समीहितार्थार्पणकामधे
नवः समस्ततीर्थाम्बु पवित्रमूर्त्तये रक्षन्तुमांब्राह्मणपाद पांसवः १ समस्तसंपत्
समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्रा-
ह्मणपादपांसवः २ आधिव्याधिहरंनृणां मृत्युदारिद्र्यनाशनम् श्रीपुष्टिकि काम
दंवन्दे विप्रश्रीपादपंकजम् ३ इत्याचार्य्यवरयोः पादप्रक्षालनंकृत्वा ततःकन्या
पिता आचम्य प्राणानायम्य अर्घ्यंसंस्थाप्य प्रथमंवाग्दानसंकल्पंकुर्य्यात्-

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अद्येहेत्यादि अमुकराशिरमुकशर्म्माहं करिष्यमाणकन्यादानांगत्वेन वाग्दानं करिष्ये इ
तिसंकल्प्य कुंकुमाक्तानि पंचपूगीफलान्यादाय अमुकगोत्रो अमुकप्रवरो अमुकवेदान्त
र्गतामुकशाखाध्यायी अमुकशर्म्माहं अमुकगोत्रस्यामुकशर्म्मणः प्रपौत्राय अमुकश
र्म्मणः पौत्राय अमुकशर्म्मणः पुत्राय अमुकशर्म्मणे विष्णुस्वरूपिणे कन्यार्थिने वराय
अमुकगोत्रस्यामुकप्रवरस्यामुकवेदान्तर्गतामुकशाखाध्यायिनो अमुकशर्म्मणः प्रपौ
त्रीं अमुकशर्म्मणः पौत्रीं अमुकशर्म्मणः पुत्रीं अमुकनाम्नीं श्रीरूपिणीं वरार्थिनीं कन्यां
ज्योतिर्विदादिष्टे मुहूर्ते तुभ्यं दास्ये तत्प्रतिग्रहार्थं एभिर्गंधाक्षतपुष्पपूगीफलद्रव्य
भूषणाद्युपचारैस्त्वामहं वृणे वृतोस्मीति प्रत्युक्तिः इति वाग्दानम् ततः पुनरर्घ्यं संस्थाप्य
वरणसंकल्पं कुर्य्यात् अद्येहेत्यादि अमुकगोत्रो अमुकराशिरमुकशर्म्माहं करिष्यमा
णकन्यादानप्रतिग्रहार्थं द्वारदेशागतस्य पूजनपूर्वकं वरणं करिष्ये तत्पूर्वांगत्वेन वरक
न्ययोः पाणिग्रहणकर्म्मणि आचार्य्यकर्म्मकर्त्तुं आचार्य्यस्य पूजनपूर्वकं वरणं च
करिष्ये भूमिं दर्भाग्रत्यर्घं दत्वा गंधद्वारामिति गंधं नमोस्त्वनन्तायेति अक्षतपुष्पैः स
म्पूज्य सम्पादितार्घोगे नार्घ्येण आचार्य्यसम्मुखः अर्घोऽर्घोऽर्घः प्रतिगृह्यताम् ॐ
अर्घं प्रतिगृह्णामीत्याचार्य्यः प्रतिब्रूयात् ततः कन्यापिता वरणसामग्रीं करे कृत्वा एभि
र्गंधाक्षतपुष्पपूगीफलयज्ञोपवीतद्रव्यवासोलंकरण पुष्पमालाभिर्वरकन्ययो
र्विवाहकर्म्मणि आचार्य्यकर्म्म कर्त्तुं आचार्य्यत्वेन त्वामहं वृणे आचार्य्यस्त्वं तत्प्रति

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क० वि०
१०

गृह्य वृतोस्मीतिप्रतिब्रूयात् आचार्य्यस्त यथास्वं इतिसम्प्रार्थ्य पुनरर्घ्यंदद्यात्
यंयोर्घोर्घैः प्रतिगृह्यताम् अहंप्रतिगृह्णामि इति ततः कन्यापिता सम्पादितमर्घ्यागमर्घ्यं
हस्तयोः कृत्वा उत्थाय वराचार्य्याभिमुखस्तिष्ठेत् ततआचार्य्यप्रमुखाः वरआर्षीय
मेनं मंत्रंयथाक्रम मुखैः पठेयुः ॐ अथवरं वृणीते वलयद्व वेदेषारततस्यगृहस्यहो
मेप्रसंजिते तस्मादेतंवरं समृद्धयति क्षिप्रेणाऽइमंगृहंजुहुयादिति तस्माद्वरं वृणी
ते १ अथवरं वृणीते ह्यस्थ हये कश्चनकुमारो वरं वृणीते सोस्मैसर्वसमृद्धयते त
स्माद्वरं वृणीते २ अथवाराहत्याऽउपानहाऽउपमुञ्चते अग्नौहवैदेवाघृतकुम्भं
प्रवेशयांचक्रुः ततोवराहः संबभूव तस्माद्वाराहोमेदुरोघृताद्धि संबभूव तस्माद्वारा
हेगावः सञ्जानते स्वमेवैतद्रससञ्जानते तत्पशूनामेवै तद्रसे प्रतितिष्ठति तस्मा
द्वाराह्याऽउपानहाऽउपमुञ्चते ३ सऽआजगामगोतमो यज्ञप्रवाहणस्य जैवले
रास तस्मादासनमाहृत्यो दकमाहारयाञ्चकार आस्माकमर्घ्यञ्चकार सहोवाच
वरंभवते गौतमादद्मइति सहोवाचप्रतिज्ञायते ममस्मवरोयान्तु कुमारस्यान्ते
वाचमभाषतस्तन्मेब्रूहीति सहोवाचदैवेषुवैगौतमतद्वरेषु मानुषाणांब्रूहीति
सहोवाचविज्ञायते हास्तिहिरण्यस्यापात्रं गाऽअश्वानां दासीदासानांपरीवार
णांपरिधानानां मानोमहान्तमर्य्यन्तस्याभ्यवधान्योभूदिति सवैगौतमतीर्थे
नेच्छासऽइत्युपैम्यहंभवन्तमिति वाचाहस्मैव पूर्वऽउपयन्ति सहोपाय

रामः
१०

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नकीर्त्यो उवाचवाचा स्वधाव ४ इति पठते वराय अर्घ्यं गर्भहं निवेदयेत् यथा आद्भिः
क्षीरैः कुशाग्रैश्च दध्यावदरतण्डुलैः यवैः सिद्धार्थकैश्चैव अष्टाङ्गोऽर्घः प्रकीर्तितः अष्टा
ङ्गानि तु नाभौ हृत्ले स्कन्धे शिरसि पादयोः जानुभ्यामुरसे वक्त्रे अष्टाङ्गोऽर्घः प्रकीर्तितः
अर्घदानमन्त्रः आगतोसि वरश्रेष्ठ सर्वकामाप्तोसि द्विज प्रतिगृह्णस्व मेऽर्चासि अर्घ्यं गृहीत्वा
नमोस्त्वनेन ॐ असौ यस्ताम्रो ऽअरुण ऽउत बभ्रुः सुमङ्गलः ये चैनं रुद्रा ऽअभितो
दिक्षु श्रिताः सहस्रशो वैषां हेड ईमहे १ ॐ असौ योऽवसर्पति नीलग्रीवो विलो
हितः उतैनं गोपा ऽअदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः २ एवमर्घं दत्वा नमो
स्त्वनन्ताय इति गन्धाक्षत पुष्पमालादिभिर्वरं सम्पूज्य वरणसामग्रीं हस्ते गृहीत्वा ए
भिर्गन्धाक्षत पुष्प पूगीफल दूर्वा यज्ञोपवीत ताम्बूल पादुकोपानह पुष्पमालो
लीमकंचुक कटिवेष्टोपसंव्यान हस्तभूषणाकर्णविभूषण वरमुद्रिकादिभिः करिष्य
माण कन्यादानप्रतिग्रहार्थं अमुकगोत्रं अमुकप्रवरं अमुकशाखिनं अमुकवे
दाध्यायिनं अमुकशर्माणं विष्णुस्वरूपिणं कन्यार्थिनं वरं वरत्वेन त्वामहं वृणे
वृतोस्मीति वरः प्रतिवदेत् ततो वरः वस्त्र यज्ञोपवीत भूषण पुष्पमाला वरमुद्रिका
धारणं विधाय स्वयमाह मंत्रं जपेत् ॐ स्वनमाहमश्विभ्यां भूयासं स्वर्चसा मुखे
न सुश्रुत्कर्णाभ्यां भूयासम् इति ततः आचार्यैः वरस्य उत्थाय यजमानो मतिलका
शीर्वादादिकं कुर्यात् तत्र मंत्रास्तु ॐ अग्नेयत्वामहं यशसोदसात् सोमृतत्वम्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीय ऽ आयुर्दात्र ऽ एधि मयो मह्यं प्रतिगृहीत्रे १ ॐ रुद्राय त्वा मह्यं वरुणो ददातु सो
ऽमृतत्वमशीय प्राणो दात्र ऽ एधि मयो मह्यं प्रतिगृहीत्रे २ ॐ बृहस्पतये त्वा मह्यं
वरुणो ददातु सो ऽमृतत्वमशीय त्वग्दात्र एधि मयो मह्यं प्रतिगृहीत्रे ३ ॐ यमाय
त्वा मह्यं वरुणो ददातु सो ऽमृतत्वमशीय हयो दात्र एधि मयो मह्यं प्रतिगृहीत्रे ४
ॐ को दात्कस्मा ऽ अदात्कामो दात्कामायादात् कामो दाता कामः प्रतिगृहीता कामैत
त्ते इति मंत्राशिषं प्रतिगृह्य दास्यादिभिः सुवासिनीभिर्वरस्य महानीराजनं कारयेत्
इति धूल्यर्घविधिः ततउभयपक्षीया वाद्यपुरस्सरं स्वस्तिवाचनं पठंतो विवाह
शालायां प्रविशेयुः ततः कन्यापिता वरं पादुकंबलास्तृतस्थाने समुपवेश्य वरभा
ले तिलकं कृत्वा सत्यवसेरवरपित्रादीनां मत्येजानेदिस्य बांधवादीनां च ति
लकमाल्यादिभिः पूजनं विधाय सुखोपविष्टान्कुर्यात् ततः प्राङ्मुखं वरं पश्चि
माभिमुखीं कन्यां समुपवेश्य स्वयं दाता उदङ्मुखो भूत्वा अपेक्षितां विवाह
सामग्रीं यथास्थानमासाद्य रक्तकंबलादिना अन्तःपटं विधाय स्वासनउपवि
श्य मधुपर्केणापरमर्चयेत् दीपं प्रज्वाल्य आचम्य अर्घ्यं संस्थाप्य प्राणायामं
कृत्वा अद्येहेत्यादि संकीर्त्य अमुकगोत्रोऽमुकशर्म्माहं कन्यादानप्रतिग्रहार्थं
गृहागतं स्नातकं वरं मधुपर्केणार्चयिष्ये तथा वरोपि अर्घ्यं संस्थाप्य अमुक
गोत्रोऽमुकशर्म्माहं धर्मप्रजात्यनुकृर्थं गृह्यशास्त्रोक्तविधिना विवाहकर्म करिष्ये

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इतिसंकल्प्य मधुपर्कंगृह्णीयात् मधुपर्कविधिस्तु वरशाखोक्तः कार्यः अथय
जमानः पीठमासनमाहार्य्याह साधुभवानास्तामर्चयिष्यामो भवंतमिति ॐ अर्च
यइतिवरस्योक्तिः ततोर्चकपुरुषाः विष्टरद्वयं पाद्यं पाद्यार्थमुदकं अर्घ्यं आचम
नीयं मधुपर्कं दधिमधुघृतं अपिहितं कांस्येनान्यस्मिं कांस्येतत्समीपमानयंति
अथयजमान एकं विष्टरमादाय तिष्ठति यजमानपत्नीयोन्यः कश्चिद्ब्राह्मणो
विष्टरो विष्टरो विष्टरः इतित्रिः श्रावयति प्रतिगृह्यतामितिसकृदुक्त्वा यजमानो
वरस्यहस्ते विष्टरंददाति वरश्च प्रतिगृह्णामीत्युक्त्वा उदगग्रंविष्टरं तूष्णीमादाय व
र्ष्मोस्मीत्यार्थध्रुवाक्टमि रनुष्टुप्छंदो विष्टरोदेवता उपवेशने वि० ॐ वर्ष्मोस्मि
समानानामुद्यतामिव सूर्यः इमंतमभितिष्ठामि यो मा कश्चाभिदासति अनेन
मन्त्रेण विष्टरमुदगग्रमासने निधाय तदुपरि उपविशति ततः पाद्यं २ प्रतिगृह्य
तामिति त्रिः श्राविते वरः प्रतिगृह्णामीत्युक्त्वा प्रतिगृह्य तत्पात्रं भूमौ निधायाञ्
जलिना जलमादाय दक्षिणं पादं प्रक्षालयति विराजो दोहोसीति प्रजापति
र्ऋषिर्यजुश्छन्द आपो देवता दक्षिणपादप्रक्षालने विनियोगः ॐ विराजो दो
होसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः इति मन्त्रेण प्रथमं दक्षि
णपादं प्रक्षाल्य अनेनैव वामं पादं प्रक्षालयेत् क्षत्रियादीनां तु वामं प्रथमम्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आचार्यसेरुयथाशक्ति कलशद्रव्यं दद्यात् तद्द्रव्यमानीय अद्येहामुकोहं दशायाम
न्तर्दशायां गोचरे अष्टकवर्गे सर्वतोभद्रे नेष्टस्थाने वेधफलेषि वा यत्र कुत्र स्थान-
स्थितानां आदित्यादि नवग्रहाणां दुष्टानां दुष्टदोषोपशान्त्यर्थं शुभानां शुभफ
लाधिक्यप्राप्तये इदं सुवर्णं सुवर्णनिष्क्रयीभूतं द्रव्यं यथा कन्या पक्षी यत्पुरोहि
ताय ददामि इति कलशद्रव्यं दत्वा पुनर्द्वितीयं विष्टरं प्रतिगृह्णीयात् ॐ विष्टरो-
विष्टरो विष्टरः प्रतिगृह्यतामित्युक्ते वरः अहं प्रतिगृह्णामीत्युक्त्वा पूर्ववद्वर्ष्मोस्मी
ति मन्त्रेण आसने प्रागग्रं पादयोरधस्तान्निदधाति ततो यजमानः अर्घोऽर्घो अर्घः
प्रतिगृह्यतामिति वदेत् वरः अहं प्रतिगृह्णामीत्युक्त्वा प्रतिगृह्य आपस्थेति
प्रजापतिर्ऋषिरनुष्टुप्छन्दः आपोदेवता अर्घग्रहणे वि० ॐ आपःस्थयुष्मा
भिः सर्वान्कामानवाप्नवानि इत्यर्घमभिमन्त्रयेत अग्निमभिमंत्रणायया समु
द्रमित्यार्घस्य ऋषिरनुष्टुप्छन्द आपोदेवता अर्घाभिमंत्रणे विनियोगः
ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत अरिष्टास्माकं वीरा मापरासे
चि मत्पयः इति अथ आचमनीयं ३ प्रतिगृह्यतां वरस्य प्रतिगृह्णामीत्युक्त्वा
हस्ताभ्यां प्रतिगृह्य आमागन्निति परमेष्ठी ऋषिर्बृहती छन्दः आपो देवता
आचमने वि० ॐ आमागन्यशसासंसृज वर्चसा तम्मा कुरु प्रियं प्रजाना

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मधिपतिं भूतानामरिष्टं तनूनाम् इति मन्त्रेण मक्षदाचम्य ततः तूष्णींस्माती यजमानंकु
र्यात् अथ मधुपर्को मधुपर्को मधुपर्कः प्रतिगृह्यतामित्युक्त्वा दधिमधुघृतं कांस्य
पात्रस्थापितं कांस्येन पिहितं मधुपर्कं निवेदयति वरश्च प्रतिगृह्णामीत्युक्त्वा यजमान
हस्तोद्घाटितं मधुपर्कमीक्षमाणो मंत्रं पठति मित्रस्यत्वा इति बृहस्पतिर्ऋषिर्यजुश्छन्
दो मधुपर्को देवता मधुपर्कप्रेक्षणे वि० ॐ मित्रस्यत्वा चक्षुषा सर्वाणि भूतानि समि
क्षन्ताम् मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षे मित्रस्य चक्षुषा समीक्षामहे इति
प्रतीक्ष्य देवस्यत्वेति बृहस्पतिर्ऋषि र्यजुश्छन्दः सविता देवता मधुपर्कग्रहणे वि०
ॐ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि इत्युक्त्वा
मधुपर्कपात्रं गृहीत्वा स्ववामकरे निधाय दक्षिणहस्तानामिकया त्रिः प्रयौवन्
ति मिश्रयति नमः श्यावेति प्रजापतिर्ऋषि र्यजुश्छन्दः सविता देवता मिश्रणे वि०
ॐ श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि इति मन्त्रेण मधुपर्कं मक्ष
स्य दक्षिणामालोड्य अङ्गुष्ठानामिकाभ्यां सकृत् तूष्णीं बहिर्निक्षिपति एवं द्विवारमा
लोडनं निक्षेपणं च कृत्वा ततः त्रिः प्राश्नाति यन्मधुन इति कुत्सऋषिर्जगती छ
न्दो मधुपर्को देवता मधुपर्कप्राशने विनियोगः ॐ यन्मधुनो मधव्यं परमं रूपमन्ना
द्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्यो ऽन्नादोऽसानि इति —

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनामिकाङ्गुष्ठाभ्यां प्राश्नाति एवं पुनर्द्विवारं मंत्रवत्प्राशनम् मधुवाताऋतायते इत्यादिति
सृभिर्ऋग्भिः प्रत्यृचं प्रतिमंत्रं वा त्रिः प्राशनं कृत्वा प्राशितशेषं शिष्याय पुत्राय वोत्तरत
आसीनाय दद्यात् सर्वं वा प्राश्नीयात् पूर्वस्यां दिशि असंचरे वा क्षिपेत् ततआचम्य प्राण
नायम्य अंगान्युपस्पृशति यथा दक्षिणकराग्रेण संहताभिस्तिसृभिः तर्जनी मध्यमा
नामिकाभिः वाङ्मे आस्येस्तु इति मुखं स्पृशेत् अंगुष्ठप्रदेशिनीभ्यां नासोर्मे प्राणो-
स्त्विति नासिकारन्ध्रम् अंगुष्ठप्रदेशिन्यनामिकाभिः अक्ष्णोर्मे चक्षुरस्त्विति चक्षु
षी तथैव कर्णयोर्मे श्रोत्रमस्त्विति कर्णौ संहतांगुल्यग्रे बाह्वोर्मे बलमस्त्विति बा
हू असंहतांगुलिभ्यां पाणिभ्यां ऊर्वोर्मे ओजोस्त्विति युगपदूरू अरिष्टानि मेंगा
नि सन्तु तनूस्तन्वा मे सह इति शिरः प्रभृति पादपर्यन्तं आलभेत् ततो द्विराचामेत्
ततो यजमानः खड्गप्रतिनिधिं कुशतरुमादाय गौर्गौर्गौः आलभ्यतामित्याह य
रश्यमालभ्यतामित्युक्त्वा मंत्रं पठेत् मातारुद्राणामिति ब्रह्मा ऋषिस्त्रिष्टुप्छ
न्दो गौर्देवता गवाभिमंत्रणे विनियोगः ॐ मातारुद्राणां दुहितावसूनां स्वसादि
त्यानाममृतस्य नाभिः प्रणुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट
मम अमुकयजमानस्य च पाप्मा हतः इत्युपांशु उत्सृजततृणान्यत्तु इत्युच्चैर्ब्रूयात्
ततः कुशपत्रस्योत्सर्जनस्वालम्भनम् कलौ गवालम्भनस्य निषिद्धत्वात् गोनि
ष्क्रयीभूतसुवर्णदाने तन्निष्क्रयीभूतद्रव्यदानं वा उत्सर्गः तत्र संकल्पः अद्येध

एमः
८२

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्यादि अमुकोहं मधुपर्कोपयोगि गोमृत्सर्गकर्म्मणः सांगुण्यार्थं गोप्रत्याम्ना
यीभूतं सार्वणं द्रव्यम्या ब्राह्मणाय ददास्ये ॐ तत्सत् इति संकल्प्य ब्राह्मणायद
द्यात् इति मधुपर्कविधिः अस्मिन्नवसरे कश्चिद्वरपक्षीयो ब्राह्मणो वहिःशाला
यामागत्य वेद्यां पञ्चभूसंस्कार पूर्वकमग्निं संस्थाप्य प्रतिष्ठापयेत् अस्मिन्स्था
पनानन्तरं कन्यापिता वराय वस्त्रचतुष्टयं ददाति तत्र संकल्पः अद्येह अमुकश
र्म्माहं कन्यादानकर्म्मणः पूर्वांगत्वेन वराय सद्रव्यं वस्त्रचतुष्टयं सम्प्रददे इति दद्या
त् परश्च स्वस्तीत्युक्त्वा प्रतिगृह्य तेभ्य एकं युग्मं कन्यायै प्रयच्छति वस्त्र
द्वयं स्वयं परिधत्ते तत्र प्रथमं कन्याया वस्त्रपरिधानमंत्रो जरां गच्छेति प्रजापतिर्ऋ
षिस्त्रिष्टुप्छन्दो वासो देवता वस्त्रपरिधाने विनियोगः ॐ जरां गच्छ परिधत्स्व वा
सो भवा कृष्टीनामभिशस्तिपावा शतञ्च जीव शरदः सुवर्चा रयिं च पुत्राननुसं
व्ययस्वायुष्मतीदं परिधत्स्व वासः अथोत्तरीयमंत्रः या अकृन्तन्निति प्रजापति
र्ऋषिस्त्रिष्टुप्छन्दः वासो देवता उत्तरीय परिधाने विनियोगः ॐ या ऽ अकृन्तन्नव
यं या ऽ अतन्वत याश्च देवीस्तन्तूनभितो ततन्थ तास्त्वा देवी र्जरसे संव्ययस्वायुष्म
तीदं परिधत्स्व वासः अथ वरः स्वयं परिधत्ते परिधास्यै इत्यास्य परमेष्ठि ऋषिः पंक्ति
श्छन्दो वासो देवता वासः परिधाने विनियोगः ॐ परिधास्यै यशोधास्यै दीर्घायु
त्वाय जरदष्टिरस्मि शतञ्च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये अ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

योत्तरीयं यशसामित्याथर्वणऋषिः पंक्तिश्छन्दो लिंगोक्तादेवता उत्तरीयपरिधानेवि
ॐ यशसामाद्यावापृथिवी यशसेन्द्राबृहस्पती यशोभगश्च माविदद्यशोमाप्रतिपद्य
ताम् ततोद्विराचमनम् अथकन्यापिताकन्यावरौ परस्परंसमञ्जयामितिप्रेष
यित्वा सम्मुखीकुर्यात् ततोवरः सम्मुखीभूतः पश्यन्नेवमंत्रंपठति समञ्जन्त्विति
अथर्वणऋषिरनुष्टुप्छन्दो लिंगोक्तादेवताः परस्परसमञ्जनेवि० ॐ समञ्जन्तु
विश्वेदेवाः समापो हृदयानिनौ सम्मातरिश्वासन्धाता समुदेष्ट्रीदधातुनौ अथ
वरगोत्रप्रवरशाखादिज्ञानिश्चयार्थं गोत्रोच्चारः कर्तव्यः तत्रप्रथमंकन्यापक्षीयः
आशीर्वादश्लोकंपठति जेतुंयस्त्रिपुरं हरेणहरिणा व्याजाद्बलिंबध्नता स्रष्टुं
वारिभवोद्भवेनभुवनं शेषेणधर्तुंधराम् पार्वत्यामहिषासुरप्रमथने सिद्धादि
भिर्मुक्तये ध्यातः पञ्चशरेणविश्वविजये नागाननः पातुवः १ किंगोत्रस्य किं
प्रवरस्य किंशाखिनः किंवेदाध्यायिनः किंशर्मणः प्रपौत्राय किंगोत्रस्य
किंप्रवरस्य किंशाखिनः किंवेदाध्यायिनः किंशर्मणः पौत्राय किंगोत्रस्य
किंप्रवरस्य किंशाखिनः किंवेदाध्यायिनः किंशर्मणः पुत्राय आयु
ष्मते कन्यार्थिने विष्णुरूपिणे किंनामवराय अथवरपक्षीयोब्राह्म
णः आशीर्वादंपठति कौपीनंपरिधायपन्नगपतिं गौरीपतौ श्रीपते रम्भ
र्णा समुपागते कमलयासार्द्धं स्थितस्यासने आयाते गरुडेऽथपन्नगप

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तो त्रासाद्बहिर्निर्गते शम्भुं वीक्ष्य दिगम्बरं जलमुचः स्मेरं स्मितं पान्तु वः २ अमुकगोत्र
स्येत्यादि अमुकनाम्ने वराय किंगोत्रस्येत्यादि श्रीरूपिणीं वरार्थिनीं किंनाम्नीं
कन्यां अथ कन्यापक्षीयः पठेत् स्तुत्वा मिन्द्रादैरेवा रतिकलहभग्नं च वलयं ह्ययं
चक्रीकृत्य प्रहसितमुखी शैलतनया अवोचद्यं पश्य त्यवतु सशिवः सा च गिरिजा
सखक्रीडा चन्द्राद्रसानकिरणापूरिततनुः ३ अमुकगोत्रस्येत्यादि अमुकनाम्नीं कन्यां
किंगोत्रस्येत्यादि किंनाम्ने वराय अथ वरपक्षीयः आशीर्वादं पठेत् रासोल्लास
भरेणाविभ्रमभृतामाभीरवामभ्रुवां अभ्यर्णं परिरभ्य निर्भरमुरः प्रेमान्धया राधया साधु
त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति व्याजालिङ्गनचुम्बितः स्मितमनो
हारी हरिः पातु वः ४ अमुकगोत्रस्येत्यादि अमुकनाम्ने वराय किंगोत्रस्येत्यादि
श्रीरूपिणीं वरार्थिनीं किंनाम्नीं कन्यां अथ कन्यापक्षीयः पठेत् दिव्यं वारिकथं
यतः स्मरफणी भो लोकथं पावको दीव्यं तद्धि विलोचने कथमहि दीव्यं सर्वागेन
तस्माद्धूतविधौ त्वया धमुरविन्ती हारः परित्यज्यता मित्थं कोलसुताविहस्य लपि
तः शम्भुः शिवायास्तु वः ५ अमुकगोत्रस्येत्यादि अमुकनाम्नीं कन्यां किंगोत्र
स्येत्यादि किंनाम्ने वराय अथ वरपक्षीयः पठेत् सानन्दं नन्दिहस्ता हतमुरजरवा
हूतकौमारवर्हि त्रासान्नासाग्ररन्ध्रं विशति फणिपतौ भोगसंकोचभाजि गंडोड्डीना
लिमाला मुखरित ककुभस्ताण्डवे शूलपाणे वैनायक्यश्चिरं वो वदनविधुतयः पान्तु
चीत्कारवत्यः ६ अमुकगोत्रस्येत्यादि अमुकनाम्ने वराय किंगोत्रस्येत्यादि किं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाम्नीं कन्याम् इति त्रिवारं शाखोच्चारं विधाय पक्षद्वये आशीर्वादश्लोकपाठः देववर्याय
स्यस्तुतिश्चिज्जगति विदिता रुक्मिणी धर्मपत्नी पुत्राः प्रद्युम्नमुख्याः स्मरनगरजिनो वाह
नं पक्षिराजः वृन्दारण्ये विहारो व्रजपुरवनिता वल्लभा राधिकाद्या स्यक्कविख्यातम
सौ सजयति जगतां स्वस्तये नन्दसूनुः ७ कौशल्याविश्वदाल वालजन्मिः सीता
लतालिङ्गितः सिक्तः पंक्तिरथेन सोदरमहा आरण्याभिसंवर्द्धितः रक्षस्त्रीवृन्दिदाह
पाटनपटुः मच्छायाश्रितानन्दकः धुम्माकंसविभूतये स भगवान् श्रीरामकल्पद्रुमः ८
इति पठित्वा कन्यापिता त्रिवारं ददाति ३ वरं प्रति वदेत् ततः पक्षद्वये आशीर्वादश्रि
णां संकल्पः अद्येहेत्यादि अमुकशर्माहं विवाहकर्मणि द्विजद्वारा कारितस्य आ
शीर्वादकर्मणः सांगतासिद्ध्यर्थं इमां दक्षिणां ब्राह्मणेभ्यो दास्ये ॐ तत्सत् द
क्षिणां दद्यात् ततः कन्यासमागमप्राक्काले कन्यां वस्त्रभूषणादिभिर्भूषयित्वा
गंधाक्षतपुष्पादिभिस्तां पूजयेत् ॐ श्रीश्च ते लक्ष्मीश्च ॐ अम्बे अम्बिके ॐ स
मल्ये इति मन्त्रैः कन्यां पूजयेत् अत्र कन्यादानलग्नानुरोधेन कन्यादानात्
वैपरीत्याद्वा आचारात् दोलिकाभरणं कुर्वन्ति अथ पाणिग्रहणे हे लग्नसमागते
उभयपक्षयोः लग्नदानविधानम् वरपिता अद्येहामुकोऽहं अमुकगोत्रस्य वर
स्य विवाहलग्नात् यत्र कुत्र स्थानास्थितानां ग्रहाणां दुष्टफलनिरासपूर्वक
शुभफलप्राप्तये आदित्यादिनवग्रहाणां प्रीतये इदं स्कवर्णं तन्निष्क्रयीभूतं
द्रव्यं वा ब्राह्मणाय दास्ये ॐ तत्सत् अथ कन्यापिता अद्येहेत्यादि अमुको

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हे अमुकगोत्रेः एस्याः कन्यायाः कन्यादानजन्मात् अन्यत्समानम् दक्षिणां दत्वा इतील
ग्नदनं विधाय ततः शंखघंटातूर्य्यमंगलघोषपुरस्सरं प्राङ्मुखोपविष्टः कन्यापिता
प्रत्यङ्मुखोपविष्टायाः कन्यायाः दक्षिणहस्तांगुष्ठं गृहीत्वा प्राङ्मुखोपविष्टा
य वराय दातुं कन्यादानसंकल्पं कुर्य्यात् कुशतिलयवजलान्यादाय ॐ विष्णुर्नमः
परमात्मने श्रीपुराणपुरुषोत्तमाय ॐ तत्सत् श्रीहंसस्य चित्सदानंदरूपिणो ब्रह्म
णो निर्वाच्य मायाशक्तिविजृम्भिता विद्यायोगात्कालकर्म्म स्वभावाविर्भूत मह
त्तत्वोदिताहंकारतृतीयोद्भूत वियदादिपंचकेन्द्रियदेवता निर्मिताण्डकटाहे चतुर्द
शलोकात्मके लोके लीलयातन्मध्यवर्त्ति भगवतः श्रीनारायणस्यांगनाभिः क
मलोद्भूतेन सकललोकपितामहेन ब्रह्मणः सृष्टिं कुर्वता तदुद्धरणाय प्रजापति
प्रार्थितेन महापुरुषरूपिणा सितवाराहावतारेण ध्रियमाणायामस्यां भूलोक
संस्थितायां धरित्र्यां सप्तद्वीपमण्डितायां क्षीराब्धिद्विगुणद्वीपवलयीकृतलक्ष
योजनविस्तीर्णे जम्बूद्वीपे भरतखण्डे स्वर्गस्थितातीर्थाश्रासितायतोर गंगादिसरि
द्भिः पावितनिखिलजनपावने शौनकादिमुनिकृत निवसति नैमिषारण्ये आ
र्य्यावर्त्ते पुण्यक्षेत्रे हिमवत्पर्वतैकदेशे श्रीभगवन्मार्त्तण्ड कृपापात्र कालचित
पद्म गर्गवाराहाचार्य्यादि गणितायां पाण्डुलादिसंख्यायां श्रीब्रह्मणो द्विती
यपरार्द्धस्य द्वितीययामे तृतीयमुहूर्ते श्रीश्वेतवाराहनाम्नि प्रथमकल्पे स्वायंभु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वस्वारोचिषोत्तम तामसरैवत चाक्षुषेति मनूनामतिक्रम्यमाणे सम्प्रति सप्तमेवैव
स्वतमन्वन्तरे अष्टाविंशतिकलियुगस्य प्रथमचरणे श्रीमन्नृपतिविक्रमार्कसमया
तीतसम्वत्सराणां समयेनानिकानानां मध्ये अमुकनामसम्वत्सरे अ
मुकायने अमुकर्त्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकना
मदिवसनक्षत्रे अमुकनाममहानक्षत्रे अमुकयोगे अमुकनामकरणे अमुकनाम
मुहूर्ते अमुकस्थसूर्ये अमुकस्थचन्द्रे भौ· बु·जी· भृ·के· शनौ· राहौ· अमुकस्थके
तौ एवंगुणविशेषणविशिष्टायां अस्यां शुभावस्थायां अमुकगोत्रो अमुकशाखी अ
मुकशर्म्माहं सपत्नीकोहं अमुकगोत्रस्यामुकप्रवरस्यामुकशाखिनो अमुकवे
दाध्यायिनो अमुकशर्म्मणः प्रपौत्राय अमुकशर्म्मणः पौत्राय अमुकशर्म्मणः
पुत्राय आयुष्मते विष्णुस्वरूपिणे कन्यार्थिने वराय अमुकनाम्ने पूर्वं अमु
कगोत्रस्यामुकप्रवरस्यामुकशाखिनो मुकवेदाध्यायिनो मुकशर्म्मणः प्रपौ
त्रीं अमुकशर्म्मणः पौत्रीं अमुकशर्म्मणः पुत्रीं आयुष्मतीं श्रीरूपिणीं व
रार्थिनीं अमुकनाम्नीमिमां कन्यां यथाशक्त्यलंकृतां यथाशक्त्युपकल्पित
यौतुकयुतां प्रजापतिदैवत्यां पुराणोक्तगुणान्वितां ज्योतिष्टोमातिरात्र
समस्तफलप्राप्तिकामः ममसमस्तपितॄणां निरतिशयसानन्द ब्रह्मलोका
वाप्त्यादि कन्यादानकल्पोक्तफलावाप्तये अनेनवरेणास्यां कन्यायां उत्पाद

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिष्यमाणासंतत्या द्वादशावरान् पितॄन्पवित्रीकर्त्तुं आत्मनश्च श्रीलक्ष्मीनारायणप्रीतये
देवाग्निगुरुब्राह्मणसन्निधौ अग्निसाक्षिकत्वेनासह धर्म्मचरणाय तुभ्यमहं सम्प्रददे प्र
तिगृह्णातु भवान् इतिदाता उत्थाय सकुशाक्षतजलं कन्याहस्तं वरहस्ते समर्पयेत् क
न्यापिता उत्थाय दानवाक्यं पठेत् कन्यां कनकसम्पन्नां कनकाभरणैर्युताम् दास्या
मि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया १ विश्वंभरः सर्वभूताः साक्षिण्यः सर्वदेवताः
इमां कन्यां प्रदास्यामि पितॄणां तारणाय च २ गौरीं कन्यामिमां विप्र यथाशक्तिविभू
षिताम् गोत्राय शर्म्मणे तुभ्यं दत्तां विप्र समाश्रय ३ कन्ये लक्ष्मीः समाख्याता व
रो नारायणः स्मृतः तस्मात्कन्याप्रदानेन क्षमतां मे प्रीयतामिति ४ इतिकन्यादान
वाक्यानि ततः कन्यां प्रार्थयेत् कन्ये ममाग्रतो भूया कन्ये मे देवि पार्श्वयोः कन्ये मे
पृष्ठतो भूया त्वद्दानान्मोक्षमाप्नुयाम् इतिपठित्वा श्रीलक्ष्मीनारायणप्रीतये वर
कन्ययोः पूजनं कृत्वा प्रार्थयेत् त्रैलोक्यनाथदेवेश सर्वभूतदयानिधे दानेनाने
न संप्रीतः सदाशान्तिं प्रयच्छ मे ततो वरः ॐ देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहु
भ्याम्पूष्णो हस्ताभ्याम् प्रजापतये प्रतिगृह्णामि द्यौस्त्वा ददातु पृथिवीत्वा प्रतिगृ
ह्णातु ॐ स्वस्तिइत्युक्त्वा दक्षांगुष्ठं गृहीत्वा कामस्तुतिं पठेत् ॐ को दात्कस्मा
ऽअदात्कामो दात् कामायादात्कामो प्रतिगृहीता कामैतत्ते ततो दाता पुनः पठेत्
कन्यां मम कुले जाता पालिता वत्सराष्टकम् तुभ्यं विप्र मयादत्ता पुत्रपौत्रविवर्द्धि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वि.

नी धर्म्मे चार्थे च कामे च नातिचरितव्यास्त्वया ॐ नातिचरामीति वरः प्रतिवदेत्
ततो दाता उपविश्य कन्यादानप्रतिष्ठां कुर्यात् तिलकुशयवजलान्यादाय अद्ये
ह अमुकोऽहं कन्यादानकर्म्मणः साङ्गतार्थं फलप्रतिष्ठासिद्ध्यर्थं इदं सुवर्णं अ
ग्निदैवतं वराय तुभ्यं सम्प्रददे तथा दासीदासमानं धेनुकादिकं च वराय तुभ्यं सम्प्रददे
इति सुवर्णं दद्यात् वरश्च ॐ स्वस्तीति प्रतिवदेत् अथाचारात् कन्यापिता तद्बान्धवादयो
पि यथाशक्ति धेनुकत्वेन सुवर्णरजत ताम्रपित्तलपात्राणि गोमहिष्यश्व शय्या
दासीदासग्रामादिकं च वरकन्याभ्यां प्रयच्छन्ति केचिदेतद्धर्म्मं न वदन्ति तदेत
दाचारतोऽवगन्तव्यम् अथाचारात् विद्वाचारपरंपराप्राप्तं उभयोर्वरकन्ययोः उत्त
रीयप्रान्तग्रन्थिकरणं मंगलद्रव्यसहितमामनन्ति तत्र द्रव्यपूगीफलसर्षपाक्षत
हरिद्राभिर्वरकन्ययोर्वस्त्राञ्चलग्रन्थिं यज्ञोपवीतेन दृढं बध्वा कलशोपरि सं
स्थाप्य एतत्तु इत्यादि ॐ भूर्भुवः स्वः अंचलग्रन्थे सुप्रतिष्ठितो भव इति प्रति
ष्ठाप्य चतुर्थीकर्म्मदिवसे मोचयेत् ततो वरवध्वाः अंगुष्ठं त्यजेत् लग्नात्पूर्वम्
सम्भवे अथावसरे डोलिकाभरणं वा ततो यथाशक्ति धेनुकादिकं दद्यात् तेत्र प्र
थमं कन्यापक्षे एकस्मिन् कांस्यपात्रोपरि सर्वफलानि संभवे वा तण्डुलपिष्ट
तिलमोदकादि निसद्व्याणि संस्थाप्य फलानि द्राक्षादाडिमपूगीफलजातीफ
ल नारिंगनालिकेर कदलीफलबीजपूर जम्बूजम्बीर निम्बूफलाम्रफल पनस

राम: ७

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मातुलुंगैक दाडिमनारंगी रौप्यादिकांस्यपात्रोपरिस्थापितानि पतिपुत्रवतीनां
स्त्रीणां हस्तेन कुमारी छोलिकां दद्यात् मन्त्रः ॐ याः फलिनीर्या ऽ अफला ऽ अ
पुष्पायाश्च पुष्पिणीः बृहस्पतिप्रसूतास्तानो मुञ्चंत्वंहसः इति गृहीत्वा मद्रंक
णाभिरितिमंत्रं पठित्वा कन्यावरायप्रयच्छति अथ कन्यापिता वरपिता च आचारा
त् पंचसप्तलड्डुकानि सद्रव्याशीर्वादान्मेणम्भोदद्यात् ततो वरपक्षेपि आचारप्रा
प्तं महालड्डुकादि छोलिकाभरणं कुर्य्यात् शाल्यादिपिष्टघटित लवंगैलामरि
च कर्पूरजातीफलजातीपत्रादि सुगंधिद्रव्यामिश्रित पिष्टतिलमहालड्डुका
नि अपूपशष्कुली सोहालिका फेणिकादिविविध पक्वान युत सद्यो घृत
पाचितानि रौप्यादिकांस्यपात्रोपरि स्थापितानि पतिपुत्रवती हस्तेन गृही
त्वा प्रयच्छेत् मंत्रः ॐ अन्नपते ऽ न्नस्यनो धेह्यनमीवस्य शुष्मिणः प्रप्रदाता
रंतारिष ऽ ऊर्जन्नो धेहि द्विपदे चतुष्पदे ततो वासांसि हरितपीतश्वेतरक्तनील
मांजिष्ठ कौसुम्भ काश्मीर यक्षकर्दम मृगमदादि नानारंगरंजितानि विचित्र
कार्पास कौशेय पट्टसूत्र नूतन स्वर्णसूत्राञ्चितानि नानादिग्देशजातानि बहुक्रय
क्रीतानि बहुमौल्यानि नानानामधेयानि दुकूलोत्तरीय कञ्चुकादीनि रौप्या
दिकांस्यपात्रोपरि स्थाप्य मंत्रः ॐ यदश्याभिवासउपस्तृणान्यधिवासं याहि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

सं. क. वि. ११

सत्पान्यस्मै संदानमर्घं पट्टीऔं प्रियादेवस्त्राद्यामयंति परिधेयभूषणानि मणिमौ
क्तिकहीरक गारुत्मत मरकत पुष्परागनीलमहानीलेन्द्र वैडूर्य्यगोमेदादि महार्घवि
विधोपलशोभित स्वर्णरचितकटककेयूरपादांगुलीयक काञ्चीहारग्रैवेयकना
सिकाभरण तिलक ताटंक स्वर्णपुष्प कंकणा करांगुलीयक बाहुबन्धकिरीटशिरः
पुष्पादीनि विविध स्वर्णशृंखला पट्टसूत्रग्रथितानि नानानामधेयानि भूषणानि
रौप्यादिकांस्यपात्रोपरिस्थाप्य मन्त्रः ॐ रूपेणवो रूपमभ्यागांतु थो वो विश्ववेदा
विभजतु ऋतस्यपथाप्रचर चंद्रदक्षिणाविस्वः पश्यव्यन्तरिक्षं यतस्वसदस्यै १ ॐ
स्वर्णाघर्म्मः स्वाहा ॐ स्वर्णार्कः स्वाहा ॐ स्वर्णज्योतिः स्वाहा स्वर्णसूर्य्यः स्वाहा
इतिकौलिकाभरणम् अथ कन्यापितादक्षिणासंकल्पं कुर्य्यात् अद्येहेत्यादि
अमुकगोत्रो अमुकशर्म्माहम् अमुकनाम्ना सपत्नीकोहं श्रुतिस्मृतिपुराणोक्त फला
वाप्त्यै श्रीलक्ष्मीनारायणप्रीतये कन्यादानकर्म्मणः साङ्गफलप्राप्तये इमांभू
यसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यो नदर्न्तकगाम्
केभ्यश्च विभज्यदास्ये ॐ तत्सत् इतिसंकल्प्य ब्राह्मणेभ्यो दक्षिणां दत्वा अभि
षेकतिलक मंत्रपाठादिकं कारयेत् अत्रावसरे गायंत्यो वृद्धाः पुरंध्र्यो वरदत्तानि
भूषणानि वासांसि च कन्यां परिधापयंति सम्यक् शृंगारादिना भूषयंतिच
अथवरः पित्राप्रदत्तामादाय निष्क्रामयति अस्यार्थः पित्राजनकेन प्रदत्तां संक

राम
८८

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्यस्तां आदाय प्रतिग्रहविधिना प्रतिगृह्य हस्ते गृहीत्वा गृहमध्यान्मंडपादावग्निस
मीपं गन्तुं निष्क्रामतीति अथाग्नेः समीपं गच्छन्तौ वधूवरौ कन्यापिता परस्परं समीक्ष
थामिति प्रैषेण समीक्षयति ततः प्रेषितो वरः समीक्षमाणां कन्यां अनुरागेण समीक्ष
माणः चतुरो मंत्रान् पठति अघोरचक्षुरित्यादीनां च तुर्णां मंत्राणां प्रजापतिर्ऋषि
स्त्रिष्टुप् छन्दः कुमारी देवता परस्परसमीक्षमाणे विनियोगः ॐ अघोरचक्षुरपतिघ्न्येधि
शिवा पशुभ्यः सुमनाः सुवर्चाः वीरसूर्देवकामा स्योना शन्नो भव द्विपदे चतुष्पदे १
ॐ सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः तृतीयो अग्निष्टे पति स्तुरीयस्ते मनु
ष्यजाः २ ॐ सोमो ददद्गंधर्वाय गंधर्वो दददग्नये रयिं च पुत्रां श्चादादग्निर्मह्य
मथो इमाम् ३ ॐ सा नः पूषा शिवतमा मेरय सा न ऊरू उशती विहर यस्यामुशन्तः
प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्यै ४ एवं मंत्रचतुष्टयं पठित्वा निष्क्र
मणं कुर्यात् तत्र मंत्रः यदैषीत्यस्य अथर्वण ऋषि रनुष्टुप् छन्दो लिंगोक्ता देवता
निष्क्रमणे विनियोगः ॐ यदैषि मनसा दूरं दिशोनुपवमानो वा हिरण्यपर्णो वै
कर्णः स त्वा मन्मनसां करोतु असौ अमुकी लक्ष्मीति सम्बुध्यन्तं नाम गृह्णीयात्
ततः स्वदक्षिणहस्तेन वध्वा वामकरं गृहीत्वा विवाहशालातोग्निसमीपं गन्तुं
बहिर्निष्क्रामति अत्र निष्क्रमणप्रभृति आमूर्द्धाभिषेकात् कश्चिद्ब्राह्मणः जल
पूर्णकुम्भं स्कन्धे धृत्वा वाग्यत उत्तरतस्तिष्ठेत् अथ वरो वध्वाः सह बहिः शाला

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

मागत्याग्निं प्रदक्षिणीकृत्य वधूं दक्षिणतः कृत्वा दक्षिणेन तृणपुलिकां वरेण
प्रहत्योल्लंघ्य दक्षिणपादमग्रतः कृत्वा उपविशति ततो वरस्तिराचम्य त्रिः प्राणाना
यम्य वधूं दक्षिणत उपवेश्य अर्घ्यं संस्थाप्य प्रधानसंकल्पं कुर्यात् अद्येहे
त्यादि अमुकगोत्रो अमुकराशिरमुकशर्माहं धर्मार्थकामसिद्धिद्वारा ॐ तत्सत्
श्रीपरमेश्वरप्रीतये ब्राह्मविधिना पितृदत्तामिमां गौरीं कन्यां विवाहयिष्ये
तत्पूर्वाङ्गतया विवाहहोमकर्मणि कृताकृतावेक्षणाय ब्रह्मकर्मकर्तुं ब्रह्म
णः पूजनपूर्वकं वरणं च करिष्ये इति संकल्प्य भूमिर्दायाग्नि ब्रह्मणे अर्घ्यं
दत्वा गन्धाक्षतपुष्पैः सम्पूज्य वरणसामग्रीं करे कृत्वा एभिर्गंधाक्षतपुष्प
पूगीफल द्रव्यवासोभिः विवाहकर्मणि कृताकृतावेक्षणाय ब्रह्मकर्मक
र्तुं अमुकशर्माणं ब्रह्मत्वेन त्वामहं वृणे वृतोस्मीति प्रत्युक्तिः एवमुत्तरासने
वृतो ब्रह्मा पूर्वकल्पितदक्षिणासने उपविशेत् ततो ब्रह्मोपवेशनादि पर्यु
क्षणान्तं कर्म कुर्यात् ततः प्रणीताप्रणयनाद्यासादनान्ते विशेषोपकल्प
नीयानि वस्तून्यासादयेत् शमीपलाशमिश्राः लाजाः अखण्डाश्मा लोहित
मानडुहं चर्म कुमारीभ्रातानवीनं सूर्पम् आलाक्यापवरद्रव्यम् ततः पर्यु
क्षणान्तं कर्म कृत्वा वरो देवताभिध्यानं करोति अद्येह अमुकोहं विवाहकर्म
णा यक्ष्ये तत्र प्रजापतिमिन्द्रमग्निं सोममग्निं वायुं सूर्य्यं अग्निवरुणावग्नि रामः
८८

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वरुणावग्निंवरुणंसवितारं विष्णुंविश्वान्मरुतः स्वर्कान्वरुणमदितिं प्रजापतिं ऋतासाहं
ऋतधामानं अग्निं गंधर्वं ४ ओषधीरप्सरसो मुदः २ संहितंविश्वसामानं सूर्यं
गंधर्वं ४ मरीचीरप्सरस आयुवः २ सुषुम्णं सूर्यरश्मिं चन्द्रमसंगंधर्वं ४ नक्षत्राण्य
प्सरसोभेकुरीः २ इषिरंविश्वव्यचसं वातंगंधर्वं ४ आपो अप्सरस ऊर्जः २ भुज्युंसु
पर्णं यज्ञंगंधर्वं ४ दक्षिणा अप्सरसस्तावाः २ प्रजापतिंविश्वकर्माणं मनोगंधर्वं ४
ऋक्सामान्यप्सरस एष्टीः २ ॥ ४२ चित्तं १ चित्तिं १ आकूतं १ आकूतिं १ विज्ञातं १ विज्ञानं १
मनः शक्वरीं १ दर्शं १ पौर्णमासं १ बृहतं १ रथंतरं १ प्रजापतिं १ जयं १ निन्द्रं १ १५ अग्निंभू
तानामधिपतिं १ इन्द्रंज्येष्ठानामधिपतिं १ यमंपृथिव्यानामधिपतिं १ वायुमंतरिक्ष
स्याधिपतिं १ सूर्यंदिवोधिपतिं १ चन्द्रमसंनक्षत्राणामधिपतिं १ बृहस्पतिंब्रह्म
णामधिपतिं १ मित्रंसत्यानामधिपतिं १ वरुणमपामधिपतिं १ समुद्रंस्रोत्यानाम
धिपतिं १ अन्नंसाम्राज्यानामधिपतिं १ सोममोषधीनामधिपतिं १ सवितारं
प्रसवानामधिपतिं १ रुद्रंपशूनामधिपतिं १ त्वष्टारंरूपाणामधिपतिं १ विष्णुं
पर्वतानामधिपतिं १ मरुतोगणानामधिपतीन् १ पितॄन् १ पितामहान् १ परान् १
अवरान् १ ततान् १ ततामहान् १ २२ अग्निं १ अग्निं १ अग्निं १ वैवस्वतं १ मृत्युं
चाज्येनाहंयक्ष्ये अत्रावसरकन्यादेवताभिध्यानंकरोति अर्यमणमग्निं १
अर्यमणमग्निं २ अर्यमणमग्निं २ भर्गं ४ लाजैरहंयक्ष्ये पुनर्वरः प्रजापतिं १

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्निं स्विष्टकृतं २ यज्ञेनाहं यत्ते इदमाज्यं मयापरित्यक्तं यथादैवतमस्तु इमेला
ज्यं च मयापरित्यक्ता यथादैवतं सन्तु एवं कृत्वाप्यागं विधाय अग्निं प्रज्वाल्य वए
तन्न इत्यादि ॐ भूर्भुवः स्वः योजकनामाग्ने सुप्रतिष्ठितो भव वरदो भव ॐ अग्नि
प्रज्वालितं ॐ चत्वारि इति मंत्राभ्यां अग्निध्यानादिनीराजनान्तं सम्पूज्य दक्षि
णो जान्वाच्य ब्रह्मणान्वारब्धो मनसा प्रजापतिं ध्यात्वा आघारावाज्यभागौ जुहु
यात् ॐ प्रजापतये स्वाहा इदं प्रजापतये ॐ इन्द्राय स्वाहा इदमिन्द्राय ॐ अ
ग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय ततो महाव्याहृतिहोमः
कार्यः ततो दक्षिणासंकल्पः अद्येह अमुकगोत्रोऽमुकशर्म्मा सवधूकोहं
आघाराज्यभागमहाव्याहृतिसर्वप्रायश्चित्तहोमस्य सांगतासिद्ध्यै इमां द
क्षिणां आचार्यब्रह्मभ्यां विभज्य दास्ये ॐ तत्सत् इति दद्यात् आचार्यब्र
ह्माणौ च मन्त्राशिषं दद्यातां यथा उक्तमेव तु इति च वरुणाविष्णुना सह
तुष्टिपुष्टिकरौ नित्यं शुभयोः स्त्रीकुमारयोः इति अथ राष्ट्रभृद्धोमः ऋताषा
डिति प्रजापतिर्ऋषिर्यजुश्छन्दः ऋताषाडृतधामाग्निर्गन्धर्वो देवता होमे वि॰
ॐ ऋताषाडृतधामाग्निर्गन्धर्वः स नः इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्
इदमृतासाह ऋतधाम्ने अग्नये गन्धर्वाय पुनः ऋतषाडिति प्रजापतिर्ऋषि
र्यजुश्छन्दः औषधयोप्सरसो मुदो देवता हो॰ ॐ ऋताषाडृतधामाग्नि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गंधर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा इदमोषधीभ्योऽप्सरोभ्यो मु
द्भ्यः संहित इति प्रजापतिर्ऋषिर्यजुश्छन्दः संहितो विश्वसामा सूर्यो गंध
र्वो देवता होमे वि० ॐ संहितो विश्वसामा सूर्यो गंधर्वः स न इदं ब्रह्मक्षत्रं
पातु तस्मै स्वाहा वाट् इदं संहिताय विश्वसाम्ने सूर्याय गंधर्वाय पुनः सं
हित इति प्रजापतिर्ऋषिर्यजुश्छन्दः मरीचयोऽप्सरस आयुवो नाम ताभ्यः
स्वाहा इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यः सुषुम्ण सुषुम्णा इति प्रजापतिर्ऋषि
र्यजुश्छन्दः सुषुम्णः सूर्यरश्मिश्चन्द्रमा गंधर्वो देवता हो० ॐ सुषुम्णः सूर्य
रश्मिश्चन्द्रमा गंधर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं सुषुम्णाय
सूर्यरश्मये चन्द्रमसे गंधर्वाय पुनः सुषुम्ण इति प्रजापतिर्ऋषिर्यजुश्छन्दः
नक्षत्राण्यप्सरसो भेकुरयो देवता हो० ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गंधर्व
स्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा इदं नक्षत्रेभ्योऽप्सरोभ्यो
भेकुरीभ्यः इषिर इति प्रजापतिर्ऋषिर्यजुश्छन्दः इषिरो विश्वव्यचा वातो गं
धर्वो देवता हो० ॐ इषिरो विश्वव्यचा वातो गंधर्वः स न इदं ब्रह्मक्षत्रं पातु त
स्मै स्वाहा वाट् इदमिषिराय विश्वव्यचसे वाताय गंधर्वाय पुनरिषिर इति
प्रजापतिर्ऋषिर्यजुश्छन्दः आपोऽप्सरस ऊर्जो देवता होमे वि० ॐ इषिरो वि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्यश्चावातोगंधर्वः स्तस्यापोप्सरस ऊर्जोनामताभ्यः स्वाहा इदमद्भ्यो प्सरोभ्य
ऊर्ग्भ्यः भुज्युरिति प्रजापतिर्ऋषिर्यजुश्छन्दः भुज्युः सुपर्णो यज्ञोगंधर्वोदेव
ताहो० ॐ भुज्युः सुपर्णो यज्ञोगंधर्वः सनइदं ब्रह्मक्षत्रंपातु तस्मैस्वाहावाट्
इदंभुज्यवेसुपर्णायज्ञायगंधर्वाय पुनः भुज्युरिति प्रजापतिर्ऋषि र्यजु
श्छन्दो दक्षिणाप्सरसस्तावा देवताहोमेवि० ॐ भुज्युः सुपर्णोयज्ञोगंधर्व
स्तस्यदक्षिणाप्सरसस्तावानामताभ्यः स्वाहा इदंदक्षिणाभ्योप्सरोभ्य स्ता-
वाभ्यः प्रजापतिरितिप्रजापति र्ऋषि र्यजुश्छन्दः प्रजापतिर्विश्वकर्मामनो
गंधर्वोदेवताहोमेविनियोगः ॐ प्रजापतिर्विश्वकर्मा मनोगंधर्वः सनइदं
ब्रह्मक्षत्रंपातुतस्मैस्वाहावाट् इदंप्रजापतये विश्वकर्मणे मनसे गंधर्वाय
पुनः प्रजापतिरिति प्रजापतिर्ऋषि र्यजुश्छन्दः ऋक्सामान्यप्सरसो एष्ट
योदेवताहोमेवि० ॐ प्रजापतिर्विश्वकर्मा मनोगंधर्वस्तस्य ऋक्सामा
न्यप्सरस ऽएष्टयोनामताभ्यः स्वाहा इदमृक्सामभ्योप्सरोभ्य एष्टिभ्यः
अत्राग्निरदक्षिणा अद्येह अमुककर्म्मा सपत्नीकोहं कृतैतद्राष्ट्रभृद्धोम
स्य साङ्गफलप्राप्तये साद्गुण्यार्थं इमांदक्षिणां आचार्यायब्राह्मणाय
यथांशेनदास्ये ॐ तत्सत् मन्त्रपाठः गोविन्दोगोकुलेन्द्रैव गोपीभिर्विहरेः

राम:
५१

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सह तुष्टिपुष्टिकोनित्य मुभयोः स्त्रीकुमारयोः इतिराष्ट्रभृद्धोमः अथ जयाहोमः चित्तं
चेत्यादीनां त्रयोदशानां मंत्राणां परमेष्ठी ऋषिः अनुष्टुप्छन्दः चित्तादयोमंत्रोक्ता देवताः
प्रतिमंत्रं होमे विनियोगः अन्यच्च चित्तंचेतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः चित्तंदेवताहोमे॰
ॐ चित्तं चस्वाहा इदंचित्ताय ॐ चित्तिश्चेतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः चित्तिर्देवता
होमेवि॰ ॐ चित्तिश्चस्वाहा इदंचित्त्यै आकूतंचेतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः आकू
तंदेवताहोमेवि॰ ॐ आकूतंचस्वाहा इदमाकूताय आकूतिश्चेतिपरमेष्ठी ऋषिरनु
ष्टुप्छन्दः आकूतिर्देवताहो॰ ॐ आकूतिश्च स्वाहा इदमाकूत्यै विज्ञातंचेतिपरमेष्ठी
ऋषिरनुष्टुप्छन्दः विज्ञातंदेवताहो॰ विज्ञातंचस्वाहा इदंविज्ञाताय विज्ञातिश्चेति
परमेष्ठी ऋषिरनुष्टुप्छन्दः विज्ञातिर्देवताहो॰ विज्ञातिश्चस्वाहा इदंविज्ञात्यै मन
श्चेतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः मनोदेवताहो॰ ॐ मनश्चस्वाहा इदंमनसाय
शक्वरीश्चेतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः शक्वर्योदेवताहो॰ ॐ शक्वरीश्चस्वाहा
इदंशक्वर्यै दर्शंचेतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः दर्शोदेवताहो॰ ॐ दर्शंचस्वाहा
इदंदर्शाय पौर्णमासंचेतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः पौर्णमासोदेवताहो॰ ॐ पौ
र्णमासश्च स्वाहा इदंपौर्णमासाय बृहच्चेतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः बृहद्दे
वताहो॰ ॐ बृहच्चस्वाहा इदंबृहते रथंतरंचेतिपरमेष्ठी ऋषिरनुष्टुप्छन्दः रथं
तरंदेवता होमे॰ रथंतरंचस्वाहा इदंरथंतराय प्रजापतिरितिपरमेष्ठी ऋषिरनु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्टुप्छन्दः प्रजापतिर्देवता होमे० ॐ प्रजापतिर्जायानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु
तस्मै विशः समनमन्त सर्वाः स उग्रः स इहव्यो बभूव स्वाहा इदं प्रजापतये जायानि
न्द्राय उदकस्पर्शः ततो दक्षिणा अद्येह अमुकशर्मा सव भूवकोहं चित्तादिहोमक
र्मणः साङ्गफलप्राप्त्यर्थं साद्गुण्यार्थं इमां दक्षिणां आचार्याय ब्रह्मणाभ्यां यथांशेन
दास्ये ॐ तत्सत् अभिषेकः चेरं जीव्यं महोनजाश्चिन्नाद्याध्यदिवौकसः प्रकच्छ
न्तुके वा न्छा मुभयोः स्त्रीकुमारयोः इति जयाहोमः अथाभ्यातानहोमः अग्नि
भूतानामधिपतीत्यादि पितरः पितामहा इत्यन्तानाम अष्टादशमन्त्राणां प्रजा
पतिर्ऋषिः त्रिष्टुप्छन्दो मन्त्राम्नाता अग्न्यादिदेवताः प्रतिमन्त्रं होमे विनियोगः
अन्वयं अग्निर्भूतानामधिपतिरिति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः अग्निर्भूताना
मधिपतिर्देवता होमे० ॐ अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मि
न्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याः स्वाहा
इदमग्नये भूतानामधिपतये इन्द्रो ज्येष्ठानामधिपतिरिति प्र० त्रि० इन्द्रो ज्येष्ठा
नामधिपतिर्देवता हो० ॐ इन्द्रो ज्येष्ठानामधिपतिः स मावत्वस्मिन् ब्रह्म
ण्यस्मिं० देवहूत्याः स्वाहा इदमिन्द्राय ज्येष्ठानामधिपतये यमः पृथि
व्यानामधिपतिरिति प्र० त्रि० यमः पृथिव्यानामधिपतिर्देवता हो० ॐ यमः पृ
थिव्यानामधिपतिः स मावत्वस्मिन्० देवहूत्याः स्वाहा इदं यमाय पृथि

एमः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यानामधिपतये पितृभ्यस्त्वायुदकस्मर्ग्यः वायुरंतरिक्षस्याधिपतिरिति प्र॰ त्रि॰ वा
युरंतरिक्षस्याधिपतिर्देवता हो॰ ॐ वायुरंतरिक्षस्याधिपतिः समा॰ देवकृत्याय
स्वाहा इदं वायवे अन्तरिक्षस्याधिपतये सूर्यो दिवोधिपतिरिति प्र॰ त्रि॰ सूर्यो
दिवोधिपतिर्देवता हो॰ ॐ सूर्यो दिवोधिपतिः समावत्वस्मिन्॰ इदं सूर्याय दि
वोधिपतये चन्द्रमा नक्षत्राणामधिपतिरिति प्र॰ त्रि॰ चन्द्रमा नक्षत्राणामधिपति
र्देवता हो॰ ॐ चन्द्रमा नक्षत्राणामधिपतिः समा॰ इदं चन्द्रमसे नक्षत्राणामधिप
तये बृहस्पतिर्ब्रह्मणोधिपतिरिति प्र॰ त्रि॰ बृहस्पतिर्ब्रह्मणोधिपतिर्देवता हो॰
ॐ बृहस्पतिर्ब्रह्मणोधिपतिः समा॰ इदं बृहस्पतये ब्रह्मणोधिपतये मित्रः
सत्यानामधिपतिरिति प्र॰ त्रि॰ मित्रः सत्यानामधिपतिर्देवता हो॰ ॐ मित्रः स
त्यानामधिपतिः समा॰ इदं मित्राय सत्यानामधिपतये वरुणोपामधिपति
रिति प्र॰ त्रि॰ वरुणोपामधिपतिर्देवता हो॰ ॐ वरुणोऽपामधिपतिः समा॰ इदं
वरुणायापामधिपतये ॐ समुद्रः स्रोत्यानामधिपतिरिति प्र॰ त्रि॰ समुद्रः स्रो
त्यानामधिपतिर्देवता हो॰ ॐ समुद्रः स्रोत्यानामधिपतिः समा॰ इदं समुद्रा
य स्रोत्यानामधिपतये अन्नꣳ साम्राज्यानामधिपतिरिति प्र॰ त्रि॰ अन्नꣳ
साम्राज्यानामधिपतिर्देवता हो॰ ॐ अन्नꣳ साम्राज्यानामधिपतिः समा॰

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदमन्नाय साम्राज्येनामधिपतये सोम ओषधीनामधिपतिरिति प्र० त्रि० सोम
ओषधीनामधिपतिर्देवता हो० ॐ सोम ओषधीनामधिपतिः स्वाहा० इदं सोमाय
ओषधीनामधिपतये सविता प्रसवानामधिपतिरिति प्र० त्रि० सविता प्रसवाना
मधिपतिर्देवता हो० ॐ सविता प्रसवानामधिपतिः स्वाहा० इदं सवित्रे प्रसवाना
मधिपतये ॐ रुद्रः पशूनामधिपतिरिति प्र० त्रि० रुद्रः पशूनामधिपतिर्देवता हो०
ॐ रुद्रः पशूनामधिपतिः स्वाहा० इदं रुद्राय पशूनामधिपतये त्वष्टा रूपाणा
मधिपतिरिति प्र० त्रि० त्वष्टा रूपाणामधिपतिर्देवता हो० ॐ त्वष्टा रूपाणामधि
पतिः स्वाहा० इदं त्वष्ट्रे रूपाणामधिपतये विष्णुः पर्वतानामधिपतिरिति प्र० त्रि०
विष्णुः पर्वतानामधिपतिर्देवता हो० ॐ विष्णुः पर्वतानामधिपतिः स्वाहा० इदं वि
ष्णवे पर्वतानामधिपतये मरुतो गणानामधिपतिरिति प्र० त्रि० मरुतो गणाना
मधिपतिर्देवता हो० ॐ मरुतो गणानामधिपतिः स्वाहा० इदं मरुद्भ्यो गणाना
मधिपतिभ्यः पितरः पितामहा इति प्रजापतिर्ऋषिः त्रि० पितरः पितामहाः
परे वरे तता ततामहा देवता होमे वि० ॐ पितरः पितामहाः परे वरे तता तता
महा इह मावत्वस्मिन्० इदं पितृभ्यः पितामहेभ्यः परेभ्यो वरेभ्यस्ततेभ्य
स्ततामहेभ्यः इत्यष्टादश मन्त्राः अभ्यातानसंज्ञाः प्रणीतोदकस्पर्शः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

अत्रापि दक्षिणा अग्नेरित्यादि अनुकरणम्भो सवधूकोऽहं अभ्यातानं होमस्य साद्गुण्य
ल्यप्राप्तये साङ्गुण्यार्थं इमां दक्षिणां आचार्यब्रह्मभ्यां यथांशेन दास्ये ॐ तत्स
त् मंत्रपाठः ओंसोमञ्चतुर्णिच वरुणो विष्णुनामह तुष्टिपुष्टिकोणनित्य शुभयोः
स्त्रीकुमारयोः अथ परान्यादिपञ्चकहोमः अग्निरैतित्यादीनां पञ्चानां मंत्रा
णां प्रजापतिरृषिस्त्रिष्टुप्छन्दो ऽग्निर्देवता होमे वि० अन्यत्र अग्निरेतु इति प्रजा
पतिरृषिस्त्रिष्टुप्छन्दः अग्निर्देवता हो० ॐ अग्निरेतु प्रथमो देवतानाꣳ सोऽस्यै
प्रजां मुञ्चतु मृत्युपाशात् तदयꣳ राजा वरुणोऽनुमन्यतां यथेयꣳ स्त्रीपौत्रम
घन्नरोदात्स्वाहा इदमग्नये इमामग्निरिति प्रजापतिरृषिस्त्रिष्टुप्छन्दः अग्निर्दे
वता हो० ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः
अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिप्रबुध्यतामियꣳ स्वाहा
इदमग्नये स्वस्ति न इति प्रजापतिरृषिस्त्रिष्टुप्छन्दः अग्निर्देवता होमे वि०
ॐ स्वस्ति नो अग्ने दिवा पृथिव्या विश्वानि धेह्ययथा यजत्र यदस्यां महि दि
वि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रꣳ स्वाहा इदमग्नये सुगन्नु इति
प्रजापतिरृषिस्त्रिष्टुप्छन्दः अग्निर्देवता हो० ॐ सुगन्नु पन्थां प्रदिशन्न ए
हि ज्योतिष्मध्येह्यजरन्न आयुः अपैतु मृत्युरमृतन्न आगाद्वैवस्वतो नो
अभयं कृणोतु स्वाहा इदं वैवस्वताय अत्र अग्निमाचाराद्धर्धं वस्त्रेणान्तर्धाय

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनसामन्त्रंपठन् परंमृत्योरितिसंकसुकऋषिस्त्रिष्टुप्छन्दो मृत्युर्देवताहो० ॐ परंमृत्यो
ऽनुपरेहिपन्थां यस्तेऽअन्यऽइतरोदेवयानात् चक्षुष्मते शृण्वते ते ब्रवीमि मानः प्रजा
रीरिषोमोतवीरान्स्वाहा इदंमृत्यवे प्राणीनोदकस्पर्शः अत्रापि दक्षिणा अद्येह अमुक
गोत्रो सपत्नीकोऽहं कृतैतद्गन्धादि पञ्चकेहोमस्य साङ्गफलप्राप्त्यै साङ्गतया
र्थं इमां दक्षिणां आचार्य्यब्रह्मभ्यां यथांशेन दास्ये ॐ तत्सत् मंत्रपाठः गोविन्दो
गोकुलेस्तिष्ठन् गोपीभिर्विहरन्सह तुष्टिपुष्टिकरोनित्यं शुभयोः स्त्रीकुमारयोः
ततआचम्य अथपाणिग्रहणांगभूतो लाजाहोमः अत्रकन्यायाः कर्तृत्वम् आ
युष्मानस्तुमेपतिरितिमन्त्रलिङ्गात् संहितेनतिष्ठती जुहोतीतिवचनात् ततस्ति
ष्ठतीकुमारी अञ्जलिंविदधाति वरस्तिष्ठन्कुमार्य्या अञ्जलिमालभते अथकु
मार्य्या ज्येष्ठः कनिष्ठोवाभ्राता लौकिकाग्निसिद्धान् लाजान् घृतेनाभिघार्य्य
सम्प्रोक्ष्य नवीनसूर्प्पेन्यस्तुद्धाकृत्वा तेष्वेकंभागंकुमार्य्या अञ्जलावावपति कुमारी
चताञ्जलिनागृहीत्वा प्राङ्मुखीतिष्ठती मन्त्रंपठन्ती जुहुयात् अर्य्यमणमि
त्यास्यथर्वणऋषिरनुष्टुप्छन्दः अर्य्यमादेवता लाजाहोमेविनियोगः ॐ अर्य्य
मणंदेवंकन्याअग्निमयक्षत सनोऽअर्य्यमादेवः प्रेतोमुञ्चतुमापतेःस्वाहा
इदमर्य्यम्णे इत्यञ्जलिस्थलाजानां तृतीयांशंजुहोति नात्रसंस्रवधारणं
होमस्यासमाप्तत्वात् इयंनारीत्यस्याथर्वणऋषिरनुष्टुप्छन्दः अर्य्यमा
देवता लाजाहोमेवि० ॐ इयंनार्य्युपब्रूते लाजानावपन्तिका आयुष्मानस्तु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मेपति रेधंताज्ञातयोममस्वाहा इदमर्यम्णेऽग्नये इत्यर्द्धं जुहोति इमॉल्लाजानित्या-
थर्वणा ऋषिरनुष्टुप्छन्दोऽग्निर्देवता लाजाहोमेवि० ॐ इमॉल्लाजानावपाम्यग्नौ समृ
द्धिकरणंतव मम तुभ्यंच संवननं तदग्निरनुमन्यतामियं स्वाहा इदमग्नये इतिस
र्वान्लाजान् जुहोति अथवरोवध्वाः सांगुष्ठं दक्षिणहस्तमुत्तानं कृत्वा गृह्णाति तत्र
मंत्राः गृह्णामीत्यादीनां चतुर्णांमंत्राणां याज्ञवल्क्यभारद्वाजा अथर्वाप्रजापति ऋ
षयः त्रिष्टुबनुष्टुबुष्णिग्जगत्यश्छन्दांसि भगोऽर्यमासविता पुरन्ध्रयो देवताः वधू
पाणिग्रहणेवि० ॐ गृभ्णामिते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः भगो
ऽर्यमासविता पुरन्ध्रिर्मह्यंत्वा दुर्गार्हपत्याय देवाः ॐ अमोहमस्मि सात्वं
सात्वमस्यमोऽहम् सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवीत्वम् ॐ तावेहि
विवहावहै सहरेतो दधावहै प्रजां प्रजनयावहै पुत्रान्विंदावहै बहून् ॐ ते सन्तु
जरदष्टयः संप्रियौ रोचिष्णू सुमनस्यमानौ पश्येम शरदः शतं जीवेम शरदः शतं
शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः
शतात् अथैनमश्मानमारोहयति अग्नेरुत्तरतः स्थितेऽश्मनि वरोवध्वाः दक्षि
णपादं स्वदक्षिणहस्तेन गृहीत्वा मंत्रपठन् स्थापयेत् आरोहेममित्यस्याथ
र्वणऋषिरनुष्टुप्छन्दोवधूर्देवता अश्मारोहणे विनियोगः ॐ आरोहेममश्मा
नमश्मेवत्वं स्थिराभव अभितिष्ठ पृतन्यतोऽववाधस्व पृतनायत इतितामश्मा
न्यारोप्य तस्याः शिरसिहस्तंनीत्वा वरोगाथांगायति सरस्वतीप्रेदमितिवि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्वामित्र ऋषिरनुष्टुप्छंदः सरस्वती देवता गाथागाने विनियोगः ॐ सरस्वती प्रेदमव
सुभगे वाजिनीवति यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः यस्यां भूतं समभव
द्यस्यां विश्वमिदं जगत् तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः इति गाथागा
नं वरस्यैव ततश्च वधूवरौ प्रदक्षिणमग्निं परिक्रामतः वरश्च मंत्रं पठेत् तुभ्यमग्र
इत्यस्य वरुण ऋषिरनुष्टुप्छन्दो ऽग्निर्देवता परिक्रमणे विनि० ॐ तुभ्यमग्ने पर्य्यवह
न्त्सूर्य्यां वहतुना सह पुनः पतिभ्यो जायां दा ऽग्ने प्रजया सह इति पठेत् सवधू
कः परिक्रामेत् एवं पुनर्वारत्रयं लाजाहोम पाणिग्रहणाश्मारोहण गाथागानानि
परिक्रमणानि कृत्वा तृतीय परिक्रमणानन्तरं कुमार्य्या भ्राता शूर्प्पकोणप्रदेशेन
सर्वान् लाजान् कुमारीहस्ते ददाति सा च तिष्ठन्ती जुहोति ॐ भगाय स्वाहा इदं भगा
य इति कृत्वा ततः समाचारात् तूष्णीं चतुर्थपरिक्रमणं कृत्वा यथास्थानमागत्यो
पविश्य ब्रह्मणान्वारब्धो मनसा प्रजापतिं ध्यात्वा ॐ अग्नये प्रजापतये स्वाहा
इदमग्नये प्रजापतये इति कृत्वा अथाचारात् सप्तस्वस्तिकाः पुष्पाक्षताक्ताः सप्त
वर्त्तिकाः प्रज्वाल्य तण्डुलमध्ये स्थाप्य वरो वध्वां दक्षिणपादक्रमेण मंत्रान् प
ठन् एनामुदीचीं सप्तपदानि निष्क्रामयति मन्त्राः ॐ एकमिषे विष्णुस्त्वा नयतु १
ॐ द्वे ऊर्ज्जे विष्णुस्त्वा नयतु २ ॐ त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु ३ ॐ च
त्वारि मायोभवाय विष्णुस्त्वा नयतु ४ ॐ पञ्च पशुभ्यो विष्णुस्त्वा नयतु ५ ॐ रामः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षडृतुभ्यो विष्णुस्त्वा नयतु इति सप्तमन्त्रैः सप्तर्त्तिकाः क्रमेण निर्वाप्य सप्तमीं ज्वलं
तीमिव स्थापयति वधूः तत्र सप्तमो मंत्रः ॐ सखे सप्तपदा भव सा मामनुव्रता भव वि
ष्णुस्त्वा नयतु ७ अथ वरः निष्क्रमणप्रभृति स्कारस्थितात् उत्तरतो वाग्यतस्थित
द्विजस्कंधस्थितात् उदकुम्भादुदकमादाय पिञ्जूलेन दूर्वामुख्या पल्लवितशाख
या वा वधूं मूर्द्धन्यभिषिञ्चति ॐ आपः शिवा इति प्रजापतिर्ऋषिः प्रतिष्ठा छन्दः आ
पो देवता वधूमूर्द्धाभिषेचने विनियोगः ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमा
स्तास्ते कृण्वन्तु भेषजम् ॐ आपो हि ष्ठेति तृचस्य सिन्धुद्वीप ऋषिर्गायत्री छन्दः
आपो देवता वधूमूर्द्धाभिषेके विनियोगः ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधा
तन महे रणाय चक्षसे यो वः शिवतमो रस स्तस्य भाजयतेह नः उशतीरिव मातरः
तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः अथ दिवा वि
वाहे सूर्यमुदीक्षस्वेति वरेण प्रेषिता वधूः सूर्यमुदीक्षयति तच्चक्षुरिति दध्य
ङ्ङाथर्वण ऋषिः पुरउष्णिक्छंदः सूर्यो देवता सूर्योदीक्षणे विनियोगः ॐ तच्च
क्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम
शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्
अथ वरो वध्वाः दक्षिणांसमध्योपरि स्वदक्षिणहस्तं नीत्वा तस्या हृदयमाल
भेत मम व्रते त इति प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः प्रजापतिर्देवता वधूहृदया

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लम्भने विनियोगः ॐ मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं तेऽस्तु मम वाचमे
कमना जुषस्व प्रजापतिस्त्वा नियुनक्तु मह्यम् अथ वधूमभिमन्त्रयेत सुमङ्गलि
रिति प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः लिङ्गोक्ता देवता वध्वाभिमन्त्रणे विनियोगः ॐ
सुमङ्गलीरियं वधूरिमां समेत पश्यत सौभाग्यमस्यै दत्त्वा यथास्तं विपरेतन
इति मन्त्रेण वध्वाः सीमन्ते सिन्दूरमपि दापयन्ति वृद्धाः अत्रावसरे शिष्टाचारात्
वरस्य वामभागे वधूमुपवेशयन्ति सापि वरस्याञ्चलं प्रतिगृह्य तेन यथास्थाने
निवेशयति अथाग्नेः पश्चादुदग्वा पूर्वकल्पिते अनुगुप्ते आगारे उत्तरलोम्नि
प्राग्ग्रीवे आनडुहचर्मणि आस्तीर्णे रक्तवस्त्रखण्डे वा कश्चन एकपुरुषो वर
एव वा मन्त्रं पठन् वधूमुत्थाप्योपवेशयति तत्र मन्त्रः इह गाव इति प्रजापतिर्ऋ
षिः अनुष्टुप्छन्दो लिङ्गोक्ता देवता वधूपवेशने विनियोगः ॐ इह गावो निषीदन्त्वि
हाश्वा इह पूरुषाः इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदतु इति समन्त्र
कमुपवेश्य तूष्णीमुत्थाप्य पूर्ववद्यथास्थानमुपवेश्य स्वयं चोपविश्य ब्रह्म
णान्वारब्धो जुहुयात् ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते
इति स्विष्टकृद्धोमं विधाय ग्रामवचनं कुर्यात् ग्राम इति स्वकुलवृद्धाः स्त्रि
य इति कथ्यन्ते ततो वधूहस्तेन वरस्य पादप्रक्षालनम् वरवध्वोः परस्परं
तिलकाक्षतारोपणम् दधिगुडप्राशनं परस्परोच्छिष्टप्राशनं च यथादेशकु
लाचारं कुर्यात् विवाहश्मशानयोर्ग्रामवचनं प्रमाणमिति श्रुतिवचनम् रामः

५६

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततः संस्रवप्राशनम् सजलपवित्राभ्यांमुखमार्जनम् पवित्रप्रतिपत्तिः प्रणीताविमो
कः ब्रह्मणे पूर्णपात्रदानसंकल्पः अद्येहेत्यादि अमुकशर्म्मा सवधूकोहं विवा
हांगहोमकर्म्मणः सांगफलप्राप्तयेसाद्गुण्यार्थं इदंपूर्णपात्रंसद्रव्यं ब्रह्मन्तु
भ्यंसम्प्रददे ब्रह्मन्कर्म्मकर्मभुक्ततः सहयावाभयोभुवा देवेभ्यः कर्म्मकृत्वाते प्र
तसचाभुव इतिमंत्रपाठः अत्रैवस्याचार्य्याय वरंददाति गोर्ब्राह्मणस्यवरः
ग्रामोराजन्यस्य अश्वोवैश्यस्य तत्तदभावे विभवानुसारेण स्वर्णादिद्रव्यं
दद्यात् तत्रसंकल्पः अद्येहेत्यादि अमुकगोत्रोमुकशर्म्मा सवधूकोहं विवा
हांगहोमकर्म्मणः साङ्गफलप्राप्तये साद्गुण्यार्थं इमांगां इदंगोप्रत्याम्नायी
भूतं स्वर्णादिद्रव्यम्वा वरत्वेन आचार्य्यायतुभ्यंसम्प्रददे यज्ञसाधनभू
ताया इत्यादिमंत्रेण आचार्य्यायगवादिकं समर्प्य भूयसीं संकल्पयेत्
अद्येहेत्यादि अमुकशर्म्मा सपत्नीकोहं विवाहकर्म्मणः साद्गुण्यार्थं इमां
भूयसीं दक्षिणां नानागोत्रेभ्यो ब्राह्मणेभ्यो नटनर्त्तकगायकेभ्यो दीनाना
थेभ्यश्चविभज्यदास्ये ॐ तत्सत् इतिसंकल्प्यभूयसीं विभज्य अभि
षेकतिलक आयुष्करण रक्षासूत्रबंधन घृतच्छायादर्शन मंत्रपाठादि
कंकारयेत् अथयदिवाचेद्विवाह स्यादा अस्तामितेर्के रात्रौचेद्विवाहः स्यादा
वरदानानन्तरं वधूंवरोध्रुवंदर्शयति अमुकीध्रुवमीक्षस्वेति प्रेषितावधू

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्र.क.वि.
९

ध्रुवंमन्त्रेणप्रेक्षते ध्रुवमसीति प्रजापतिर्ऋषिः पंक्तिश्छन्दः ध्रुवोदेवताध्रु
वादीक्षणेविनियोगः ॐ ध्रुवमसि ध्रुवंत्वा पश्यामि ध्रुवाधिपोष्यामयि मह्यं
त्वादाद्बृहस्पतिः मयापत्याप्रजावती संजीवशरदः शतम् इतिवरेणचारि
तेन मन्त्रेणसहवधूः पश्येत् मायदिध्रुवंनपश्येत् तथापिपश्यामित्येव
ब्रूयात् अथवरवध्वोः त्रिरात्रनियमाः अक्षारलवणास्याताम् अधःशयी
याताम् सम्वत्सरं मत्रात्रं त्रिरात्रंवानमिथुनीभावमुपेयाताम् इतिनियमाः
ततः पञ्चघोषपूर्वकं विवाहमंडपाद्भवनेगत्वा जीवमातृपूजनंकुर्यात्
ततः श्वश्र्वादिभिः सुवासिनीभिर्महानीराजन पूर्वकं कृतपिष्टजातकादिति
लको वधूवरौ व्वालिग्रन्थियुतं स्ववध्वास्वस्य समीपे निधाय धौतमुजी
मं धौतवाससी चपरिधाय स्वपक्षीयैः पुरुषैः सह श्वशुरगृहे पक्वविधमो
दनादिभक्ष्यंभुक्त्वा रात्रौयथासुखंशयीत अर्द्धरात्रादूर्ध्वं विवाहलग्ने
सति भोजनानन्तरंविवाहलग्नंकुर्यात् ततः प्रभाते श्वशुरगृहात्स्वगृह
मानीय कृतमुकुटादिधारणं वधूमग्रतः कृत्वा स्वगृहे यथाविधि द्वारमा
तृणांपूजनंकुर्यात् जीवमातृणांपूजनंकुर्यात् भूसनीं विभज्य तत्रैव
रमात्राद्याः सुवासिन्योवधूवरयोः तदिक्त्रानां बांधवानां च महानीराजन
पूर्वकं तिलकादिकुर्युः ततोभिषेकमंत्रपाठ घृतच्छायादर्शनं कृत्वा-
ततोवधूवरौ गुडदध्यादि प्राशनंकुर्यातां ततोवरपिता सुवासिनीभ्यः राम:

९१

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

स्विकेभ्यो नर्त्तक गायकेभ्यो वादिकादिभ्यश्च यथारुचि यथाशक्ति पारितो
षिकं द्रव्यवस्त्रभोजनादि दद्यात् इति मञ्जुपेदादि ध्यादि माध्यंदिनशाखिनां
ब्रह्मविवाह पद्धतिः समाप्ता॥ अथ चतुर्थीकर्म्म॥ चतुर्थ्यामपररात्रे ऽभ्यन्तरतो
ग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य
स्थालीपाकं श्रपयित्वा आज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोतीति सूत्रम्
यथाविवाह चतुर्थदिवसे अपररात्रे ऽरुणोदयतः प्राक् उद्वर्त्तनपूर्वकं वधू
वरौ स्नापयित्वा अलंकृतस्य वरस्य दक्षिणतो ऽलंकृतां वधूं वध्वा उत्तरतो
वरमुपवेशयेत् अथ वरो द्विराचम्य अर्घं संस्थाप्य प्राणानायम्य गणेशपू
जनं कुर्य्यात् तत्र संकल्पः अद्येह अमुकशर्म्मा सपत्नीकोऽहं करिष्यमाण
विवाहांग चतुर्थीकर्म्माख्य कर्म्मणि निर्विघ्नतया कार्य्यसिद्धये श्रीभगव
तो गणेश्वरस्य पूजनं करिष्ये इति यथाविधि गणेशं सम्पूज्य प्रधानसंकल्पं
कुर्य्यात् अद्येहेत्यादि अमुकोऽहं ममास्या वध्वाः सोमाद्युपभुक्तिदोषपरि
हारार्थे विवाहव्रतसमाप्तिविहितं विवाहांग चतुर्थीकर्म्म करिष्ये तत्पूर्वां
गत्वेन गणपतिसहित गौर्य्यादि षोडशमातृणां पूजनं करिष्ये इति संकल्प्य
यथाविधि मातॄः सम्पूज्य वसोर्धाराः सम्पाद्य आचारात् कृतान्नप्राशन संध्या
वंदन ब्राह्मणद्वारा पुण्याहं वाचयित्वा होमवेदीं सम्पाद्य तत्र पंचभूसं
स्कारपूर्वकं मग्निं संस्थाप्य वेद्या ईशाने कलशं संस्थाप्य तत्र ग्रहानावाह्य

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सम्पूज्य ब्रह्मणो वरणं कुर्यात् अद्येहेत्यमुकशर्माहं करिष्यमाणचतुर्थीक
र्मांगहोमकर्मणि कृताकृतावेक्षणाय ब्रह्मकर्मकर्तुं ब्रह्मणः पूजनपू
र्वकं वरणं करिष्ये ब्रह्माणं ब्रह्मयज्ञानमिति गंधादिभिः सम्पूज्य वरणसा
मग्रीं करे कृत्वा एभिर्गंधाक्षतपुष्पपूगीफलद्रव्यैः करिष्यमाणचतुर्थीक
र्मांगहोमकर्मणि कृताकृतावेक्षणाय ब्रह्मकर्मकर्तुं ब्रह्मन् त्वामहं वृणे
वृतोस्मीति प्रत्युक्तिः ततः पूर्वं स्थापिताग्नेः पश्चादुपविश्य दक्षिणतो ब्रह्माण
मुपवेश्य प्रणीतास्थानादुत्तरतः प्रागग्रमुदपात्रं प्रतिष्ठाप्य ब्रह्मोपवेशना-
दि अग्रेवरणमध्ये दीर्घाकाराकृती रित्वनं विधाय एतत्कृतिर्गाविनाग्निं प्र
तिष्ठाप्य तेदेवाग्निरिति ध्यानादि नीराजनान्तं सम्पूज्य देवताभिध्यानं करोति
अद्येहेत्यादि अमुकशर्मा सपत्नीकोहं अस्यां वध्वां बीजगर्भसमुद्भवैनो नि
वर्हणद्वारा ॐ तत्सत् श्रीपरमेश्वरप्रीत्यर्थं चतुर्थीकर्माख्ये तत्र प्रजाप
तिमिन्द्रमग्निं सोमं अग्निं वायुं सूर्यं चन्द्रमसं गन्धर्वं आज्येन प्रजापतिं च
रुणा स्विष्टकृतं चर्वाज्येन अग्निं वायुं सूर्यं अग्नीवरुणावग्निं वरुणमग्निं
वरुणं सवितारं विश्वान्देवान्मरुतः स्वर्कान्वरुणमदितिं प्रजापतिं वाजेसनाहं
यक्ष्ये इदमाज्यं इदं चरुद्रव्यं च तत्तद्देवताभ्यो मया परित्यक्तं यथादेवतमस्तु
इति द्रव्यत्यागं विधाय ब्रह्मणान्वारब्धो मनसा प्रजापतिं ध्यात्वा जुहुयात्
ॐ प्रजापतये स्वाहा इदं प्र. ॐ इन्द्राय स्वाहा इदमिन्द्राय ॐ अग्नये स्वाहा एमः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

इदमग्नये ॐ सोमायस्वाहा इदं सोमाय अन्वारब्धं त्यक्त्वा आज्येन प्रधानहोमः
अग्नेप्रायश्चित्ते इत्यादीनां पञ्चानां मन्त्राणां परमेष्ठी ऋषिः त्रिष्टुप्छन्दो लि
गोक्तादेवता चतुर्थीकर्माङ्गाज्याहोमे विनियोगः ॐ अग्नेप्रायश्चित्ते त्वं देवानां
प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम ऽउपदधामि यास्यै पतिघ्नी तनूस्ताम
स्यै नाशय स्वाहा इदमग्नये उदपात्रे संस्रवप्रक्षेपः ॐ वायो प्रायश्चित्ते त्वं देवा
नां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम ऽउपदधामि यास्यै प्रजाघ्नी तनूस्ता
मस्यै नाशय स्वाहा इदं वायवे उदपात्रे संस्रवप्रक्षेपः ॐ सूर्य प्रायश्चित्ते त्वं देवा
नां प्रा० यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा इदं सूर्याय उदपात्रे संस्रव
प्रक्षेपः ॐ चन्द्र प्रायश्चित्ते त्वं देवानां प्रा० यास्यै गृहघ्नी तनूस्तामस्यै नाशय
स्वाहा इदं चन्द्रमसे उदपात्रे संस्रवप्रक्षेपः ॐ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रा०
यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा इदं गन्धर्वाय उदपात्रे संस्रवप्रक्षेपः
इत्याज्येन हुत्वा स्थालीपाकमाज्येनाभिघार्य स्रुवेणादाय जुहोति ॐ प्रजा
पतये स्वाहा इदं प्रजापतये उदपात्रे संस्रवप्रक्षेपः ततः आज्यचरू गृहीत्वा
अन्वारब्धो जुहुयात् ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते ततो
ब्राह्मणान्वारब्धो भूराद्यानवाहुतीराज्येन जुहुयात् ॐ अग्नये प्रजापतये स्वा
हा इदमग्नये प्रजापतये ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते
ततः संस्रवप्राशनम् पवित्रयोरग्नौ प्रतिपत्तिः प्रणीताविमोकः ब्रह्मणे पूर्ण

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

पात्रदानम् अद्येह अमुकशर्म्मा सपत्नीकोऽहं कृतस्यास्य चतुर्थीकर्म्मणः होमक
र्म्मणः सांगतासिद्ध्यै इदं पूर्णपात्रं सद्रव्यं ब्रह्मणे तुभ्यमहं सम्प्रददे इति संकल्प्य
ब्रह्मणे पूर्णपात्रं दद्यात् ब्रह्मा च अकल्कमेत्याशिषं दद्यात् अथ पूर्वस्थापि
तोदुदपात्रादुदकमादाय वरो वधूमूर्द्धन्यभिषिञ्चति यातइति प्रजापतिर्ऋ
षि त्रिष्टुप्छन्दो वधूर्देवता अभिषेचने विनियोगः ॐ यातेपतिघ्नी प्रजाघ्नी
पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नी ततऽएनां करोमि साजीर्य त्वं
मयासह अमुकी देवि इत्यनेन मंत्रेण अत्रैव वध्वा आचारप्राप्तं वर्णाक्षरा
नुकूलं द्वितीयं नामकरणं कुर्यात् अथ वरो वधूं कृत्वास्यास्थालीपाकं प्राश
यति सकृत् प्राणैस्ते इति प्रजापतिर्ऋषिः अनुष्टुप्छन्दः वधूर्देवता वध्वाः स्था-
लीपाकप्राशने विनियोगः ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम् वे
दाहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः
शतम् इति अथाचारात्कलशं शिरस्थं दक्षिणीकृत्य गजदंतादिनिर्मितका
ऽभिनवकंकतिकया वध्वाः सीमन्तोन्नयनं च विधाय त्रिरात्रं विना भोजनोष्णा
हुतिं च कृत्वा अञ्चलग्रन्थिं कंकणं च मोचयेत् कंकणापि चनमंत्रः कंकणं
मोचयाम्यद्य रक्षार्थं धृतं रक्षणं मम मयि रक्षां स्थिरां कृत्वा स्वस्थानं गच्छ कंक
णः ततः पाणिप्रतपनाद्यङ्गालभनान्तं कर्म्म समाप्य दक्षिणासंकल्पं कु एमः

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri

र्य्योत् अद्येह अमुकशर्म्मोसपत्नीकोहं कृतस्यास्य चतुर्थीकर्म्मणः सांगतासिद्ध्यर्थं
इमांदक्षिणां आचार्य्याय तुभ्यमम्प्रददे तथान्येभ्यो ब्राह्मणेभ्यश्च दास्ये ॐ तत्सत् इ
तिसंकल्प्य ब्राह्मणेभ्योदक्षिणांदत्वा आयुष्यरक्षाबंधन घृतच्छायादर्शनाभिमेक
तिलकमंत्रपाठाशीर्ग्रहणादीनिविधाय आचम्य यस्यस्मृत्येतिपठित्वा ॐ अच्युता
यनमः इतित्रिरुच्चार्य्य नमस्कृत्यद्विजान्प्रणम्य वहिरागत्य सूर्य्यंप्रणमेत् ततोगृहं
प्रविश्य वृद्धैः सहयथासुखंविहरेत् ततोमध्याह्नादर्वाक् यस्मात्सकभूमरणाः संग
ताः गायन्तीः सुवासिनीरग्रतःकृत्वा मातृकाश्चिफलकमुत्थाप्य वंशपात्रेनिधाय
शुद्धरक्तवस्त्रेणाच्छाद्य दास्यादिमूर्द्ध्नि निधायाग्रतःकृत्वा वद्धाञ्जलौ घृतमुकुटा
दिभूषणौ वधूवरौअग्रेयथांतूर्य्यादि वादकांश्चाग्रतःकृत्वा वाप्यादिजलाशयं
गत्वा जलमातृणांयथाविधिपूजनंकुर्य्यात् अथ नानागीतानिगायन्त्यस्ताश्च
योषाधूवराभ्यांसह जलाशयाद्गृहंप्रत्यागच्छेयुः ततस्तावधूवरौ गृहाङ्गणेउ
पविश्य तन्मध्येगोमयोदकेनोपलिप्य तत्रतण्डुलपिष्टोदकेन श्यामादेवींविलि
रूप्य गायन्त्यस्ताःसम्पूजयेयुः इतिचतुर्थीकर्म्मपद्धतिः अथद्विरागमनविधिः
शुभेह्नि फेणिकादिकंपाचयित्वा पेटायांनिधाय शिविकाद्यंयानमारुह्य श्वशु
रगृहंगत्वा श्वशुरावभिवंद्य ताभ्यांकृततिलकः तत्कृतनानाप्रणतिकृत्य भोजनंवि
धाय गणपतिंसम्पूज्य शुभेलग्नेवधूंप्रस्थाप्य श्वशुरावभिवंद्य ताभ्यांकृत
तिलकः पुरस्कृतनद्दत्तकौतुक सवधूकोनिजगृहमागत्य स्वदेशरीत्यादेहली

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्र. बि. २००

समीपे मिथोञ्चलग्रन्थिं सम्पाद्य स्वासने समुपविश्य स्ववामभागे पृथक् पीठे व
धूमुपवेश्य आचम्य अर्घं संस्थाप्य अर्घं संस्थाप्य प्राणानायम्य संकल्पं कुर्यात्
अद्येह अमुकशर्म्मा सपत्नीकोहं मम द्विरागमनांग गृहप्रवेशकर्म्मणि श्रीगणेश
गौर्यादिमातृणां च पूजनं करिष्ये इति संकल्प्य यथाविधि गणेशाद्यष्टमातृश्च सम्पू
ज्य लग्नदानं कुर्यात् अद्येह अमुकशर्म्मा सपत्नीकोहं मम द्विरागमनांग गृह
प्रवेशलग्नाद्यनेकत्रस्थानस्थितानां आदित्यादिनवग्रहाणां शुभानां शुभफला
धिक्यप्राप्तये दुष्टानां दुष्टदोषोपशान्त्यर्थं इदं स्वर्णं नलिकेरफलीभूतं द्रव्यम्वा
पुरोहिताय दैवज्ञादि ब्राह्मणेभ्यो दातुमहमुत्सृजे ॐ तत्सत् न मम इति संकल्प्य दक्षि
णां दत्वा स्वस्तिवाचनपुरस्सरं गृहं प्रविश्य भित्तिलिखित जीवमातृणां सविधे
गत्वा विधिवत्ताः सम्पूज्य आचारात्कलशं संस्थाप्य वध्वा सह तं प्रदक्षिणीकृ
त्य दक्षिणासंकल्पं कुर्यात् अद्येह अमुकशर्म्मा सवधूकोहं द्विरागमनांग
गृहप्रवेशकर्म्मणा उत्तरांगत्वेन भित्तिलिखित कल्याणआदि जीवमातृपूजा
कर्म्मणः सांगतासिद्ध्यै इमां दक्षिणां ब्राह्मणाय दास्ये तत्सत् दक्षिणादि
त्वा अभिषेकतिलकमन्त्रपाठादिकारयित्वा अञ्चलग्रन्थिं विमोच्य तत्रै
व दधिगुडफेणिकादि भुक्त्वा सुखं प्रक्षाल्य वधूवरौ यथासुखं विहरेताम्
इति द्विरागमनविधिः अथ विष्णुप्रतिमाविवाहः कन्याया जन्मकालीनग्र
हादि सूचितवैधव्ययोग हरणाय विष्णुप्रतिमाविवाहं पूर्वं कृत्वा पुनः पाणि

रामः
२००

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

यहणमाचरेत् तत्रकर्त्ता स्नातः स्वाचान्तः स्वासने उपविश्य प्राङ्मुखः पू-
र्वंविष्णुप्रतिमाविवाहांगत्वेन गणेशंसम्पूज्य प्रधानसंकल्पंकुर्य्यात् अद्येहत्या
दि अमुकोहं अमुकगोत्रस्याः कन्याया जन्मलग्नादौ वैधव्य सम्भावना सूचके
ग्रहैः सूचितारिष्टनिवृत्तये सौभाग्यप्राप्तये विष्णुप्रतिमयासह विवाहंकरिष्ये
प्रतिमादानंचकरिष्ये तत्प्रतिग्रहार्थं आचार्य्यस्यपूजन पूर्वकंवरणंचकरिष्ये
इतिसंकल्प्य आचार्य्यंसम्पूज्य हत्वा मातृपूजाभ्युदयिकं पुण्याहवाचनानि
विधाय विष्णुप्रतिमायां अग्न्युत्तारणपूर्वकं एतन्तइति ॐभूर्भुवः स्वः विष्णुप्रति
मायां विष्णो इहागच्छ सुप्रतिष्ठितोवरदोभव इतिप्रतिष्ठांविधाय अद्येहत्या
दि अमुकगोत्रायाः ममास्याः कन्यायाः जन्मसमयवर्त्ति लग्नादि वैधव्य स
म्भावना सूचकैर्ग्रहादिभिः सूचितारिष्टनिवृत्तये सौभाग्यसमृद्धये स्व
र्णप्रतिमायां श्रीविष्णोः पूजनंकरिष्ये इतिसंकल्प्य ध्यानम् निर्म्मितांरुचि
रांशंख गदाचक्रादिसंयुताम् दधानांवाससीपीते कुमुदोत्पलमालिनीम्
इतिध्यात्वा ॐ तद्विष्णोः परमंपदꣳ सदापश्यन्तिसूरयः दिवीवचक्षुराततं
म् त्रीणिपदाविचक्रमे विष्णुर्गोपाऽअदाभ्यः अतोधर्माणिधारयन्
तद्विप्रासोविपन्यवो जागृवांसꣳसः समिन्धते विष्णोर्यत्परमंपदम् इतिवैदि
केन ॐ विष्णवेनमः इतिनाममन्त्रेणच आवाहनादिनीराजनान्तं सम्पूज्य

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रार्थयेत् देहि विलोवरं देव कन्यांपालयदुःखतः पतिंजीवत्सकन्याया चिरं पुत्र
स्मरं संकुरु १ वसुमांगस्य कृपस्त्वं जीवनानांसमाश्रय पतिंजीवत्सकन्याया चिरंपु
त्रस्मरं संकुरु २ इतिसम्प्रार्थ्य परित्वित्यादिमन्त्रे रधस्तादुपरिष्टाच्च मंत्रावृत्त्या
कन्याप्रतिमांच दत्वातन्तुसूत्रेणावेष्टयेत् ॐ परित्वागीर्वणोगिर इमाभवन्तुवि
श्वतः वृद्धायुमनुवृद्धयो जुष्टाभवन्तु जुष्टयः १ ॐ इन्द्रस्यस्यूरसीन्द्रस्य ध्रुवोसि
ऐन्द्रमसि वैश्वदेवमसि २ ॐ विभूरसिप्रवाहणो वह्निरसि हव्यवाहनः श्वात्रोसि
प्रचेतास्तुथोसिविश्ववेदा ऽउशिगसि २ ॐ उशिगसिकविरङ्घारिरसि बम्भा
रिरवस्यूरसि दुवस्वाञ्छुन्ध्यूरसिमार्जालीय सम्राडसिकृशानुःपरिषद्योसि
पवमानोनभोसि प्रतक्वामृष्टोसि हव्यसूदन ऽऋतधामासिस्वर्ज्योतिः ४ ॐ
समुद्रोसिविश्वव्यचा ऽअजोस्येकपादहिरसि बुध्न्योवागस्यैन्द्रमसि सदो
स्यृतस्यद्वारौ मामासन्ताप्तमध्वनामध्वपते प्रमातिरस्वस्तिमेस्मिन्पथिदेवयानेभूया
न्मित्रस्यमा ५ ॐ मित्रस्यमाचक्षुषेक्षध्वमग्नयः सगराःसगरास्थसगरेण
नाम्नारौद्रेणानीकेनपातमाग्नयः पिपृतमाग्नयो गोपायतमानमो वोस्तु
मामाहिꣳसिष्ट ६ ॐ ज्योतिरसिविश्वरूपं विश्वेषान्देवानाꣳ समित्
त्वꣳसोमतनूकृद्भ्यो द्वेषोभ्योन्यकृतेभ्य ऽउरुयन्तासिवरूथꣳ स्वाहा
जुषाणो ऽअप्तुराज्यस्यवेतुस्वाहा ७ ॐ अग्नेनयसुपथाराये ऽअस्मा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri

न्विश्वानि देव वयुनानि विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम
उक्तिं विधेम ८ ॐ अयन्नो अग्निर्वरिवस्कृणोत्वयम्मृधः पुर एतु प्रभिन्दन् अ
यं वाजाञ्जयतु वाजसातावयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहा ९ ॐ उरुविष्णो वि
क्रमस्वोरुक्षयाय नस्कृधि घृतं घृतयोने पिब प्रप्रयज्ञपतिन्तिर स्वाहा १० इति
मन्त्रैः स्नपनमाचरेत् ततः किञ्चित् स्थित्वा प्रतिमां निस्सार्य दक्षिणासंकल्पं
कुर्यात् अद्येह अमुकोहं अमुकनाम्न्याः कन्याया वैधव्यादि अशुभफल निवृ
त्तिद्वारा सौभाग्यादि शुभफलप्राप्तये कृतस्य विष्णुप्रतिमाविवाहकर्मणः सा
ङ्गुण्यार्थं इमां दक्षिणां ब्राह्मणाय ददामि तथैतत्कर्मणो न्यूनातिरिक्तदोषप
रिहारार्थं इमां दक्षिणां भूयसीत्वेन नानागोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दास्ये
तथा अमुकसंख्याकान् ब्राह्मणांश्च भोजयिष्ये ॐ तत्सत् ततो विष्णुप्रतिमादा
नम् अद्येहेत्यादि अमुकगोत्रा अमुकनाम्नी अमुकी देव्यहं मम जन्मसमयवर्त्ति
लग्नादौ वैधव्यसम्भावनासूचकैर्ग्रहादिभिः सूचितारिष्टनिवृत्तये सौभा
ग्यनिवृत्तये इमां सौवर्णीं सम्पूजितां विष्णुप्रतिमां अमुकगोत्राय अमुकश
र्मणे आचार्यायानुग्रहमहं सम्प्रददे ॐ तत्सत् न मम दानवाक्यम् यन्मया
प्राप्य जनुषि धन्यापतिसमागमम् विषोपविषशस्त्राद्यैर्हतो वापि विरक्त
या १ प्राप्नुवन्त्या महाघोरं जन्मः सौख्यधनापहम् वैधव्याद्यतिदुःखौघं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

तन्नाशाय सुखावाप्तये २ बहुसौभाग्यलब्ध्येच महाविष्णोरिमां तनुम् सौवर्णीनि
र्मितां शक्त्या तुभ्यं सम्प्रददे द्विज २ इति द्विजकरे प्रतिमां दत्वा अनघाहमस्मि इति
त्रिर्वदेत् ब्राह्मणाश्चयोस्त्वा ददन्तु पृथिवीत्वा प्रतिगृह्णातु ॐ स्वस्ति कोदादिति
पठित्वा ॐ अनघा भव इति त्रिर्वदेत् ततः कृतैतत्प्रतिमादान प्रतिष्ठासिद्ध्यर्थं इ
दं सुवर्णं स्वर्णनिष्क्रयीभूतं द्रव्यमग्ना ब्राह्मणाय ददास्ये इति दत्वा अभिषेक
तिलकमंत्रपाठादिकारयित्वा यथासुखं विहरेत् इति विष्णुप्रतिमाविवाहप
द्धतिः प्रतिमादानविधिश्च अथ प्रथमरजोदर्शने शान्तिप्रकारः चन्द्रतारानुकूले
शुभदिने भर्त्ता प्रातरभ्यंग पूर्वकं स्नात्वा शुभासन उपविश्याचम्य स्वस्तिवाच
नं पठित्वा गणेशपूजनं कुर्य्यात् पूजनसामग्रीं सम्पाद्य अर्घ्यं संस्थाप्य संक-
ल्पं कुर्य्यात् अद्येहेत्यादि अमुकोहं ममास्या वध्वा नित्यतिथिवार नक्षत्रादि
स्थिति यथायोगमुल्लेखं कृत्वा प्रथमरजोदर्शन दोषोपशान्त्यर्थं शान्तिकर्म
णि निर्विघ्नताप्राप्तये पूर्वांगत्वेन भगवतो गणेशस्य यथामिलितोपचारैः पू
जनं करिष्ये इति संकल्प्य यथाविधि सम्पूज्य प्रधानसंकल्पं कुर्य्यात् अद्ये
हेत्यादि अमुकोहं ममास्या वध्वा दुर्मासे क्षतिथिवारयोग मुहूर्तसमय संभव
प्रथमरजोदर्शन जनितारिष्टनिवृत्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नारदसंहितो
क्तप्रकारेण शान्तिं करिष्ये तत्पूर्वांगत्वेन सकलमंगलाभिवृद्ध्यर्थं मातृपूजा एमः
१०२

Digitized by Sarayu Trust Foundation Delhi and eGangotri

नान्दीश्राद्धं पुण्याहवाचनानि करिष्ये इति संकल्प्य यथाविधिमातृपूजादिवि
धाय आचार्यं वरयेत् अद्येहेत्यादि करिष्यमाण प्रथमरजोदर्शनशान्तिक
र्मणि आचार्यकर्मकर्तुं आचार्यस्य पूजनपूर्वकं वरणं करिष्ये इति संकल्प्य
नमोस्त्वनन्तायेति नमो ब्रह्मण्यदेवायेत्यादिना गंधपुष्पाक्षतादिभिः सम्पू
ज्य वरणसामग्रीं करे कृत्वा एभिर्गंधाक्षतपुष्पपूगीफलद्रव्यवासोभिः प्रथ
मरजोदर्शनशान्तिकर्मणि आचार्यकर्मकर्तुं आचार्यत्वेन त्वामहं वृणे
इति वृत्वा आचार्यस्त्वित्यादि प्रार्थयेत् तत आचार्यः पञ्चभूसंस्कारपूर्व
कं स्थण्डिलेग्निं संस्थाप्य ब्रह्मवरणं कुर्यात् अद्येहेत्यादि संकीर्त्य प्रथम
रजोदर्शनशान्तिकर्मणि ब्रह्मकर्मकर्तुं ब्रह्मत्वेन त्वामहं वृणे इति वृत्वा य
थाचतुर्मुख इत्यादिना प्रार्थयेत् ततो यजमानः अग्नेरीशाने कलशविधिना
कलशं संस्थाप्य तत्र उक्तरीत्या ब्रह्मवरुणसहितादित्यादि नवग्रहानावाह्य
सम्पूज्य रक्षाविधानेन रक्षां चाभिमंत्र्य स्वर्णप्रतिमायां इन्द्राणीमावाह्य
पूजयेत् ॐ अदित्यै रास्नासीन्द्राण्या उष्णीषः पूषासि घर्माय दीष्व इ
ति वेदमन्त्रेण ॐ इन्द्राण्यै नमः इति नाममन्त्रेण च पाद्यादिनीराजनान्तं सम्पू
जयेत् ततो यजमानो द्रव्यत्यागं कुर्यात् अद्येहेत्यादि प्रथमरजोदर्शनशा
न्तिकर्मणाहं यक्ष्ये तत्र इदमाज्यं आघाराज्यभागदेवताभ्यः नथेदं घृतान्न

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दूर्वा तिलाक्षतद्रव्यं पृथक्पृथक् मन्त्रोक्तसंख्यया सवित्रे रुद्रायैव होमं स्वि
ष्टकृते महाव्याहृतिदेवताभ्यः सर्वप्रायश्चित्तदेवताभ्यः प्रजापतये च मयाप
रित्यक्तं यथादैवतमस्तु ॐ तत्सत्त्वमम इति यजमानेन कृतेन द्रव्यत्यागे आचा
र्यः आघारावाज्यभागौ कृत्वा प्रकृतहोमं कुर्य्यात् ॐ भूर्भुवः स्वः प्रचोदयात् स्वा
हा इति गायत्र्या इदं सवित्रे १०८ ॐ अदित्यै रास्नासीन्द्राण्या उष्णीषः
पूषासि घर्म्माय दीष्व स्वाहा इदमिन्द्राण्यै ततः प्रकृतहोमानन्तरं ब्रह्मणा
न्वारब्धो भूरादिनवाहुति होमं सर्वप्रायश्चित्तहोमं स्विष्टकृतं च जुहुयात् ततः
संस्रवप्राशनम् पवित्राभ्यां शुल्वमार्जनम् पवित्रयोरग्नौ प्रतिपत्तिः प्रणीतावि
मोकः ब्रह्मणे पूर्णपात्रदानम् अद्येहेत्यादि अमुकोऽहं कृतस्य प्रथमर्त्तो
र्दर्शने शान्तिहोमकर्म्मणः साङ्गतार्थं सम्पूर्णफलप्राप्त्यर्थं च इदं पूर्णपात्रं ब्रह्म
णे तुभ्यं सम्प्रददे अमुकशर्म्मेति मन्त्रपाठः ॐ तत्पात्र्यग्नेसीत्यादिभिरङ्ग
न्यालभेत् ततः पूर्णाहुतिं जुहुयात् न्यासुमंकृत्वा दक्षिणासंकल्पः देश
कालकीर्तनान्ते अमुकोऽहं मम अस्याः वध्वाः दुर्मासतिथिनक्षत्रवारयोगक
रणमुहूर्ते मम वध्वा जातप्रथमर्त्तोर्दर्शने सूचितारिष्टनिवृत्तये सक
लसौभाग्यप्राप्तये शान्तिहोमकर्म्मणः साङ्गतासिद्ध्यै इदं सुवर्णं तथा कलशं
आवाहितानां आदित्यादिनवग्रहाणां ब्रह्मादिदेवानां स्वर्णप्रतिमाश्च २ एषः

१०३

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

द्रुग्रयाम्यपूजाकर्म्मणः साङ्गतार्थं मिमां दक्षिणां तथा सुपूजिता मिमांसौ
वर्णीं मिन्द्राणीप्रतिमां च आचार्य्यायदातु महमुत्सृजे तथा शान्तिकाध्याय
पाठकर्म्मणः साङ्गतार्थमिमां दक्षिणां तथा नवावृत्तिचण्डीपाठकर्म्मणः सा
द्गुणफलप्राप्तये तथा रुद्रैकादशिन्याः साङ्गतासिद्ध्यर्थ इमां दक्षिणां ब्राह्मणे
भ्योदास्ये तथा सकलकर्म्मणः साङ्गतासिद्ध्यै यथासंख्याकान्ब्राह्मणा
न्भोजयिष्ये इति संकल्प्य दक्षिणां दत्वा देवानग्निं च विसृज्य क्षमापयेत्
तत आचार्य्यादयः कुम्भजलेन समुद्रज्येष्ठाइत्यादि ऋचः पठित्वा मभिषिञ्च
न्त्वित्यादि वैदिकैः पौराणैश्च मन्त्रैः सपत्नीकं यजमानमभिषिञ्चेयुः तिल
करक्षासूत्रबन्धनादिकं च कुर्य्युः यजमानश्च घृतच्छायादर्शनं दानविधा
य ब्राह्मणान्भोजयित्वा स्वयं बन्धुभिः सह भुञ्जीत इति ग्रहमखोद्दे
शशान्तिप्रयोगः इति यजुः शाखीय गृह्यपद्धतिः समाप्तः श्रीमच्छा
के १८ ९९ माघशुक्लभौमाष्टम्यां लिखित मिदं पुस्तकं पुरोहितमर्पणे
न शुभम् ॥ ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया यदि शुद्धमशुद्धं वा
मम दोषो न दीयते ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सप्रेम भेंट:—
पं० राम स्वरूप शर्मा ग्रा० मढ़ी
की ओर से
पं० कुमार दत्त शर्मा ज्यो०
ग्रा० बेघारा
तिथि - 4. 3. 1973

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूचीपत्र

स्वस्तिवाचन	१	अग्नि नामानि	२३	गर्भाधान	३५	चतुर्थी कर्म	९८
गणेश पूजा	२	अग्नि जिह्वा	२३	जातकर्म	३८	द्विरागमन	१००
मातृपूजा	४	स्रुवधारणावि	२४	षष्ठीमहोत्सव	४२	विष्णुप्रतिमाविवाह	१००
नांदीश्राद्ध	५	द्रव्यप्रमाण	२४	द्वारमातृपूजा	४२	प्रथमरजोदर्शनशांति	१०२
पुन्याहवाचन	८	मुद्रालक्षण	२४	नामकरण	४८		
कलशस्थापन	१०	आज्यलक्षण	२४	पंचगव्यविधि	४९		
रक्षाविधान	११	होमविधिः	२४	जीवमातृपू.	५२		
ग्रहस्थापन पूजनविधि	१२	द्रव्यत्यागसंक	२५	अन्नप्राशन	५३		
		ग्रहाणां बलि दानविधिः	२०	जन्मोत्सव	५४		
				कर्णवेधः	५६		
प्रधानसंकल्प	१३	अभिषेकमंत्राः	३१	अक्षरस्वीकार	५७		
कुशकंडिका	१९	पौराणिकमंत्राः	३३	चूडाकर्म	६०		
भूरादि हवन	२१	तिलककरण	३४	उपनयन	६३		
पूर्णाहुती	२२	मंत्रपाठः	३४	वेदारंभः	६८		
कुशकंडिको पयोगी संग्रह	२३	घृतछाया	३५	समावर्तन	७०		
		आशिर्मंत्र	३५	विवाह	७८		

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection